श्री जिनेन्द्राय नमः

श्री सहजानन्द शास्त्रमाला

कृतिकर्म

सम्पादक—

पं० बिहारी लाल जैन शास्त्री

प्रकाशक :

मंत्री श्री सहजानन्द शास्त्रमाला,

२०१ पुलिस स्ट्रीट, सदर मेरठ ।

मूल्य ३)

श्री सहजानन्द शास्त्रमाला के प्रवर्तकों की शुभ नामावली

१ श्री ला० महावीर प्रसाद जी बैंकर्स सर्राफा मेरठ सदर ३००१)
२ श्री कृष्णचन्द जी जैन १८ तिलक रोड देहरादून १००१)
३ श्री मित्रसैन नाहरसिंह जी जैन पुरानी मंडी मुजफ्फरनगर १००१)
४ श्री प्रेमचन्द ओमप्रकाश जी जैन प्रेमपुरी मेरठ सिटी १००१)
५ श्री सलेकचन्द लालचन्द जी जैन आबूपुरा मुजफ्फरनगर ११०१)
६ श्री दीपचन्द जी जैन रईस झंडा बाजार देहरादून ११०१)
७ श्री बारूमल प्रेमचन्द जी जैन कुल्हड़ी बाजार मसूरी (देहरादून) ११००)
८ श्री बाबूराम मुरारीलाल जी जैन ज्वालापुर (सहारनपुर) १००१)
९ श्री केवलराम उग्रसैन जी जैन स्वस्तिका मेटल वर्क्स जगाधरी १००१)
१० श्री गेंदामल जी दगडूसाह जी जैन सनावद (म०प्र०) १००१)
११ श्री मुकुंदलाल जी गुलशन राय जी नई मंडी मुजफ्फरनगर १००१)
१२ श्री बा० कैलाशचन्द जी जैन देहरादून १००१)
१३ श्री हरीचन्द ज्योतीप्रसाद जी जैन ओवरसियर इटावा वाले १००१)
१४ श्री जयकुमार जी वीरसैन जी सर्राफ सर्राफा मेरठ सदर १००१)
१५ श्री भंवरीलाल जी जैन पांड्या झूमरीतिलैया (हजारीबाग) १००१)
१६ श्री से० फतेहलाल जी (रि०) एक०जन जयपुर १००१)
१७ श्री मंत्री जैन समाज खण्डवा (म० प्र०) १००१)
*१८ श्री बाबूराम अकलंक प्रसाद जी जैन रईस तिस्सा १००१)
*१९ श्री सेट जगन्नाथ जी जैन पांड्या झूमरीतिलैया १००१)
*२० श्री सुखवीरसिंह हेमचन्द जी जैन सर्राफ बड़ौत (मेरठ) १००१)
*२१ श्री फूलचन्द बैजनाथ जी जैन नई मंडी मुजफ्फरनगर १००१)
*२२ श्री सेठ जुगलकिशोर शीतल प्रसाद जी जैन मेरठ सदर १००१)
*२३ सेठ मोहनलाल ताराचन्द जी बड़जात्या जयपुर १००१)
*२४ बा० दयाराम जी जैन S.D.O. टंकी मौहल्ला मेरठ सदर १००१)
*२५ श्री ला० जिनेश्वर प्रसाद अभिनन्दन कुमार बजाज सहारनपुर १००१)
*२६ श्री ला० जिनेश्वर प्रसाद अभिनन्दन कुमार बजाज सहारनपुर १००१)
‡२७ ला० जिनेश्वरदास श्रीपाल जी जैन ३१ लोअर बाजार शिमला १००१)
‡२८ ला० बनवारीलाल निरंजनलाल जी जैन मिडिल बाजार शिमला १००१)

उक्त सदस्यों में से जिन नामों के आदि में * यह निशान लगा है उनके कुछ रुपये आ गये बाकी आना है। जिन नामों के आदि में ‡ यह निशान लगा है उनके रुपये अभी नहीं आये सभी रुपये उनके नाम हैं। शेष सब के रुपये पूरे आ चुके हैं।

अनुक्रमणिका

ॐ नमः सिद्धेभ्यः ॥

श्रीस्वामिसमन्तभद्राचार्यविरचितम्

१ बृहत्स्वयम्भूस्तोत्रम्

स्वयम्भुवा भूतहितेन भूतले समञ्जसज्ञानविभूतिचक्षुषा ।
विराजितं येन विधुन्वता तमः क्षपाकरेणेव गुणोत्करैः करैः ॥१॥
प्रजापतिर्यः प्रथमं जिजीविषुः शशास कृष्यादिषु कर्मसु प्रजाः ।
प्रबुद्धतत्त्वः पुनरद्भुतोदयो ममत्वतो निर्विविदे विदांवरः ॥२॥
विहाय यः सागरवारिवाससं वधूमिवेमां वसुधावधूं सतीम् ।
मुमुक्षुरिक्ष्वाकुकुलादिरात्मवान् प्रभुः प्रवव्राज सहिष्णुरच्युतः ॥३॥
स्वदोषमूलं स्वसमाधितेजसा निनाय यो निर्दयभस्मसात्क्रियाम् ।
जगाद तत्त्वं जगतेऽर्थिनेऽञ्जसा बभूव च ब्रह्मपदामृतेश्वरः ॥४॥
स विश्वचक्षुर्वृषभोऽर्चितः सतां समग्रविद्यात्मवपुर्निरञ्जनः ।
पुनातु चेतो मम नाभिनन्दनो जिनोऽजितक्षुल्लकवादि-
शासनः ॥५॥

॥ इत्यादिजिनस्तोत्रम् ॥

यस्य प्रभावात्त्रिदिवच्युतस्य क्रीडास्वपि क्षीवमुखारविन्दः । अजेयशक्तिर्भुवि बन्धुवर्गश्चकार नामाजित इत्यवन्ध्यम् ॥ ६॥ अद्यापि यस्याजितशासनस्य सतां प्रणेतुः प्रतिमङ्गलार्थम् । प्रगृह्यते नाम परं पवित्रं स्वसिद्धिकामेन जनेन लोके ॥ ७॥ यः प्रादुरासीत्प्रभुशक्तिभूम्ना भव्याशयालीनकलङ्कशान्त्यै । महामुनिर्मुक्तघनोपदेहो यथारविन्दाभ्युदयाय भास्वान् ॥ ८॥ येन प्रणीतं पृथु धर्मतीर्थं ज्येष्ठं जनाः प्राप्य जयन्ति दुःखम् । गाङ्गं ह्रदं चन्दनपङ्कशीतं गजप्रवेका इव घर्मतप्ताः ॥ ९॥ स ब्रह्मनिष्ठः सममित्रशत्रुर्विद्याविनिर्वान्तकषायदोषः । लब्धात्मलक्ष्मीरजितोऽजितात्मा जिनः श्रियं मे भगवान् विधत्ताम् ॥ १०॥

॥ इत्यजितजिनस्तोत्रम् ॥

त्वं शम्भवः संभवतर्षरोगैः संतप्यमानस्य जनस्य लोके । आसीरिहाकस्मिक एव वैद्यो वैद्यो यथा नाथ रुजां प्रशान्त्यै ॥ ११॥ अनित्यमत्राणमहंक्रियाभिः प्रसक्तमिथ्याध्यवसायदोषम् । इदं जगज्जन्मजरान्तकार्तं निरञ्जनां शान्तिमजीगमस्त्वम् ॥ १२॥ शतह्रदोन्मेषचलं हि सौख्यं तृष्णामयाप्यायनमात्रहेतुः । तृष्णाभिवृद्धिश्च तपत्यजस्रं तापस्तदायासयतीत्यवादीः ॥ १३॥ बन्धश्च मोक्षश्च तयोश्च हेतुर्बद्धश्च मुक्तश्च फलं च मुक्तेः । स्याद्वादिनो नाथ तवैव युक्तं नैकान्तदृष्टेस्त्वमतोऽसि शास्ता ॥ १४॥ शक्रोऽप्यशक्तस्तव पुण्यकीर्तेः स्तुत्यां प्रवृत्तः किमु मादृशोऽज्ञः । तथापि भक्त्या स्तुतपादपद्मो ममार्य देयाः

शिवतातिमुख्यं ॥१५॥

॥ इति शंभवजिनस्तोत्रम् ॥

गुणाभिनन्दादभिनन्दनो भवान् दयावधूं क्षान्तिसखीमशिश्रियत्। समाधितन्त्रस्तदुपोपपत्तये द्वयेन नैर्ग्रन्थ्यगुणेन चायुजत् ॥१६॥ अचेतने तत्कृतबन्धजेऽपि ममेदमित्याभिनिवेशकग्रहात्। प्रभङ्गुरे स्थावरनिश्चयेन च क्षतं जगत्तत्त्वमजिग्रहद्भवान् ॥१७॥ क्षुदादिदुःखप्रतिकारतः स्थितिर्न चेन्द्रियार्थप्रभवाल्पसौख्यतः। ततो गुणो नास्ति च देहदेहिनोरितीदमित्थं भगवान् व्यजिज्ञपत् ॥ १८ ॥ जनोऽतिलोलोऽप्यनुबंधदोषतो भयादकार्येष्विह न प्रवर्तते। इहाप्यमुत्राप्यनुबन्धदोषवित्कथं सुखे संसजतीति चाब्रवीत् ॥१९॥ स चानुबन्धोऽस्य जनस्य तापकृत्तृषोऽभिवृद्धिःसुखतो न च स्थितिः। इति प्रभो लोकहितं यतो मतं ततो भवानेव गतिः सतां मतः ॥२०॥

इत्यभिनन्दनजिनस्तोत्रम्।

अन्वर्थसंज्ञः सुमतिर्मुनिस्त्वं स्वयं मतं येन सुयुक्तिनीतम्। यतश्च शेषेषु मतेषु नास्ति सर्वक्रियाकारकतत्त्वसिद्धिः ॥२१॥ अनेकमेकं च तदेव तत्त्वं भेदान्वयज्ञानमिदं हि सत्यम्। मृषोपचारोऽन्यतरस्य लोपे तच्छेषलोपोऽपि ततोऽनुपाख्यम् ॥२२॥ सतः कथञ्चित्तदसत्त्वशक्तिः खे नास्ति पुष्पं तरुषु प्रसिद्धम्। सर्वस्वभावच्युतमप्रमाणं स्ववाग्विरुद्धं तव दृष्टितोऽन्यत् ॥२३॥ न सर्वथा नित्यमुदेत्यपैति न च क्रियाकारकमत्र युक्तम्।

नैवासतो जन्म सतो न नाशो दीपस्तमः पुद्गलभावतोऽस्ति ॥२४॥ विधिर्निषेधश्च कथंचिदिष्टौ विवक्षया मुख्यगुणव्यवस्था । इति प्रणीतिः सुमतेस्तवेयं मतिप्रवेकः स्तुवतोऽस्तु नाथ ॥२५॥

॥ इति सुमतिजिनस्तोत्रम् ॥

पद्मप्रभः पद्मपलाशलेश्यः पद्मालयालिङ्गितचारुमूर्तिः। बभौ भवान् भव्यपयोरुहाणां पद्माकराणामिव पद्मबन्धुः ॥२६॥ बभार पद्मां च सरस्वतीं च भवान्पुरस्तात्प्रतिमुक्तिलक्ष्म्याः। सरस्वतीमेव समग्रशोभां सर्वज्ञलक्ष्मीं ज्वलितां विमुक्तः ॥२७॥ शरीररश्मिप्रसरः प्रभोस्ते बालार्करश्मिच्छविरालिलेप । नरामराकीर्णसभां प्रभावच्छैलस्य पद्माभमणेः स्वसानुम् ॥२८॥ नभस्तलं पल्लवयन्निव त्वं सहस्रपत्राम्बुजगर्भचारैः। पादाम्बुजैः पातितमोहदर्पो भूमौ प्रजानां विजहर्थ भूत्यै ॥२९॥ गुणाम्बुधेर्विप्रुषमप्यजस्रं नाखण्डलः स्तोतुमलं तवर्षेः। प्रागेव मादृक्किमुतातिभक्तिर्मां बालमालापयतीदमित्थम् ॥३०॥

॥ इति पद्मप्रभस्तोत्रम् ॥

स्वास्थ्यं यदात्यन्तिकमेष पुंसां स्वार्थो न भोगः परिभङ्गुरात्मा । तृषोऽनुषङ्गान्न च तापशान्तिरितीदमाख्यद्भगवान् सुपार्श्वः ॥३१॥ अजङ्गमं जङ्गमनेययन्त्रं यथा तथा जीवधृतं शरीरम् । बीभत्सु पूति क्षयि तापकं च स्नेहो वृथात्रेति हितं त्वमाख्यः ॥३२॥ अलंघ्यशक्तिर्भवितव्यतेयं हेतुद्वयाविष्कृतकार्यलिंगा । अनीश्वरो जन्तुरहंक्रियार्त्तः संहत्य कार्येष्विति साध्व-

वादीः ॥३३॥ बिभेति मृत्योर्न ततोऽस्ति मोक्षो नित्यं शिवं वाञ्छति नास्य लाभः । तथापि बालो भयकामवश्यो वृथा स्वयं तप्यत इत्यवादीः ॥३४॥ सर्वस्य तत्त्वस्य भवान्प्रमाता मातेव बालस्य हितानुशास्ता । गुणावलोकस्य जनस्य नेता मयापि भक्त्या परिणूयसेऽद्य ॥३५॥

॥ इति सुपार्श्वजिनस्तोत्रम् ॥

चन्द्रप्रभं चन्द्रमरीचिगौरं चन्द्रं द्वितीयं जगतीव कान्तम् । वन्देऽभिवन्द्यं महतामृषीन्द्रं जिनं जितस्वान्तकषायबन्धम् ॥३६॥ यस्याङ्गलक्ष्मीपरिवेषभिन्नं तमस्तमोरेरिव रश्मिभिन्नम् । ननाश बाह्यं बहुमानसं च ध्यानप्रदीपातिशयेन भिन्नम् ॥३७॥ स्वपक्षसौस्थित्यमदावलिप्ता वाक्सिंहनादैर्विमदा बभूवुः । प्रवादिनो यस्य मदार्द्रगण्डा गजा यथा केशरिणो निनादैः ॥३८॥ यः सर्वलोके परमेष्ठितायाः पदं बभूवाद्भुतकर्मतेजाः । अनन्तधामाक्षरविश्वचक्षुः समन्तदुःखक्षयशासनश्च ॥३९॥ स चन्द्रमा भव्यकुमुद्वतीनां विपन्नदोषाभ्रकलङ्कलेपः । व्याकोशवाङ्न्यायमयूखमालः पूयात् पवित्रो भगवान्मनो मे ॥४०॥

॥ इति चन्द्रप्रभजिनस्तोत्रम् ।

एकान्तदृष्टिप्रतिषेधि तत्त्वं प्रमाणसिद्धं तदतत्स्वभावम् । त्वया प्रणीतं सुविधे स्वधाम्ना नैतत्समालीढपदं त्वदन्यैः ॥४१॥ तदेव च स्यान्न तदेव च स्यात्तथा प्रतीतेस्तव तत्कथञ्चित् । नात्यन्तमन्यत्वमनन्यता च विधेर्निषेधस्य च शून्यदोषात् ॥४२॥

नित्यं तदेवेदमिति प्रतीतेर्न नित्यमन्यत्प्रतिपत्तिसिद्धेः न तद्विरुद्धं बहिरन्तरङ्गनिमित्तनैमित्तिकयोगतस्ते ॥ ४३ ॥ अनेकमेकं च पदस्य वाच्यं वृक्षा इति प्रत्ययवत्प्रकृत्या । आकाङ्क्षिणः स्यादिति वै निपातो गुणानपेक्षे नियमेऽपवादः ॥४४॥ गुण-प्रधानार्थमिदं हि वाक्यं जिनस्य ते तद्द्विषतामपथ्यम् । ततोऽ-भिवन्द्यं जगदीश्वराणां ममापि साधोस्तव पादपद्मम् ॥ ४५ ॥

॥ इति सुविधिजिनस्तोत्रम् ॥

न शीतलाश्चन्दनचन्द्ररश्मयो न गांगमम्भो न च हारयष्टयः । यथा मुनेस्तेऽनघवाक्यरश्मयः शमाम्बुगर्भाः शिशिरा विपश्चितां ॥ ४६॥ सुखाभिलाषानलदाहमूर्च्छितं मनो निजं ज्ञानमयामृता-म्बुभिः । विदिध्यपस्त्वं विषदाहमोहितं यथा भिषग्मन्त्रगुणैः स्वविग्रहं ॥४७॥ स्वजीविते कामसुखे च तृष्णया दिवा श्रमार्ता निशि शेरते प्रजाः । त्वमार्य नक्तं दिवमप्रमत्तवानजागरेवात्मविशु-शुद्धवर्त्मनि ॥४८॥ अपत्यवित्तोत्तरलोकतृष्णया तपस्विनः केचन कर्म कुर्वते । भवान्पुनर्जन्मजराजिहासया त्रयीं प्रवृत्तिं शमधीर-वारुणत् ॥४९॥ त्वमुत्तमज्योतिरजः क्व निर्वृतः क्व ते परे बुद्धिलवोद्धवक्षताः । ततः स्वनिःश्रेयसभावनापरैर्बुधप्रवेकैर्जिन-शीतलेड्यसे ॥५०॥

॥ इति शीतलजिनस्तोत्रम् ॥

श्रेयान् जिनः श्रेयसि वर्त्मनीमाः श्रेयः प्रजाः शासदजेय-वाक्यः । भवांश्चकासे भुवनत्रयेऽस्मिन्नेको यथा वीतघनो विव-

स्वात् ॥ ५१ ॥ विधिर्विषक्तप्रतिषेधरूपः प्रमाणमत्रान्यतरत्प्रधानम् ।
गुणोऽपरो मुख्यनियामहेतुर्नयः सदृष्टान्तसमर्थनस्ते ॥५२।
विवक्षितो मुख्य इतीष्यतेऽन्यो गुणोऽविवक्षो न निरात्मकस्ते ।
तथारिमित्रानुभयादिशक्तिर्द्वयावधिः कार्यकरं हि वस्तु ॥५३॥
दृष्टान्तसिद्धावुभयोर्विवादे साध्यं प्रसिद्ध्येन्न तु तादृगस्ति ।
यत्सर्वथैकान्तनियामदृष्टं त्वदीयदृष्टिर्विभवत्यशेषे ॥५४॥ एका-
न्तदृष्टिप्रतिषेधसिद्धिर्न्यायेषुभिर्मोहरिपुं निरस्य । असिस्म
कैवल्यविभूतिसम्राट ततस्त्वमर्हन्नसि मे स्तवार्हः ॥५५॥

॥ इति श्रेयांसजिनस्तोत्रम् ॥

शिवासु पूज्योऽभ्युदयक्रियासु त्वं वासुपूज्यस्त्रिदशेन्द्रपूज्यः ।
मयापि पूज्योऽल्पधिया मुनीन्द्र दीपार्चिषा किं तपनो न पूज्यः
५६ ॥ न पूजयार्थस्त्वयि वीतरागे न निन्दया नाथ विवा-
न्तवैरे । तथापि ते पुण्यगुणस्मृतिर्नः पुनातु चित्तं दुरिता-
ञ्जनेभ्यः ॥५७॥ पूज्यं जिन त्वार्चयतो जनस्य सावद्यलेशो
बहुपुण्यराशौ । दोषाय नालं कणिका विषस्य न दूषिका शीत-
शिवाम्बुराशौ ॥५८॥ यद्वस्तु बाह्यं गुणदोषसूतेर्निमित्तमभ्य-
न्तरमूलहेतोः । अध्यात्मवृत्तस्य तदङ्गभूतमभ्यंतरं केवलमप्यलं
ते ॥५९॥ बाह्येतरोपाधिसमग्रतेयं कार्येषु ते द्रव्यगतः स्वभावः ।
नैवान्यथा मोक्षविधिश्च पुंसां तेनाभिवन्द्यस्त्वमृषिर्बुधानाम् ॥६०

॥ इति वासुपूज्यस्तोत्रम् ॥

य एव नित्यक्षणिकादयो नया मिथोऽनपेक्षाः स्वपरप्रणा-

शिनः । त एव तत्त्वं विमलस्य ते मुनेः परस्परेक्षाः स्वपरोपकारिणः ॥६१॥ अपेक्षकः कारकमर्थसिद्धये समीक्ष्य शेषं स्वसहायकारकम् । तथैव सामान्यविशेषमातृका नयास्तवेष्टा गुणमुख्यकल्पतः ॥६२॥ परस्परेक्षान्वयभेदलिङ्गतः प्रसिद्धसामान्यविशेषयोस्तव । समग्रतास्ति स्वपरावभासकं यथा प्रमाणं भुवि बुद्धिलक्षणम् ॥६३॥ विशेषवाच्यस्य विशेषणं वचो यतो विशेष्यं विनियम्यते च यत् । तयोश्च सामान्यमतिप्रसज्यते विवक्षितात्स्यादिति तेऽन्यवर्जनम् ॥६४॥ नयास्तव स्यात्पदसत्यलाञ्छिता रसोपविद्धा इव लोहधातवः । भवन्त्यभिप्रेतगुणा यतस्ततो भवन्तमार्याः प्रणता हितैषिणः ॥६५॥

॥ इति विमलजिनस्तोत्रम् ॥

अनन्तदोषाशयविग्रहो ग्रहो विषङ्गवान्मोहमयश्चिरं हृदि । यतो जितस्तत्त्वरुचौ प्रसीदता त्वया ततोऽभूर्भगवाननन्तजित् ॥६६॥ कषायनाम्नां द्विषतां प्रमाथिनामशेषयन्नाम भवानशेषवित् । विशोषणं मन्मथदुर्मदामयं समाधिभैषज्यगुणैर्व्यलीनयन् ॥६७॥ परिश्रमाम्बुर्भयवीचिमालिनी त्वया स्वतृष्णासरिदार्य शोषिता । असंगघर्मार्कगभस्तितेजसा परं ततो निर्वृतिधाम तावकम् ॥६८॥ सुहृत्त्वयि श्रीसुभगत्वमश्नुते द्विषंस्त्वयि प्रत्ययवत्प्रलीयते । भवानुदासीनतमस्तयोरपि प्रभो परं चित्रमिदं तवेहितम् ॥६९॥ त्वमीदृशस्तादृश इत्ययं मम प्रलापलेशोऽल्पमतेर्महामुने । अशेषमाहात्म्यमनीरयन्नपि शिवाय संस्पर्श इवामृताम्बुधेः ॥७०॥

॥ इति अनन्तजिनस्तोत्रम् ॥

धर्मतीर्थमनघं प्रवर्तयन् धर्म इत्यनुमतः सतां भवान् । कर्मकक्षमदहत्तपोऽग्निभिः शर्म शाश्वतमवाप शङ्करः ॥७१॥ देवमानवनिकायसत्तमै रेजिषे परिवृतो वृतो बुधैः । तारकापरिवृतोऽतिपुष्कलो व्योमनीव शशलाञ्छनोऽमलः ॥७२॥ प्रातिहार्यविभवैः परिष्कृतो देहतोऽपि विरतो भवानभूत् । मोक्षमार्गमशिषन्नरामराजापि शासनफलैषणातुरः ॥८३॥ कायवाक्यमनसां प्रवृत्तयो नाऽभवंस्तव मुनेश्चिकीर्षया । नासमीक्ष्य भवतः प्रवृत्तयो धीर तावकमचिन्त्यमीहितम् ॥७४॥ मानुषीं प्रकृतिमभ्यतीतवान् देवतास्वपि च देवता यतः । तेन नाथ परमासि देवता श्रेयसे जिनवृष प्रसीद नः ॥७५॥

॥ इति धर्मजिनस्तोत्रम् ॥

विधाय रक्षां परितः प्रजानां राजा चिरं योऽप्रतिमप्रतापः । व्यधात्पुरस्तात्स्वत एव शांतिर्मुनिर्दयामूर्तिरिवाघशान्तिम् ॥७६॥ चक्रेण यः शत्रुभयंकरेण जित्वा नृपः सर्वनरेन्द्रचक्रम् । समाधिचक्रेण पुनर्जिगाय महोदयो दुर्जयमोहचक्रम् ॥७७॥ राजश्रिया राजसु राजसिंहो रराज यो राजसुभोगतन्त्रः । आर्हन्त्यलक्ष्म्या पुनरात्मतन्त्रो देवासुरोदारसभे रराज ॥७८॥ यस्मिन्नभूद्राजनि राजचक्रं मुनौ दयादीधितिधर्मचक्रम् । पूज्ये मुहुः प्राञ्जलि देवचक्रं ध्यानोन्मुखे ध्वंसि कृतान्तचक्रम् ॥७९॥ स्वदोषशान्त्या-विहितात्मशान्तिः शान्तेर्विधाता शरणं गतानाम् । भूयाद्भवक्लेश-

भयोपशान्त्यै शान्तिर्जिनो मे भगवान् शरण्यः ॥८०॥

॥ इति शान्तिजिनस्तोत्रम् ॥

कुन्थु प्रभृत्यखिलसत्त्वदयैकतानः कुन्थुर्जिनो ज्वरजरामरणोपशान्त्यै । त्वं धर्मचक्रमिह वर्तयसि स्म भूत्यै भूत्वा पुरा क्षितिपतीश्वरचक्रपाणिः॥८१॥ तृष्णार्चिषः परिदहन्ति न शान्तिरासामिष्टेन्द्रियार्थविभवैः परिवृद्धिरेव । स्थित्यैव कायपरितापहरं निमित्तमित्यात्मवान्विषयसौख्यपराङ्मुखोऽभूत् ॥ ८२ ॥ बाह्यं तपः परमदुश्चरमाचरंस्त्वमाध्यात्मिकस्य तपसः परिबृंहणार्थम् । ध्यानं निरस्य कलुषद्वयमुत्तरेऽस्मिन् ध्यानद्वये ववृतिषेऽतिशयोपपन्ने ॥८३॥ हुत्वा स्वकर्मकटुकप्रकृतीश्चतस्रो रत्नत्रयातिशयतेजसि जातवीर्यः । विभ्राजिषे सकलवेदविधेर्विनेता व्यभ्रे यथा वियति दीप्तरुचिर्विवस्वान् ॥८४॥ यस्मान्मुनीन्द्र तव लोकपितामहाद्या विद्याविभूतिकणिकामपि नाप्नुवन्ति । तस्माद्भवन्तमजमप्रतिमेयमार्याः स्तुत्यं स्तुवन्ति सुधियः स्वहितैकतानाः ॥ ८५ ॥

॥ इति कुन्थुजिनस्तोत्रम् ॥

गुणस्तोकं सदुल्लङ्घ्य तद्बहुत्वकथा स्तुतिः । आनन्त्यात्ते गुणा वक्तुमशक्यास्त्वयि सा कथम् ॥ ८६ ॥ तथापि ते मुनीन्द्रस्य यतो नामापि कीर्तितम् । पुनाति पुण्यकीर्तेर्नस्ततो ब्रूयाम किंचन ॥ ८७ ॥ लक्ष्मीविभवसर्वस्वं मुमुक्षोश्चक्रलाञ्छनम् । साम्राज्यं सार्वभौमं ते जरत्तृणमिवाभवत् ॥ ८८ ॥ तव रूपस्य सौन्दर्यं दृष्ट्वा तृप्तिमनापिवान् । द्व्यक्षः शक्रः सहस्राक्षो बभूव

बहुविस्मयः ॥ ८६ ॥ मोहरूपो रिपुः पापः कषायभटसाधनः । दृष्टिसम्पदुपेक्षास्त्रैस्त्वया धीर पराजितः ॥ ६० ॥ कन्दर्पस्योद्धरो दर्पस्त्रैलोक्यविजयार्जितः । ह्रेपयामास तं धीरे त्वयि प्रतिहतोदयः ॥६१॥ आयत्यां च तदात्वे च दुःखयोनिर्निरुत्तरा । तृष्णा नदी त्वयोत्तीर्णा विद्यानावा विविक्तया ॥६२॥ अन्तकः क्रन्दको नृणां जन्मज्वरसखा सदा । त्वामन्तकान्तकं प्राप्य व्यावृत्तः कामकारतः । ६३ ॥ भूषावेषायुधत्यागि विद्यादमदयापरम् । रूपमेव तवाचष्टे धीरदोषविनिग्रहम् ॥ ६४ ॥ समन्ततोऽङ्गभासां ते परिवेषेण भूयसा । तमो बाह्यमपाकीर्णमध्यात्मध्यानतेजसा ॥६५॥ सर्वज्ञज्योतिषोद्भूतस्तावको महिमोदयः । कं न कुर्यात् प्रणम्रं ते सत्त्वं नाथ सचेतनम् ॥ ६६ ॥ तव वागमृतं श्रीमत्सर्वभाषास्वभावकम् । प्रीणयत्यमृतं यद्वत् प्राणिनो व्यापि संसदि ॥ ६७ ॥ अनेकान्तात्मदृष्टिस्ते सती शून्यो विपर्ययः । ततः सर्वं मृषोक्तं स्यात्तदयुक्तं स्वघाततः ॥ ६८ ॥ ये परस्खलितोन्निद्राः स्वदोषेभनिमीलिनः । तपस्विनस्ते किं कुर्युरपात्रं त्वन्मतश्रियः ॥ ६६ ॥ ते तं स्वघातिनं दोषं शमीकर्तुमनीश्वराः । त्वद्द्विषः स्वहनो बालास्तत्त्वावक्तव्यतां श्रिताः ॥ १०० ॥ सदेकनित्यवक्तव्यास्तद्विपक्षाश्च ये नयाः । सर्वथेति प्रदुष्यन्ति पुष्यन्ति स्यादितीहिते ॥ १०१ ॥ सर्वथा नियमत्यागी यथादृष्टमपेक्षकः । स्याच्छब्दस्तावके न्याये नान्येषामात्मविद्विषाम् ॥ १०२ ॥ अनेकान्तोऽप्यनेकान्तः प्रमाण-

नयसाधनः। अनेकान्तः प्रमाणात्ते तदेकान्तोऽर्पितान्नयात् ॥१०३॥ इति निरुपमयुक्तिशासनः प्रियहितयोगगुणानुशासनः। अरजिनदमतीर्थनायकस्त्वमिव सतां प्रतिबोधनायकः ॥ १०४ ॥ मतिगुणविभवानुरूपतस्त्वयि वरदागमदृष्टिरूपतः। गुणकृशमपि किञ्चिनोदितं मम भवताद्दुरिताशनोदितम् ॥ १०५ ॥

॥ इत्यरजिनस्तोत्रम् ॥

यस्य महर्षेः सकलपदार्थप्रत्यवबोधः समजनि साक्षात्। सामरमर्त्यं जगदपि सर्वं प्राञ्जलि भूत्वा प्रणिपतति स्म ॥१०६॥ यस्य च मूर्तिः कनकमयीव स्वस्फुरदाभाकृतपरिवेषा। वागपि तत्त्वं कथयितुकामा स्यात्पदपूर्वा रमयति साधून् ॥१०७॥ यस्य पुरस्ताद्विगलितमाना न प्रतितीर्थ्या भुवि विवदन्ते। भूरपि रम्या प्रतिपदमासीज्जातविकोशाम्बुजमृदुहासा ॥१०८॥ यस्य समन्ताज्जिनशिशिरांशोः शिष्यकसाधुग्रहविभवोऽभूत्। तीर्थमपि स्वं जननसमुद्रत्रासितसत्त्वोत्तरणपथोऽग्रम् ॥१०९॥ यस्य च शुक्लं परमतपोऽग्निर्ध्यानमनन्तं दुरितमधाक्षीत्। तं जिनसिंहं कृतकरणीयं मल्लिमशल्यं शरणमितोऽस्मि ॥ ११० ॥

॥ इति मल्लिजिनस्तोत्रम् ॥

अधिगतमुनिसुव्रतस्थितिर्मुनिवृषभो मुनिसुव्रतोऽनघः। मुनिपरिषदि निर्बभौ भवानुडुपरिषत्परिवीतसोमवत् ॥ १११ ॥ परिणतशिखिकण्ठरागया कृतमदनिग्रहविग्रहाभया। तव जिन तपसः प्रसूतया ग्रहपरिवेषरुचेव शोभितम् ॥ ११२ ॥ शशिरुचिशुचि-

शुक्ललोहितं सुरभितरं विरजो निजं वपुः । तव शिवमतिविस्मयं यते यदपि च वाङ्मनसोऽयमीहितम् ॥ ११३ ॥ स्थितिजनन-निरोधलक्षणं चरमचरं च जगत्प्रतिलक्षणम् । इति जिनसकलज्ञ-लाञ्छनं वचनमिदं वदतां वरस्य ते ॥ ११४ ॥ दुरितमलकलङ्क-मष्टकं निरुपमयोगबलेन निर्दहन् । अभवदभवसौख्यवान् भवान् भवतु ममापि भवोपशान्तये ॥ ११५ ॥

॥ इति मुनिसुव्रतजिनस्तोत्रम् ॥

स्तुतिः स्तोतुः साधोः कुशलपरिणामाय स तदा । भवेन्मा वा स्तुत्यः फलमपि ततस्तस्य च सतः किमेवं स्वाधीनाज्जगति सुलभे श्रायसपथे । स्तुयान्नत्वा विद्वान्सततमभिपूज्यं नमि-जिनम् ॥ ११६ ॥ त्वया धीमन् ब्रह्मप्रणिधिमनसा जन्मनिगलं । समूलं निर्भिन्नं त्वमसि विदुषां मोक्षपदवी ॥ त्वयि ज्ञानज्योति-र्विभवकिरणैर्भाति भगवन् । अभूवन् खद्योता इव शुचिरिवावन्य-मतयः ॥ ११७ ॥ विधेयं वार्यं चानुभयमुभयं मिश्रमपि तत् । विशेषैः प्रत्येकं नियमविषयैश्चापरिमितैः ॥ सदान्योन्यापेक्षैः सकलभुवनज्येष्ठगुरुणा । त्वया गीतं तत्त्वं बहुनयविवक्षेतरवशात् ॥ ११८ ॥ अहिंसा भूतानां जगति विदितं ब्रह्म परमं । न सा तत्रारम्भोऽस्त्यणुरपि च यत्राश्रमविधौ ॥ ततस्तत्सिद्ध्यर्थं परमक-रुणो ग्रन्थमुभयं । भवानेवात्याक्षीन्न च विकृतवेषोपधिरतः ॥११९॥ वपुर्भूषावेषव्यवधिरहितं शान्तिकरणं । यतस्ते संचष्टे स्मरशरविषा-तङ्कविजयम् ॥ विना भीमैः शस्त्रैरदयहृदयामर्षविलयं । ततस्त्वं

निर्मोहः शरणमसि नः शान्तिनिलयः ॥ १२० ॥

॥ इति नमिजिनस्तोत्रम् ॥

भगवानृषिः परमयोगदहनहुतकल्मषेन्धनम् । ज्ञानविपुलकिरणैः सकलं प्रतिबुध्य बुद्धः कमलायतेक्षणः ॥ १२१ ॥ हरिवंशकेतुरनवद्यविनयदमतीर्थनायकः । शीलजलधिरभवो विभवस्त्वमरिष्टनेमिजिनकुञ्जरोऽजरः ॥ १२२ ॥ त्रिदशेन्द्रमौलिमणिरत्नकिरणविसरोपचुम्बितम् । पादयुगलममलं भवतो विकसत्कुशेशयदलारुणोदरम् ॥ १२३ ॥ नखचन्द्ररश्मिकवचातिरुचिरशिखराङ्गुलिस्थलम् । स्वार्थनियतमनसः सुधियः प्रणमन्ति मन्त्रमुखरा महर्षयः ॥ १२४ ॥ द्युतिमद्रथाङ्गरविबिम्बकिरणजटिलांशुमण्डलः । नीलजलदजलराशिवपुः सहबन्धुभिर्गरुडकेतुरीश्वरः ॥१२५॥ हलभृच्च ते स्वजनभक्तिमुदितहृदयौ जनेश्वरौ । धर्मविनयरसिकौ सुतरां चरणारविन्दयुगलं प्रणेमतुः ॥१२६॥ ककुदं भुवः खचरयोषिदुषितशिखरैरलंकृतः । मेघपटलपरिवीततटस्तव लक्षणानि लिखितानि वज्रिणा ॥ १२७ ॥ वहतीति तीर्थमृषिभिश्च सततमभिगम्यतेऽद्य च । प्रीतिविततहृदयैः परितो भृशमूर्ज्जयन्त इति विश्रुतोऽचलः ॥ १२८ ॥ बहिरन्तरप्युभयथा च करणमविघाति नार्थकृत् । नाथ युगपदखिलं च सदा त्वमिदं तलामलकवद्विवेदिथ ॥ १२९ ॥ अत एव ते बुधनुतस्य चरितगुणमद्भुतोदयम् । न्यायविहितमवधार्य जिने त्वयि सुप्रसन्नमनसः स्थिता वयं ॥ १३० ॥

॥ इत्यरिष्टनेमिजिनस्तोत्रम् ॥

तमालनीलैः सधनुस्तडिद्गुणैः प्रकीर्णभीमाशनिवायुवृष्टिभिः। बलाहकैर्वैरिवशैरुपद्रुतो महामना यो न चचाल योगतः ॥१३१॥ बृहत्फणामण्डलमण्डपेन यं स्फुरत्तडित्पिङ्गरुचोपसर्गिणम्। जुगूह नागो धरणो धराधरं विरागसन्ध्यातडिदम्बुदो यथा॥ १३२ ॥ स्वयोगनिस्त्रिंशनिशातधारया निशात्य यो दुर्जयमोहविद्विषम्। अवापदार्हन्त्यमचिन्त्यमद्भुतं त्रिलोकपूजातिशयास्पदं पदम् ॥१३३॥ यमीश्वरं वीक्ष्य विधूतकल्मषं तपोधनास्तेऽपि तथा बुभूषवः। वनौकसः स्वश्रमवन्ध्यबुद्धयः शमोपदेशं शरणं प्रपेदिरे ॥ १३४ ॥ स सत्यविद्यातपसां प्रणायकः समग्रधीरुग्र-कुलाम्बरांशुमान्। मया सदा पार्श्वजिनः प्रणम्यते विलीन-मिथ्यापथदृष्टिविभ्रमः ॥ १३५ ॥

॥ इति पार्श्वजिनस्तोत्रम् ॥

कीर्त्या भुवि भासि तया वीर त्वं गुणसमुच्छ्रया भासितया। भासोडुसभासितया सोम इव व्योम्नि कुन्दशोभासितया ॥१३६॥ तव जिन शासनविभवो जयति कलावपि गुणानुशासनविभवः। दोषकशासनविभवः स्तुवन्ति चैनं प्रभाकृशासनविभवः ॥१३७॥ अनवद्यः स्याद्वादस्तव दृष्टेष्टाविरोधतः स्याद्वादः। इतरो न स्याद्वादो सद्वितयविरोधान्मुनीश्वराऽस्याद्वादः ॥१३८॥ त्वमसि सुरासुरमहितो ग्रन्थिकसत्त्वाशयप्रणामामहितः। लोकत्रयपरम-हितोऽनावरणज्योतिरुज्ज्वलधामहितः ॥ १३९ ॥ सभ्यानामभिरु-

चितं दधासि गुणभूषणं श्रिया चारुचितम्। मग्नं स्वस्यां रुचिरं जयसि च मृगलांछनं स्वकान्त्या रुचिरम् ॥१४०॥ त्वं जिन गतमदमायस्तव भावानां मुमुक्षुकामद मायः। श्रेयान् श्रीमदमाय-स्त्वया समादेशि सप्रयामदमायः ॥१४१॥ गिरिभित्त्यवदान-वतः श्रीमत इव दन्तिनः स्रवद्दानवतः। तव शमवादानवतो गतः मूर्जितमपगतप्रमादानवतः ॥ १४२ ॥

बहुगुणसंपदसकलं परमतमपि मधुरवचनविन्यासकलम्। नयभक्त्यवतंसकलं तव देव मतं समन्तभद्रं सकलम् ॥१४३॥

। इति वीरजिनस्तोत्रम्।

यो निःशेषजिनोक्तधर्मविषयः श्रीगौतमाद्यैः कृतः। सूक्तार्थैरमलैः स्तवो-ऽयमसमः स्वल्पैः प्रसन्नैः पदैः॥ तद्व्याख्यानमदो यथा ह्यवगतः किंचिन्मया लेशतः। स्थेयाश्चन्द्रदिवाकरावधि बुधप्रह्लाददचेतस्यलम् ॥ १४४ ॥

॥ इति बृहत्स्वयम्भूस्तोत्रं समाप्तम्॥

श्रीसमन्तभद्रस्वामिविरचिता

२ आप्तमीमांसा।

देवागमनभोयानचामरादिविभूतयः। मायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महान् ॥ १ ॥ अध्यात्मं बहिरप्येष विग्रहादि-महोदयः। दिव्यः सत्यो दिवौकस्स्वप्यस्ति रागादिमत्सु सः॥२॥ तीर्थंकृत्समयानां च परस्परविरोधतः। सर्वेषामाप्तता नास्ति कश्चिदेव भवेद्गुरुः ॥ ३ ॥ दोषावरणयोर्हानिर्निःशेषाऽस्त्यतिशायनात्।

कचिद्यथा स्वहेतुभ्यो वहिरन्तर्मलक्षयः ॥४॥ सूक्ष्मान्तरितदूरार्थाः प्रत्यक्षाः कस्यचिद्यथा । अनुमेयत्वतोऽग्न्यादिरिति सर्वज्ञ-संस्थितिः ॥ ५ ॥ स त्वमेवासि निर्दोषो युक्तिशास्त्राविरोधिवाक् । अविरोधो यदिष्टं ते प्रसिद्धेन न बाध्यते । ६ ॥ त्वन्मतामृत-बाह्यानां सर्वथैकान्तवादिनाम् । आप्ताभिमानदग्धानां स्वेष्टं दृष्टेन बाध्यते ॥ ७ ॥ कुशलाकुशलं कर्म परलोकश्च न क्वचित् । एकान्तग्रहरक्तेषु नाथ स्वपरवैरिषु ॥ ८ ॥ भावैकान्ते पदार्थानाम-भावानामपह्नवात् । सर्वात्मकमनाद्यन्तमस्वरूपमतावकम् ॥ ९ ॥ कार्यद्रव्यमनादि स्यात्प्रागभावस्य निह्नवे । प्रध्वंसस्य च धर्मस्य प्रच्यवेऽनन्ततां व्रजेत् १० ॥ सर्वात्मकं तदेकं स्यादन्यापोह-व्यतिक्रमे । अन्यत्र समवायेन व्यपदिश्येत सर्वथा ॥ ११ ॥ अभावैकान्तपक्षेऽपि भावापह्नववादिनाम् । बोधवाक्यं प्रमाणं न केन साधनदूषणम् ॥ १२ ॥ विरोधान्नोभयैकात्म्यं स्याद्वादन्याय-विद्विषाम् । अवाच्यतैकान्तेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ १३॥ कथञ्चित्ते सदेवेष्टं कथञ्चिदसदेव तत् । तथोभयमवाच्यं च नययोगान्न सर्वथा ॥ १४ ॥ सदेव सर्वं को नेच्छेत् स्वरूपादि-चतुष्टयात् । असदेव विपर्यासान्न चेन्न व्यवतिष्ठते ॥ १५ ॥ क्रमार्पितद्वयाद् द्वैतं सहावाच्यमशक्तितः । अवक्तव्योत्तराः शेषास्त्रयो भङ्गाः स्वहेतुतः ॥ १६ ॥ अस्तित्वं प्रतिषेध्येनाविना-भाव्येकधर्मिणि । विशेषणत्वात्साधर्म्यं यथा भेदविवक्षया ॥ १७॥ नास्तित्वं प्रतिषेध्येनाविनाभाव्येकधर्मिणि । विशेषणत्वाद्वैधर्म्यं

यथाऽभेदविवक्षया ॥ १८ ॥ विधेयप्रतिषेध्यात्मा विशेष्यः शब्द-गोचरः । साध्यधर्मो यथा हेतुरहेतुश्चाप्यपेक्षया ॥ १९ ॥ शेषभङ्गाश्च नेतव्या यथोक्तनययोगतः । न च कश्चिद्विरोधोऽस्ति मुनीन्द्र तव शासने ॥ २० ॥ एवं विधिनिषेधाभ्यामनवस्थित-मर्थकृत् । नेति चेन्न यथाकार्यं बहिरन्तरुपाधिभिः ॥ २१ ॥ धर्मे धर्मेऽन्य एवार्थो धर्मिणोऽनन्तधर्मणः । अङ्गित्वेऽन्यतमान्तस्य शेषान्तानां तदङ्गता ॥ २२ ॥ एकानेकविकल्पादावुत्तरत्रापि योजयेत् । प्रक्रियां भङ्गिनीमेनां नयैर्नयविशारदः ॥ २३ ॥ अद्वैतैकान्तपक्षेऽपि दृष्टो भेदो विरुध्यते । कारकाणां क्रियायाश्च नैकं स्वस्मात्प्रजायते ॥ २४ ॥ कर्मद्वैतं फलद्वैतं लोकद्वैतं च नो भवेत् । विद्याऽविद्याद्वयं न स्यात् बन्धमोक्षद्वयं तथा ॥२५॥ हेतोरद्वैतसिद्धिश्चेद् द्वैतं स्याद्धेतुसाध्ययोः । हेतुना चेद्विना सिद्धिर्द्वैतं वाङ्मात्रतो न किम् ॥ २६ ॥ अद्वैतं न विना द्वैतादहेतुरिव हेतुना । संज्ञिनः प्रतिषेधो न प्रतिषेध्यादृते क्वचित् ॥ २७ पृथक्त्वैकान्तपक्षेऽपि पृथक्त्वादपृथक्तु तौ । पृथक्त्वे न पृथक्त्वं स्यादनेकस्थो ह्यसौ गुणः ॥ २८ ॥ सन्तानः समुदायश्च साधर्म्यं च निरङ्कुशः । प्रेत्यभावश्च तत्सर्वं न स्यादेकत्वनिह्नवे २९ ॥ सदात्मना च भिन्नं चेत् ज्ञानं ज्ञेयाद्द्विधाऽप्यसत् । ज्ञानाभावे कथं ज्ञेयं बहिरन्तश्च ते द्विषाम् ॥ ३० ॥ सामान्यार्था गिरोऽन्येषां विशेषो नाभिलप्यते । सामान्याभावतस्तेषां मृषैव सकला गिरः ॥ ३१ ॥ विरोधान्नो-

मयैकात्म्यं स्याद्वादन्यायविद्विषाम् । अवाच्यतैकान्तेऽप्युक्तिर्नावाच्यमिति युज्यते ॥३२॥ अनपेक्षे पृथक्त्वैक्ये ह्यवस्तुद्वयहेतुतः । तदेवैक्यं पृथक्त्वं च स्वभेदः साधनं यथा ॥ ३३ ॥ सत्सामान्यात्तु सर्वैक्यं पृथग् द्रव्यादिभेदतः । भेदाभेदविवक्षायामसाधारणहेतुवत् । ३४ । विवक्षा चाविवक्षा च विशेष्येऽनन्तधर्मिणि । सतो विशेषणस्यात्र नासतस्तैस्तदर्थिभिः ॥ ३५ ॥ प्रमाणगोचरौ सन्तौ भेदाभेदौ न संवृती । तावेकत्राविरुद्धौ ते गुणमुख्यविवक्षया ॥ ३६ ॥ नित्यत्वैकान्तपक्षेऽपि विक्रिया नोपपद्यते । प्रागेव कारकाभावः क्व प्रमाणं क्व तत्फलम् ॥३७॥ प्रमाणकारकैर्व्यक्तं व्यक्तं चेदिन्द्रियार्थवत् । ते च नित्ये विकार्यं किं साधोस्ते शासनाद्बहिः ॥ ३८ ॥ यदि सत्सर्वथा कार्यं पुंवन्नोत्पत्तुमर्हति । परिणामप्रक्लृप्तिश्च नित्यत्वैकान्तबाधिनी ॥ ३९ ॥ पुण्यपापक्रिया न स्यात् प्रेत्यभावः फलं कुतः । बन्धमोक्षौ च तेषां न येषां त्वं नासि नायकः ॥ ४० ॥ क्षणिकैकान्तपक्षेऽपि प्रेत्यभावाद्यसम्भवः । प्रत्यभिज्ञाद्यभावान्न कार्यारम्भः कुतः फलम् ॥ ४१ ॥ यद्यसत्सर्वथा कार्यं तन्माजनि खपुष्पवत् मोपादाननियामो भून्माऽऽश्वासः कार्यजन्मनि ॥ ४२ ॥ न हेतुफलभावादिरन्यभावादनन्वयात् । सन्तानान्तरवन्नैकः सन्तानस्तद्वतः पृथक् ॥ ४३ ॥ अन्येष्वनन्यशब्दोऽयं संवृतिर्न मृषा कथम् । मुख्यार्थः संवृतिर्नास्ति विना मुख्यान्न संवृतिः ॥ ४४ ॥ चतुष्कोटेर्विकल्पस्य सर्वान्तेषूक्त्ययोगतः । तत्त्वान्यत्वमवाच्यं च

तयोः सन्तानतद्वतोः ॥ ४५ । अवक्तव्यचतुष्कोटिविकल्पोऽपि न कथ्यताम् । असर्वान्तमवस्तु स्यादविशेष्यविशेषणम् ॥ ४६ ॥ द्रव्याद्यन्तरभावेन निषेधः संज्ञिनः सतः । असद्भेदो न भावस्तु स्थानं विधिनिषेधयोः ॥ ४७ ॥ अवस्त्वनभिलाप्यं स्यात् सर्वान्तैः परिवर्जितम् । वस्त्वेवावस्तुतां याति प्रक्रियाया विपर्ययात् ॥ ४८ ॥ सर्वान्ताश्चेदवक्तव्यास्तेषां किं वचनं पुनः । संवृतिश्चेन्मृषैवैषा परमार्थविपर्ययात् ॥ ४९ ॥ अशक्यत्वादवाच्यं किमभावात्किमबोधतः । आद्यन्तोक्तिद्वयं न स्यात् किं व्याजेनोच्यतां स्फुटम् ॥ ५० ॥ हिनस्त्यनभिसन्धातृ न हिनस्त्यभिसन्धिमत् । बध्यते तद्द्वयापेतं चित्तं बद्धं न मुच्यते ॥ ५१ ॥ अहेतुकत्वान्नाशस्य हिंसाहेतुर्न हिंसकः । चित्तसन्ततिनाशश्च मोक्षो नाष्टाङ्गहेतुकः ॥ ५२ ॥ विरूपकार्यारम्भाय यदि हेतुसमागमः । आश्रयिभ्यामनन्योऽसावविशेषादयुक्तवत् ॥ ५३ ॥ स्कन्धाः सन्ततयश्चैव संवृतित्वादसंस्कृताः । स्थित्युत्पत्तिव्ययास्तेषां न स्युः खरविषाणवत् ॥ ५४ ॥ विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषाम् । अवाच्यतैकान्तेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ५५ ॥ नित्यं तत् प्रत्यभिज्ञानान्नाकस्मात्तदविच्छिदा । क्षणिकं कालभेदात्ते बुद्ध्यसञ्चरदोषतः ॥ ५६ ॥ न सामान्यात्मनोदेति न व्येति व्यक्तमन्वयात् । व्येत्युदेति विशेषात्ते सहैकत्रोदयादि सत् ॥ ५७ ॥ कार्योत्पादः क्षयो हेतोर्नियमाल्लक्षणात्पृथक् । न तौ जात्याद्यवस्थानादनपेक्षाः खपुष्पवत् ॥ ५८ ॥ घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम् ।

शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥ ५९ ॥ पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः । अगोरसव्रतो नोभे तस्मात्तत्त्वं त्रयात्मकम् ॥ ६० ॥ कार्यकारणनानात्वं गुणगुण्यन्यताऽपि च । सामान्यतद्वदन्यत्वं चैकान्तेन यदीष्यते ॥ ६१ ॥ एकस्यानेकवृत्तिर्न भागाभावाद्बहूनि वा । भागित्वाद्वाऽस्य नैकत्व दोषो वृत्तेरनार्हते ॥ ६२ ॥ देशकालविशेषेऽपि स्याद्वृत्तिर्युतसिद्धवत् । समानदेशता न स्यात मूर्तकारणकार्ययोः ॥ ६३ ॥ आश्रयाश्रयिभावान्न स्वातन्त्र्यं समवायिनाम् । इत्ययुक्तः स सम्बन्धो न युक्तः समवायिभिः ॥ ६४ ॥ सामान्यं समवायश्चाप्येकैकत्र समाप्तितः । अन्तरेणाश्रयं न स्यान्नाशोत्पादिषु को विधिः ॥६५॥ सर्वथाऽनभिसम्बन्धः सामान्यसमवाययोः । ताभ्यामर्थो न सम्बद्धस्तानि त्रीणि खपुष्पवत् ६६। अनन्यतैकान्तेऽणूनां सङ्घातेऽपि विभागवत् । असंहतत्वं स्याद्भूतचतुष्कं भ्रान्तिरेव सा ॥६७॥ कार्यभ्रान्तेरणुभ्रान्तिः कार्यलिङ्गं हि कारणम् । उभयाभावतस्तत्स्थं गुणजातीतरच्च न ।६८। एकत्वेऽन्यतराभावः शेषाभावोऽविनाभुवः । द्वित्वसंख्याविरोधश्च संवृतिश्चेन्मृषैव सा ॥ ६९ ॥ विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषाम् । अवाच्यतैकान्तेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ७० ॥ द्रव्यपर्याययोरैक्यं तयोरव्यतिरेकतः । परिणामविशेषाच्च शक्तिमच्छक्तिभावतः ॥ ७१ ॥ संज्ञासंख्याविशेषाच्च स्वलक्षणविशेषतः । प्रयोजनादिभेदाच्च तन्नानात्वं न सर्वथा ॥ ७२ ॥ यद्यापेक्षिकसिद्धिः स्यान्न द्वयं व्यवतिष्ठते ।

अनापेक्षिकसिद्धौ च न सामान्यविशेषता ॥ ७३ ॥ विरोधान्नो भयैकात्म्यं स्याद्वादन्यायविद्विषाम् । अवाच्यतैकान्तेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ७४ ॥ धर्मधर्म्यविनाभावः सिध्यत्यन्योऽन्यवीक्षया । न स्वरूपं स्वतो ह्येतत् कारकज्ञापकाङ्गवत् ॥७५॥ सिद्धं चेद्धेतुतः सर्वं न प्रत्यक्षादितो गतिः । सिद्धं चेदागमात्सर्वं विरुद्धार्थमतान्यपि ॥ ७६ ॥ विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषाम् । अवाच्यतैकान्तेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ७७ ॥ वक्तर्यनाप्ते यद्धेतोः साध्यमागमसाधितम् ॥७८॥ अन्तरङ्गार्थतैकान्ते बुद्धिवाक्यं मृषाऽखिलम् ॥ प्रमाणाभासमेवातस्तत्प्रमाणादृते कथम् ॥ ७९ ॥ साध्यसाधनविज्ञप्तेर्यदि विज्ञप्तिमात्रता । न साध्यं न च हेतुश्च प्रतिज्ञाहेतुदोषतः ॥ ८० ॥ बहिरङ्गार्थतैकान्ते प्रमाणाभासनिह्नवात् । सर्वेषां कार्यसिद्धिः स्याद्विरुद्धार्थाभिधायिनाम् ॥ ८१ ॥ विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषाम् । अवाच्यतैकान्तेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ८२ ॥ भावप्रमेयापेक्षायां प्रमाणाभासनिह्नवः । बहिःप्रमेयापेक्षायां प्रमाणं तन्निभं च ते ॥ ८३ ॥ जीवशब्दः सबाह्यार्थः संज्ञात्वाद्धेतुशब्दवत् । मायादिभ्रान्तिसंज्ञाश्च मायाद्यैः स्वैः प्रमोक्तिवत् ॥ ८४ ॥ बुद्धिशब्दार्थसंज्ञास्तास्तिस्रो बुद्ध्यादिवाचिकाः । तुल्या बुद्ध्यादिबोधाश्च त्रयस्तत्प्रतिबिम्बकाः ॥ ८५ ॥ वक्तृश्रोतृप्रमातॄणां वाक्यबोधप्रमाः पृथक् । भ्रान्तावेव प्रमाभ्रान्तौ बाह्यार्थौ तादृशेतरौ ॥ ८६ ॥ बुद्धिशब्दप्रमाणत्वं वाक्यबोधप्रमाः पृथक् । सत्यानृतव्यवस्थैवं युज्यतेऽर्थ-

प्त्यनाप्तिषु ॥ ८७ ॥ दैवादेवार्थसिद्धिश्चेद्दैवं पौरुषतः कथम्।
दैवतश्चेदनिर्मोक्षः पौरुषं निष्फलं भवेत् ॥ ८८ ॥ पौरुषादेव
सिद्धिश्चेत् पौरुषं दैवतः कथम्। पौरुषाच्चेदमोघं स्यात् सर्व-
प्राणिषु पौरुषम् ॥ ८९ ॥ विरोधान्नोभयैकात्म्यं स्याद्वादन्याय
विद्विषाम्। अवाच्यतैकान्तेऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ९० ॥
अबुद्धिपूर्वापेक्षायामिष्टानिष्टं स्वदैवतः। बुद्धिपूर्वव्यपेक्षायामिष्टा-
निष्टं स्वपौरुषात् ॥ ९१ ॥ पापं ध्रुवं परे दुःखात्
पुण्यं च सुखतो यदि। अचेतनाकषायौ च बध्येयातां
निमित्ततः ॥ ९२ ॥ पुण्यं ध्रुवं स्वतो दुःखात्पापं च सुखतो
यदि। वीतरागो मुनिर्विद्वांस्ताभ्यां युञ्ज्यान्निमित्ततः ॥ ९३ ॥
विरोधान्नोभयैकात्म्यं स्याद्वादन्यायविद्विषाम्। अवाच्यतैकान्ते-
ऽप्युक्तिर्नावाच्यमिति युज्यते ॥ ९४ ॥ विशुद्धिसंक्लेशाङ्गं चेत्
स्वपरस्थं सुखासुखम्। पुण्यपापास्रवौ युक्तौ न चेद्व्यर्थस्तवार्हतः
॥ ९५ ॥ अज्ञानाच्चेद्ध्रुवो बन्धो ज्ञेयानन्त्यान्न केवली। ज्ञान-
स्तोकाद्विमोक्षश्चेदज्ञानाद्बहुतोऽन्यथा ॥ ९६ ॥ विरोधान्नोभयै-
कात्म्यं स्याद्वादन्यायविद्विषाम्। अवाच्यतैकान्तेऽप्युक्तिर्नावाच्य-
मिति युज्यते ॥ ९७ ॥ अज्ञानान्मोहतो बन्धो नाज्ञानाद्वीतमोहतः
ज्ञानस्तोकाच्च मोक्षः स्यादमोहान्मोहितोऽन्यथा ॥ ९८ ॥ कामा-
दिप्रभवश्चित्रः कर्मबन्धानुरूपतः। तच्च कर्मस्वहेतुभ्यो जीवास्ते
शुद्ध्यशुद्धितः ॥ ९९ ॥ शुद्ध्यशुद्धी पुनः शक्ती ते पाक्यापाक्य-
शक्तिवत् ॥ साद्यनादी तयोर्व्यक्ती स्वभावोऽतर्कगोचरः ॥ १०० ॥
तत्त्वज्ञानं प्रमाणं ते युगपत्सर्वभासनम्। क्रमभावि च यज्ज्ञानं

स्याद्वादनयसंस्कृतम् ॥ १०१ ॥ उपेक्षाफलमाद्यस्य शेषस्यादान-हानधीः । पूर्वं वाऽज्ञाननाशो वा सर्वस्यास्य स्वगोचरे ॥१०२॥ वाक्येष्वनेकान्तद्योती गम्यम्प्रतिविशेषकः । स्यान्निपातोऽर्थयोगित्वात्तव केवलिनामपि ॥१०३ स्याद्वादः सर्वथैकान्तत्यागात्किंवृत्तचिद्विधिः । सप्तभङ्गनयापेक्षो हेयादेयविशेषकः ॥ १०४ ॥ स्याद्वादकेवलज्ञाने सर्वतत्त्वप्रकाशने । भेदः साक्षादसाक्षाच्च ह्यवस्त्वन्यतमं भवेत् ॥ १०५ ॥ सधर्मणैव साध्यस्य साधर्म्यादविरोधतः । स्याद्वादप्रविभक्तार्थविशेषव्यञ्जको नयः ॥ १०६ ॥ नयोपनयैकान्तानां त्रिकालानां समुच्चयः । अविभ्राड् भावसम्बन्धो द्रव्यमेकमनेकधा ॥ १०७ ॥ मिथ्यासमूहो मिथ्या चेन्न मिथ्यैकान्ततास्ति नः । निरपेक्षा नया मिथ्या सापेक्षा वस्तु तेऽर्थकृत् ॥ १०८ ॥ नियम्यतेऽर्थो वाक्येन विधिना वारणेन वा । तथाऽन्यथा च सोऽवश्यमविशेष्यत्वमन्यथा ॥ १०९ ॥ तदतद्वस्तु वागेषा तदेवेत्यनुशासति । न सत्या स्यान्मृषावाक्यैः कथं तत्त्वार्थदेशना ॥ ११० ॥ वाक्स्वभावोऽन्यवागर्थप्रतिषेधनिरङ्कुशः । आह च स्वार्थसामान्यं तादृग्वाच्यं खपुष्पवत् ॥१११॥ सामान्यवाग्विशेषे चेन्न शब्दार्थो मृषा हि सा । अभिप्रेतविशेषाप्तेः स्यात्कारः सत्यलाञ्छनः ॥ ११२ ॥ विधेयमीप्सितार्थाङ्गं प्रतिषेध्याविरोधि यत् । तथैवादेयहेयत्वमिति स्याद्वादसंस्थितिः ॥ ११३ ॥ इतीयमाप्तमीमांसा विहिता हितमिच्छता । सम्यङ्मिथ्योपदेशार्थविशेषप्रतिपत्तये ॥ ११४ ॥ जयति जगति क्लेशा-

वेशप्रपञ्चहिमांशुमान् विहतविषमैकान्तध्वान्तप्रमाणनयांशुमान् । यतिपतिरजो यस्योद्धृष्टान्मताम्बुनिधेर्लवान् स्वमतमतयस्तीर्थ्या नाना परे समुपासते ॥ ११५ ॥ इति श्री आप्तमीमांसा समाप्ता ॥

श्रीजिनसेनाचार्यकृतं

॥ श्रीजिनसहस्रनामस्तोत्रम् ॥

स्वयंभुवे नमस्तुभ्यमुत्पाद्यात्मानमात्मनि । स्वात्मनैव तथोद्भूतवृत्तयेऽचिन्त्यवृत्तये ॥ १ ॥ नमस्ते जगतां पत्ये लक्ष्मीभर्त्रे नमोऽस्तु ते । विदांवर नमस्तुभ्यं नमस्ते वदतांवर ॥ २ ॥ कामशत्रुहणं देवमामनन्ति मनीषिणः । त्वामानुमः सुरेण्मौलिभालाभ्यर्चितविक्रमम् ॥ ३ ॥ ध्यानद्रुघणनिर्भिन्नघनघातिमहातरुः । अनन्तभवसन्तानजयादासीदनन्तजित् ॥ ४ ॥ त्रैलोक्यनिर्जयावाप्तदुर्दर्पमतिदुर्जयम् । मृत्युराजं विजित्यासीज्जिन मृत्युञ्जयो भवान् ॥ ५ ॥ विधूताशेषसंसारबन्धनो भव्यबांधवः । त्रिपुरारिस्त्वमेवासि जन्ममृत्युजरान्तकृत् ॥ ६ ॥ त्रिकालविषयाशेषतत्त्वभेदात्त्रिधोत्थितम् । केवलाख्यं दधच्चक्षुस्त्रिनेत्रोऽसि त्वमीशितः ॥ ७ ॥ त्वामन्धकान्तकं प्राहुर्मोहान्धासुरमर्दनात् । अर्द्धं ते नारयो यस्मादर्धनारीश्वरोऽस्यतः ॥ ८ ॥ शिवः शिवपदाध्यासाद् दुरितारिहरो हरः । शंकरः कृतशं लोके शंभवस्त्वं भवन्सुखे ॥ ९ ॥ वृषभोऽसि जगज्ज्येष्ठः पुरुः पुरुगुणोदयैः । नाभेयो नाभिसम्भूतेरिक्ष्वाकुकुलनंदनः ॥ १० ॥

त्वमेकः पुरुषस्कंधस्त्वं द्वे लोकस्य लोचने । त्वं त्रिधा बुद्ध-सन्मार्गस्त्रिज्ञस्त्रिज्ञानधारकः ॥ ११ ॥ चतुश्शरणमांगल्यमूर्तिस्त्वं चतुरः सुधीः पञ्चब्रह्ममयो देव पावनस्त्वं पुनीहि माम् ॥ १२ ॥ स्वर्गावतरणे तुभ्यं सद्यो जातात्मने नमः । जन्माभिषेकवामाय वामदेव नमोऽस्तु ते ॥ १३ ॥ सुनिःष्क्रान्तावघोराय पदं परम-मीयुषे । केवलज्ञानसंसिद्धावीशानाय नमोऽस्तु ते ॥ १४ ॥ पुरस्तत्पुरुषत्वेन विमुक्तिपदभागिने । नमस्तात्पुरुषावस्थां भाविनीं तेऽद्य बिभ्रते ॥ १५ ॥ ज्ञानावरणनिर्हासान्नमस्तेऽनन्तचक्षुषे । दर्शनावरणोच्छेदान्नमस्ते विश्वदृश्वने ॥१६॥ नमो दर्शनमोहघ्ने क्षायिकामलदृष्टये । नमश्चारित्रमोहघ्ने विरागाय महौजसे ॥१७॥ नमस्तेऽनन्तवीर्याय नमोऽनन्तसुखात्मने । नमस्तेऽनन्तलोकाय लोकालोकावलोकिने ॥ १८ ॥ नमस्तेऽनन्तदानाय नमस्तेऽनन्त-लब्धये । नमस्तेऽनन्तभोगाय नमोऽनन्तोपभोगिने ॥ १९ ॥ नमः परमयोगाय नमस्तुभ्यमयोनये । नमः परमपूताय नमस्ते परमर्षये ॥ २० ॥ नमः परमविद्याय नमः परमतच्छिदे । नमः परमतत्त्वाय नमस्ते परमात्मने ॥ २१ ॥ नमः परमरूपाय नमः परमतेजसे । नमः परममार्गाय नमस्ते परमेष्ठिने ॥२२॥ परम-र्द्धिजुषे धाम्ने परमज्योतिषे नमः । नमः पारेतमःप्राप्तधाम्ने परतरात्मने ॥ २३ ॥ नमः क्षीणकलंकाय क्षीणबंध नमोऽस्तुते । नमस्ते क्षीणमोहाय क्षीणदोषाय ते नमः ॥ २४ ॥ नमः सुगतये तुभ्यं शोभनां गतिमीयुषे नमस्तेऽतीन्द्रियज्ञानसुखायानिन्द्रि-

यात्मने ॥ २५ ॥ कायबन्धननिर्मोक्षादकायाय नमोऽस्तु ते । नमस्तुभ्यमयोगाय योगिनामधियोगिने ॥ २६ ॥ अवेदाय नमस्तुभ्यमकषायाय ते नमः । नमः परमयोगीन्द्रवन्दितांघ्रिद्वयाय ते ॥ २७ ॥ नमः परमविज्ञान नमः परमसंयत । नमः परमदृग्दृष्टपरमार्थाय ते नमः ॥ २८ ॥ नमस्तुभ्यमलेश्याय शुक्ललेशांशकस्पृशे । नमो भव्येतरावस्थाव्यतीताय विमोक्षिणे ॥ २९ ॥ संज्ञ्यसंज्ञिद्वयावस्थाव्यतिरिक्तामलात्मने । नमस्ते वीतसंज्ञाय नमः क्षायिकदृष्टये ॥ ३० ॥ अनाहाराय तृप्ताय नमः परमभाजुषे । व्यतीताशेषदोषाय भवाब्धेः पारमीयुषे ॥ ३१ ॥ अजराय नमस्तुभ्यं नमस्ते स्तादजन्मने । अमृत्यवे नमस्तुभ्यमचलायाक्षरात्मने ॥ ३२ ॥ अलमास्तां गुणस्तोत्रमनन्तास्तावका गुणाः ॥ त्वां नामस्मृतिमात्रेण पर्युपासिसिषामहे ॥ ३३ ॥ एवं स्तुत्वा जिनं देवं भक्त्या परमया सुधीः । पठेदष्टोत्तरं नाम्नां सहस्रं पापशान्तये ॥ १ ॥

॥ इति पीठिका ॥

प्रसिद्धाष्टसहस्रेद्धलक्षणं त्वां गिरां पतिम् । नाम्नामष्टसहस्रेण तोष्टुमोऽभीष्टसिद्धये ॥ १ ॥ श्रीमान्स्वयंभूर्वृषभः शंभवः शंभुरात्मभूः । स्वयंप्रभः प्रभुर्भोक्ता विश्वभूरपुनर्भवः ॥ २ ॥ विश्वात्मा विश्वलोकेशो विश्वतश्चक्षुरक्षरः । विश्वविद्विश्वविद्येशो विश्वयोनिरनश्वरः ॥ ३ ॥ विश्वदृश्वा विभुर्धाता विश्वेशो विश्वलोचनः । विश्वव्यापी विधिर्वेधाः शाश्वतो विश्वतोमुखः ॥४॥

विश्वकर्मा जगज्ज्येष्ठो विश्वमूर्तिर्जिनेश्वरः । विश्वदृग्विश्वभूतेशो विश्वज्योतिरनीश्वरः ॥ ५ ॥ जिनो जिष्णुरमेयात्मा विश्वरीशो जगत्पतिः । अनन्तचिदचिन्त्यात्मा भव्यबन्धुरबन्धनः ॥ ६ ॥ युगादिपुरुषो ब्रह्मा पञ्चब्रह्ममयः शिवः । परः परतरः सूक्ष्मः परमेष्ठी सनातनः ॥ ७ ॥ स्वयंज्योतिरजोऽजन्मा ब्रह्मयोनिरयोनिजः । मोहारिविजयो जेता धर्मचक्री दयाध्वजः ॥ ८ ॥ प्रशान्तारिरनन्तात्मा योगी योगीश्वरार्चितः । ब्रह्मविद्ब्रह्मतत्त्वज्ञो ब्रह्मोद्याविद्यतीश्वरः ॥९॥ शुद्धो बुद्धः प्रबुद्धात्मा सिद्धार्थः सिद्धशासनः । सिद्धः सिद्धान्तविद्ध्येयः सिद्धसाध्यो जगद्धितः ॥१०॥ सहिष्णुरच्युतोऽनन्तः प्रभविष्णुर्भवोद्भवः । प्रभूष्णुरजरोऽजर्यो भ्राजिष्णुर्धीश्वरोऽव्ययः ॥ ११ ॥ विभावसुरसम्भूष्णुः स्वयंभूष्णुः पुरातनः । परमात्मा परंज्योतिस्त्रिजगत्परमेश्वरः ॥ १२ ॥

॥ इति श्रीमदाद्यशतम् ॥ १ ॥

दिव्यभाषापतिर्दिव्यः पूतवाक्पूतशासनः । पूतात्मा परमज्योतिर्धर्माध्यक्षो दमीश्वरः ॥१॥ श्रीपतिर्भगवानर्हन्नरजा विरजाः शुचिः । तीर्थकृत्केवलीशानः पूजार्हः स्नातकोऽमलः ॥ २ ॥ अनन्तदीप्तिर्ज्ञानात्मा स्वयंबुद्धः प्रजापतिः । मुक्तः शक्तो निराबाधो निष्कलो भुवनेश्वरः ॥ ३ ॥ निरञ्जनो जगज्ज्योतिर्निरुक्तोक्तिर्निरामयः । अचलस्थितिरक्षोभ्यः कूटस्थः स्थाणुरक्षयः ॥४॥ अग्रणीर्ग्रामणीर्नेता प्रणेता न्यायशास्त्रकृत् । शास्ता धर्मपतिर्धर्म्यो धर्मात्मा धर्मतीर्थकृत् ॥ ५ ॥ वृषध्वजो वृषाधीशो वृषकेतुर्वृषायुधः

वृषो वृषपतिर्भर्ता वृषभाङ्को वृषोद्भवः ॥६॥ हिरण्यनाभिर्भूतात्मा भूतभृद्भूतभावनः । प्रभवो विभवो भास्वान् भवो भावो भवान्तकः ॥ ७ ॥ हिरण्यगर्भः श्रीगर्भः प्रभूतविभवोद्भवः । स्वयंप्रभुः प्रभूतात्मा भूतनाथो जगत्प्रभुः ॥ ८ ॥ सर्वादिः सर्वदृक् सार्वः सर्वज्ञः सर्वदर्शनः । सर्वात्मा सर्वलोकेशः सर्ववित्सर्वलोकजित् ॥९॥ सुगतिः सुश्रुतः सुश्रुक् सुवाक्सूरिर्बहुश्रुतः । विश्रुतो विश्वतःपादो विश्वशीर्षः शुचिश्रवाः ॥ १० ॥ सहस्रशीर्षः क्षेत्रज्ञः सहस्राक्षः सहस्रपात् । भूतभव्यभवद्भर्ता विश्वविद्यामहेश्वरः ॥ ११ ॥

॥ इति दिव्यादिशतम् ॥

स्थविष्ठः स्थविरो ज्येष्ठः पृष्ठः प्रेष्ठो वरिष्ठधीः । स्थेष्ठो गरिष्ठो वंहिष्ठो श्रेष्ठो निष्ठो गरिष्ठगीः ॥ १ ॥ विश्वमुट् विश्वसृट् विश्वेट् विश्वभुग्विश्वनायकः । विश्वाशीर्विश्वरूपात्मा विश्वजिद्विजितान्तकः ॥ २ ॥ विभवो विभयो वीरो विशोको विजरो जरन् । विरागो विरतोऽसङ्गो विविक्तो वीतमत्सरः ॥ ३ ॥ विनेयजनताबन्धुर्विलीनाशेषकल्मषः । वियोगो योगविद्विद्वान्विधाता सुविधिः सुधीः ॥ ४ ॥ क्षान्तिभाक्पृथिवीमूर्तिः शान्तिभाक् सलिलात्मकः । वायुमूर्तिरसङ्गात्मा वह्निमूर्तिरधर्मधृक् ॥५॥ सुयज्वा यजमानात्मा सुत्वा सुत्रामपूजितः । ऋत्विग्यज्ञपतिर्यज्ञो यज्ञाङ्गममृतं हविः ॥ ६ ॥ व्योममूर्तिरमूर्तात्मा निर्लेपो निर्मलोऽचलः । सोममूर्तिः सुसौम्यात्मा सूर्यमूर्तिर्महाप्रभः ॥ ७ ॥ मन्त्रविन्मन्त्रकृन्मन्त्री मन्त्रमूर्तिरनन्तगः । स्वतन्त्रस्तन्त्रकृत्स्वान्तः

कृतान्तान्तः कृतान्तकृत् ॥ ८ ॥ कृती कृतार्थः सत्कृत्यः कृतकृत्यः कृतक्रतुः । नित्यो मृत्युञ्जयोऽमृत्युरमृतात्माऽमृतोद्भवः ॥ ९ ॥ ब्रह्मनिष्ठः परंब्रह्म ब्रह्मात्मा ब्रह्मसम्भवः । महाब्रह्मपतिर्ब्रह्मेट् महाब्रह्मपदेश्वरः ॥१०॥ सुप्रसन्नः प्रसन्नात्मा ज्ञानधर्मदमप्रभुः । प्रशमात्मा प्रशान्तात्मा पुराणपुरुषोत्तमः ॥ ११ ॥

।। इति स्थविष्ठादिशतम् ॥ ३ ॥

महाशोकध्वजोऽशोकः कः स्रष्टा पद्मविष्टरः । पद्मेशः पद्मसंभूतिः पद्मनाभिरनुत्तरः ॥ १ ॥ पद्मयोनिर्जगद्योनिरित्यः स्तुत्यः स्तुतीश्वरः। स्तवनार्हो हृषीकेशो जितजेयः कृतक्रियः ॥२॥ गणाधिपो गणज्येष्ठो गण्यः पुण्यो गणाग्रणीः । गुणाकरो गुणांभोधिर्गुणज्ञो गुणनायकः ॥ ३ ॥ गुणादरी गुणोच्छेदी निर्गुणः पुण्यगीर्गुणः । शरण्यः पुण्यवाक्पूतो वरेण्यः पुण्यनायकः ॥ ४ ॥ अगण्यः पुण्यधीर्गण्य पुण्यकृत्पुण्यशासनः । धर्मारामो गुणग्रामः पुण्यापुण्यनिरोधकः ॥ ५ ॥ पापापेतो विपापात्मा विपाप्मा वीतकल्मषः । निर्द्वन्द्वो निर्मदः शांतो निर्मोहो निरुपद्रवः ॥ ६ ॥ निर्निमेषो निराहारो निष्क्रियो निरुपप्लवः । निष्कलङ्को निरस्तैना निर्धूतांगो निराश्रयः ॥ ७ ॥ विशालो विपुलज्योतिरतुलोऽचिन्त्यवैभवः । सुसंवृतः सुगुप्तात्मा सुभृत्सुनयतत्त्ववित् ॥ ८ ॥ एकविद्यो महाविद्यो मुनिः परिवृढः पतिः । धीशो विद्यानिधिः साक्षी विनेता विहतांतकः ॥ ९ ॥ पिता पितामहः पाता पवित्रः पावनो गतिः । त्राता भिषग्वरो वर्यो

वरदः परमः पुमान् ।। १० ।। कविः पुराणपुरुषो वर्षीयान्वृषभः पुरुः । प्रतिष्ठाप्रसवो हेतुर्भुवनैकपितामहः ।। ११ ।।

।। इति महाशोकध्वजादि शतम् ।। ४ ।।

श्रीवृक्षलक्षणः श्लक्ष्णो लक्षण्यः शुभलक्षणः। निरक्षः पुंडरीकाक्षः पुष्कलः पुष्करेक्षणः ।। १ ।। सिद्धिदः सिद्धसंकल्पः सिद्धात्मा सिद्धसाधनः । बुद्धबोध्यो महाबोधिर्वर्द्धमानो महर्द्धिकः ।। २ ।। वेदांगो वेदविद्वेद्यो जातरूपो विदांवरः । वेदवेद्यः स्वसंवेद्यो विवेदो वदतांवरः ।। ३ ।। अनादिनिधनो व्यक्तो व्यक्तवाग्व्यक्तशासनः । युगादिकृद्युगाधारो युगादिर्जगदादिजः ।। ४ ।। अतीन्द्रोऽतींद्रियो धींद्रो महेन्द्रोऽतींद्रियार्थदृक् । अनिंद्रियोऽहमिंद्रार्च्यो महेन्द्रमहितो महान् ।। ५ ।। उद्भवः कारणं कर्ता पारगो भवतारकः । अगाह्यो गहनं गुह्यं पराध्यः परमेश्वरः ।।६।। अनंतर्द्धिरमेयर्द्धिरचिंत्यर्द्धिः समग्रधीः । प्राग्र्यः प्राग्रहरोऽभ्यग्र्यः प्रत्यग्रोऽग्र्योऽग्रिमोऽग्रजः ।। ७ ।। महातपा महातेजा महोदर्को महोदयः । महायशा महाधामा महासत्त्वो महाधृतिः ।। ८ ।। महाधैर्यो महावीर्यो महासंपन्महाबलः । महाशक्तिर्महाज्योतिर्महाभूतिर्महाद्युतिः ।। ९ ।। महामतिर्महानीतिर्महाक्षांतिर्महोदयः । महाप्राज्ञो महाभागो महानंदो महाकविः ।। १० ।। महामहा महाकीर्तिर्महाकांतिर्महावपुः । महादानो महाज्ञानो महायोगो महागुणः ।। ११ ।। महामहपतिः प्राप्तमहाकल्याणपंचकः । महाप्रभुर्महाप्रातिहार्याधीशो

महेश्वरः ॥ १२ ॥

॥ इति श्री वृक्षादिशतम् ॥ ५ ॥

महामुनिर्महामौनी महाध्यानी महादमः । महाक्षमो महाशीलो महायज्ञो महामखः ॥ १ ॥ महाव्रतपतिर्मह्यो महाकांतिधरोऽधिपः । महामैत्रीमयोऽमेयो महोपायो महोमयः ॥ २ ॥ महाकारुणिको मंता महामंत्रो महायतिः । महानादो महाघोषो महेज्यो महसां पतिः ॥ ३ ॥ महाध्वरधरो धुर्यो महौदार्यो महेष्टवाक् । महात्मा महसां धाम महर्षिर्महितोदयः ॥ ४ ॥ महाक्लेशांकुशः शूरो महाभूतपतिर्गुरुः महापराक्रमोऽनंतो महाक्रोधरिपुर्वशी ॥५॥ महाभवाब्धिसंतरी महामोहाद्रिसूदनः । महागुणाकरः क्षांतो महायोगीश्वरः शमी ॥ ६ ॥ महाध्यानपतिर्ध्याता महाधर्मो महाव्रतः । महाकर्मारिहात्मज्ञो महादेवो महेशिता ॥ ७ ॥ सर्वक्लेशापहः साधुः सर्वदोषहरो हरः । असंख्येयोऽप्रमेयात्मा शमात्मा प्रशमाकर ॥ ८ ॥ सर्वयोगीश्वरोऽचिंत्य श्रुतात्मा विष्टरश्रवा । दांतात्मा दमतीर्थेशो योगात्मा ज्ञानसर्वगः ॥ ९ ॥ प्रधानमात्मा प्रकृति परमः परमोदयः । प्रक्षीणबंध कामारिः क्षेमकृत्क्षेमशासनः ॥ १० ॥ प्रणवः प्रणयः प्राणः प्राणदः प्रणतेश्वरः । प्रमाणं प्रणिधिर्दक्षो दक्षिणोऽध्वर्युरध्वरः ॥ ११ ॥ आनंदो नंदनो नंदो वंद्योऽनिंद्योऽभिनंदनः । कामहा कामदः काम्यः कामधेनुररिंजयः ॥ १२ ॥

॥ इति महामुन्यादिशतम् ॥ ६ ॥

असंस्कृतः सुसंस्कारः प्राकृतो वैकृतांतकृत् । अंतकृत्कांतिगु कांतश्चिंतामणिरभीष्टदः ॥ १ ॥ अजितो जितकामारिरमितोऽमितशासनः । जितक्रोधो जितामित्रो जितक्लेशो जितांतकः ॥२॥ जिनेंद्रः परमानंदो मुनींद्रो दुंदुभिस्वनः । महेंद्रवंद्यो योगींद्रो यतींद्रो नाभिनंदनः ॥ ३ ॥ नाभेयो नाभिजोऽजातः सुव्रतो मनुरुत्तमः । अभेद्योऽनत्ययोऽनाश्वानधिकोऽधिगुरुः सुगीः ॥४॥ सुमेधा विक्रमी स्वामी दुराधर्षो निरुत्सुकः । विशिष्टः शिष्टभुक् शिष्टः प्रत्ययः कामनोऽनघः ॥ ५ ॥ क्षेमी क्षेमंकरोऽक्षय्यः क्षेत्रधर्मपतिः क्षमी । अग्राह्यो ज्ञाननिग्राह्यो ध्यानगम्यो निरुत्तरः ॥ ६ ॥ सुकृती धातुरिज्यार्हः सुनयश्चतुराननः । श्रीनिवासश्चतुर्वक्त्रश्चतुरास्यश्चतुर्मुखः ॥७॥ सत्यात्मा सत्यविज्ञानः सत्यवाक्सत्यशासनः । सत्याशीः सत्यसंधानः सत्यः सत्यपरायणः ॥ ८ ॥ स्थेयान्स्थवीयोन्नेदीयान्दवीयान्दूरदर्शनः । अणोरणीयाननणुर्गुरुराद्यो गरीयसाम् ॥ ९ ॥ सदायोगः सदाभोगः सदातृप्तः सदाशिवः । सदागतिः सदासौख्यः सदाविद्यः सदोदयः ॥ १० ॥ सुघोषः सुमुखः सौम्यः सुखदः सुहितः सुहृत् । सुगुप्तो गुप्तिभृद्गोप्ता लोकाध्यक्षो दमीश्वरः ॥ ११ ॥

॥ इति असंस्कृतादिशतम् ॥ ७ ॥

बृहन्बृहस्पतिर्वाग्मी वाचस्पतिरुदारधीः । मनीषी धीषणो धीमाञ्छेमुषीशो गिरांपतिः ॥ १ ॥ नैकरूपो नयस्तुंगो नैकात्मा नैकधर्मकृत् । अविज्ञेयोऽप्रतर्क्यात्मा कृतज्ञः कृतलक्षणः ॥२॥ ज्ञान-

गर्भो दयागर्भो रत्नगर्भः प्रभास्वरः । पद्मगर्भो जगद्गर्भो हेमगर्भः सुदर्शनः ॥ ३ ॥ लक्ष्मीवांस्त्रिदशाऽध्यक्षो दृढीयानिन ईशिता । मनोहरो मनोज्ञांगो धीरो गंभीरशासनः ॥ ४ ॥ धर्मयूपो दयायागो धर्मनेमिर्मुनीश्वरः । धर्मचक्रायुधो देवः कर्महा धर्म-घोषणः ॥ ५ ॥ अमोघवागमोघाज्ञो निर्मलोऽमोघशासनः । सुरूपः सुभगस्त्यागी समयज्ञः समाहितः ॥ ६ ॥ सुस्थितः स्वास्थ्य-भाक्स्वस्थो नीरजस्को निरुद्धवः । अलेपो निष्कलंकात्मा वीत-रागो गतस्पृहः ॥ ७ ॥ वश्येन्द्रियो वियुक्तात्मा निःसपत्नो जितेन्द्रियः । प्रशान्तोऽनन्तधामर्षिर्मंगलं मलहाऽनघः ॥ ८ ॥ अनीदृगुपमाभूतो दिष्टिर्दैवमगोचरः अमूर्तो मूर्तिमानेको नैको नानैकतत्त्वदृक् ॥ ९ ॥ अध्यात्मगम्योऽगम्यात्मा योगविद्योगि-वन्दितः सर्वत्रगः सदाभावी त्रिकालविषयार्थदृक् ॥१०॥ शंकरः शंवदो दान्तो दमी क्षांतिपरायणः । अधिपः परमानन्दः परात्मज्ञः परात्परः ॥ ११ ॥ त्रिजगद्वल्लभोऽभ्यर्च्यस्त्रिजगन्मंगलोदयः । त्रिजगत्पतिपूज्यांघ्रिस्त्रिलोकाग्रशिखामणिः ॥ १२ ॥

॥ इति बृहदादिशतम् ॥ ८ ॥

त्रिकालदर्शी लोकेशो लोकधाता दृढव्रतः । सर्वलोकातिगः पूज्यः सर्वलोकैकसारथिः ॥ १ ॥ पुराणपुरुषः पूर्वः कृतपूर्वांग-विस्तरः । आदिदेवः पुराणाद्यः पुरुदेवोऽधिदेवता ॥२॥ युगमुख्यो युगज्येष्ठो युगादिस्थितिदेशकः । कल्याणवर्णः कल्याणः कल्यः कल्याणलक्षणः ॥ ३ ॥ कल्याणप्रकृतिर्दीप्तकल्याणात्मा विकल्मषः ।

विकलंकः कलातीतः कलिलघ्नः कलाधरः ॥४॥ देवदेवो जगन्नाथो जगद्बन्धुर्जगद्विभुः । जगद्धितैषी लोकज्ञः सर्वगो जगदग्रजः ॥५॥ चराचरगुरुर्गोप्यो गूढात्मा गूढगोचरः । सद्योजातः प्रकाशात्मा ज्वलज्ज्वलनसप्रभः ॥ ६ ॥ आदित्यवर्णो भर्माभः सुप्रभः कनकप्रभः । सुवर्णवर्णो रुक्माभः सूर्यकोटिसमप्रभः ॥ ७ ॥ तपनीयनिभस्तुंगो बालार्काभोऽनलप्रभः । संध्याभ्रबभ्रुर्हेमाभस्तप्तचामीकरप्रभः ॥ ८ ॥ निष्टप्तकनकच्छायः कनत्काञ्चनसन्निभः । हिरण्यवर्णः स्वर्णाभः शातकुम्भनिभप्रभः ॥ ९ ॥ द्युम्नाभो जातरूपाभो तप्तजाम्बूनदद्युतिः । सुधौतकलधौतश्रीः प्रदीप्तो हाटकद्युतिः ॥ १० ॥ शिष्टेष्टः पुष्टिदः पुष्टः स्पष्टः स्पष्टाक्षरः क्षमः । शत्रुघ्नोऽप्रतिघोऽमोघः प्रशास्ता शासिता स्वभूः ॥ ११ ॥ शान्तिनिष्ठो मुनिज्येष्ठः शिवतातिः शिवप्रदः । शान्तिदः शान्तिकृच्छान्तिः कांतिमान्कामितप्रदः ॥१२॥ श्रेयोनिधिरधिष्ठानमप्रतिष्ठः प्रतिष्ठितः । सुस्थितः स्थावरः स्थाणुः प्रथीयान्प्रथितः पृथुः ॥ १३ ॥

॥ इति त्रिकालदर्श्यादिशतम् ॥ ६ ॥

दिग्वासा वातरशनो निर्ग्रन्थेशो निरम्बरः । निष्किञ्चनो निराशंसो ज्ञानचक्षुरमोमुहः ॥१॥ तेजोराशिरनन्तौजा ज्ञानाब्धिः शीलसागरः । तेजोमयोऽमितज्योतिर्ज्योतिर्मूर्तिस्तमोऽपहः ॥२॥ जगच्चूडामणिर्दीप्तः सर्वविघ्नविनायकः । कलिघ्नः कर्मशत्रुघ्नो लोकालोकप्रकाशकः ॥३॥ अनिद्रालुरतंद्रालुर्जागरूकः प्रमामयः । लक्ष्मीपतिर्जगज्ज्योतिर्धर्मराजः प्रजाहितः ॥४॥ मुमुक्षुर्बन्धमोक्षज्ञो

जिताक्षो जितमन्मथः । प्रशांतरसशैलूषो भव्यपेटकनायकः ॥५॥ मूलकर्ताखिलज्योतिर्मलघ्नो मूलकारणः । आप्तो वागीश्वरः श्रे याञ्छ्रायसोक्तिर्निरुक्तवाक् ॥६॥ प्रवक्ता वचसामीशो मारजिद्विश्वभाववित् । सुतनुस्तनुनिर्मुक्तः सुगतो हतदुर्नयः ॥७॥ श्रीशः श्रीश्रितपादाब्जो वीतभीरभयंकरः । उत्सन्नदोषो निर्विघ्नो निश्चलो लोकवत्सलः ॥ ८ ॥ लोकोत्तरो लोकपतिर्लोकचक्षुरपारधीः । धीरधीर्बुधसन्मार्गः शुद्धः सूनृतपूतवाक् ॥ ९ ॥ प्रज्ञापारमितः प्राज्ञो यतिर्नियमितेंद्रियः । भदन्तो भद्रकृद्भद्रः कल्पवृक्षो वरप्रदः ॥१०॥ समुन्मूलितकर्मारिः कर्मकाष्ठाशुशुक्षणिः ।कर्मण्यः कर्मठः प्रांशुर्हेयादेयविचक्षणः ॥११॥ अनंतशक्तिरच्छेद्यस्त्रिपुरारिस्त्रिलोचनः । त्रिनेत्रस्त्र्यम्बकस्त्र्यक्षः केवलज्ञानवीक्षणः ॥ १२ ॥ समंतभद्रः शांतारिर्धर्माचार्यो दयानिधिः । सूक्ष्मदर्शी जितानंगः कृपालुर्धर्मदेशकः ॥१३॥ शुभंयुः सुखसाद्भूतः पुण्यराशिरनामयः । धर्मपालो जगत्पालो धर्मसाम्राज्यनायकः ॥ १४ ॥

॥ इति दिग्वासादिशतम ॥ १० ॥

॥ इत्यष्टाधिकसहस्रनामावली समाप्ता ॥

धाम्नां पते तवामूनि नामान्यागमकोविदैः । समुच्चितान्यनुध्यायन्पुमान्पूतस्मृतिर्भवेत् ॥ १ ॥ गोचरोऽपि गिरामासां त्वमवाग्गोचरो मतः । स्तोता तथाप्यसंदिग्धं त्वत्तोऽभीष्टफलं लभेत् ॥ २ ॥ त्वमतोऽसि जगद्बन्धुस्त्वमतोऽसि जगद्भिषक् । त्वमतोसि जगद्धाता त्वमतोऽसि जगद्धितः ॥ ३ ॥ त्वमेकं जगतां ज्योतिस्त्वं द्विरूपोपयोगभाक् । त्वं त्रिरूपैकमुक्त्यंगं

स्वोत्थानंतचतुष्टयः ॥ ४ ॥ त्वं पंचब्रह्मतत्त्वात्मा पंचकल्याण-नायकः । षड्भेदभावतत्त्वज्ञस्त्वं सप्तनयसंग्रहः ॥ ५ ॥ दिव्याष्ट-गुणमूर्तिस्त्वं नवकेवललब्धिकः । दशावतारनिर्धार्यो मां पाहि परमेश्वर ॥ ६ ॥ युष्मन्नामावलीदृब्धविलसत्स्तोत्रमालया । भवंतं वरिवस्यामः प्रसीदानुग्रहाण नः ॥ ७ ॥ इदं स्तोत्रमनुस्मृत्य पूतो भवति भाक्तिकः । यः स पाठं पठत्येनं स स्यात्कल्याणभाजनम् ॥ ८ ॥ ततः सदेदं पुण्यार्थी पुमान्पठति पुण्यधीः । पौरूहूतीं श्रियं प्राप्तुं परमामभिलाषुकः ॥ ९ ॥ स्तुत्वेति मघवा देवं चराचरजगद्गुरुं । ततस्तीर्थविहारस्य व्यधात्प्रस्तावनामिमाम् ॥ १० ॥ स्तुतिः पुण्यगुणोत्कीर्तिः स्तोता भव्यः प्रसन्नधीः निष्ठितार्थो भवांस्तुत्यः फलं नैश्रेयसं सुखं ॥ ११ ॥ यः स्तुत्यो जगतां त्रयस्य न पुनः स्तोता स्वयं कस्यचित् । ध्येयो योगिजनस्य यश्च नितरां ध्याता स्वयं कस्यचित् । यो नेतन् नयते नमस्कृतिमलं नंतव्यपक्षेक्षणः । स श्रीमान् जगतां त्रयस्य च गुरुर्देवः पुरुः पावनः ॥ १२ ॥ तं देवं त्रिदशाधिपार्चितपदं घातिक्षयानंतरं । प्रोत्थानंतचतुष्टयं जिनमिमं भव्याब्जिनीनामिनम् । मानस्तंभ-विलोकनानतजमन्मान्यं त्रिलोकीपतिं । प्राप्ताचिंत्यबहिर्विभूति-मनघं भक्त्या प्रवंदामहे ॥ १३ ॥

२० सुप्रभातस्तोत्रम् ॥

यत्स्वर्गावतरोत्सवे यदभवज्जन्माभिषेकोत्सवे । यद्दीक्षाग्रहणो-त्सवे यदखिलज्ञानप्रकाशोत्सवे ॥ यन्निर्वाणगमोत्सवे जिनपतेः

धूर्जोद्भुतं तद्भवैः। संगीतस्तुतिमंगलैः प्रसरतां मे सुप्रभातोत्सवः ॥ १ ॥ श्रीमन्नतामरकिरीटमणिप्रभाभिरालीढपादयुग ! दुर्द्धर-कर्मदूर। श्रीनाभिनंदन! जिनाजित! शंभवाख्य! त्वद्ध्यानतोऽस्तु सततं मम सुप्रभातम् ॥ २ ॥ छत्रत्रयप्रचलचामरवीज्यमान-देवाभिनंदनमुने सुमते जिनेंद्र ! पद्मप्रभारुणमणिद्युतिभासुरांग त्व० ॥ ३ ॥ अर्हन् सुपार्श्व कदलीदलवर्णगात्र प्रालेयतारगिरी-मौक्तिकवर्णगौर । चंद्रप्रभस्फटिकपाण्डुरपुष्पदंत ! त्व० ॥ ४ ॥ संतप्तकांचनरुचे जिनशीतलाख्य श्रेयान्विनष्टदुरिताष्टकलंकपंक । बंधूकबंधुररुचे जिनवासपूज्य त्व० ॥५॥ उद्दंडदर्पकरिपो विमला-मलांग स्थेमन्ननंतजिदनंतसुखांबुराशे । दुष्कर्मकल्मषविवर्जित धर्मनाथ त्व० ॥ ६ ॥ देवामराकुसुमसन्निभ शांतिनाथ कुंथो दयागुणविभूषणभूषितांग । देवाधिदेव भगवन्नरतीर्थनाथ त्व० ॥ ७ ॥ यन्मोहमल्लमदभंजनमल्लिनाथ क्षेमंकरावितथशासनसु-व्रताख्य । यत्सम्पदा प्रशमितो नमिनामधेय त्व० ॥८॥ तापिच्छ-गुच्छरुचिरोज्ज्वल नेमिनाथ घोरोपसर्गविजयिन् जिनपार्श्वनाथ । स्याद्वादसूक्तिमणिदर्पणवर्द्धमान त्व० ॥९॥ प्रालेयनीलहरितारुण-पीतभासं यन्मूर्तिमव्ययसुखावसथं मुनींद्राः । ध्यायंति सप्ततिशतं जिनवल्लभानां त्व० ॥ १० ॥ सुप्रभातं सुनक्षत्रं मांगल्यं परि-कीर्तितम् । चतुर्विंशतितीर्थानां सुप्रभातं दिने दिने ॥ ११ ॥ सुप्रभातं सुनक्षत्रं श्रेय इत्यभिनंदितम् । देवता ऋषयः सिद्धाः सुप्रभातं दिने दिने ॥ १२ ॥ सुप्रभातं तवैकस्य वृषभस्य

महात्मनः। येन प्रवर्तितं तीर्थं भव्यसत्त्वसुखावहम् ॥ १३ ॥ सुप्रभातं जिनेंद्राणां ज्ञानोन्मीलितचक्षुषाम् । अज्ञानतिमिरांधानां नित्यमस्तमितो रविः ॥ १४ ॥ सुप्रभातं जिनेंद्रस्य वीरः कमललोचनः। येन कर्माटवी दग्धा शुक्लध्यानोग्रवह्निना ॥१५॥ सुप्रभातं सुनक्षत्रं सुकल्याणं सुमंगलम् । त्रैलोक्यहितकर्तॄणां जिनानामेव शासनम् ॥

॥ इति सुप्रभातस्तोत्रम् ॥

श्रीमत्पूज्यपादस्वामिविरचितं

४ समाधिशतकम् ।

येनात्माऽबुध्यतात्मैव परत्वेनैव चापरम् । अक्षयानन्तबोधाय तस्मै सिद्धात्मने नमः ॥ १ ॥ जयन्ति यस्यावदतोऽपि भारती— विभूतयस्तीर्थकृतोऽप्यनीहितुः । शिवाय धात्रे सुगताय विष्णवे जिनाय तस्मै सकलात्मने नमः ॥ २ ॥ श्रुतेन लिङ्गेन यथात्मशक्ति समाहितान्तःकरणेन सम्यक् । समीक्ष्य कैवल्यसुखस्पृहाणां विविक्तिमात्मानमथाभिधास्ये ॥ ३ ॥ बहिरन्तः परश्चेति त्रिधा-सर्वदेहिषु । उपेयात्तत्र परमं मध्योपायाद्बहिस्त्यजेत् ॥ ४ ॥ बहिरात्मा शरीरादौ जातात्मभ्रान्तिरान्तरः । चित्तदोषात्मविभ्रान्तिः परमात्मातिनिर्मलः ॥ ५ ॥ निर्मलः केवलः सिद्धो विविक्तः प्रभुरव्ययः । परमेष्ठी परात्मेति परमात्मेश्वरो जिनः ॥ ६ ॥ बहिरात्मेन्द्रियद्वारैरात्मज्ञानपराङ्मुखः । स्फुरितश्चात्मनो देहमात्मत्वेनाध्यवस्यति ॥ ७ ॥ नरदेहस्थमात्मानमविद्वान्मन्यते

नरम् । तिर्यञ्चं तिर्यगङ्गस्थं सुराङ्गस्थं सुरं तथा ॥ ८ ॥ नारकं नारकाङ्गस्थं न स्वयं तत्त्वतस्तथा। अनन्तानन्तधीशक्तिः स्वसंवेद्यो-ऽचलस्थितिः ॥ ९ ॥ स्वदेहसदृशं दृष्ट्वा परदेहमचेतनम् । परात्माधिष्ठितं मूढः परत्वेनाध्यवस्यति ॥ १० ॥ स्वपराध्यवसायेन देहेष्वविदितात्मनाम् । वर्त्तते विभ्रमः पुंसां पुत्रभार्यादिगोचरः ॥ ११ ॥ अविद्यासंज्ञितस्तस्मात्संस्कारो जायते दृढः । येन लोकोऽङ्गमेव स्वं पुनरप्यभिमन्यते ॥ १२ ॥ देहे स्वबुद्धि-रात्मानं युनक्त्येतेन निश्चयात् । स्वात्मन्येवात्मधीस्तस्माद्वियोजयति देहिनम् ॥ १३ ॥ देहेष्वात्मधिया जाताः पुत्रभार्यादिकल्पनाः । सम्पत्तिमात्मनस्ताभिर्मन्यते हा हृतं जगत् ॥ १४ ॥ मूलं संसार दुःखस्य देह एवात्मधीस्ततः । त्यक्त्वैनां प्रविशेदन्तर्बहिरव्यापृतेन्द्रियः ॥ १५ ॥ मत्तश्च्युत्वेन्द्रियद्वारैः पतितो विषयेष्वहम् । तान्प्रपद्याहमिति मां पुरावेद न तत्त्वतः ॥ १६ ॥ एवं त्यक्त्वा बहिर्वाचं त्यजेदन्तरशेषतः । एष योगः समासेन प्रदीपः परमात्मनः ॥ १७ ॥ यन्मया दृश्यते रूपं तन्न जानाति सर्वथा । जानन्न दृश्यते रूपं ततः केन ब्रवीम्यहम् ॥ १८ ॥ यत्परैः प्रतिपाद्योऽहं यत्परान्प्रतिपादये । उन्मत्तचेष्टितं तन्मे यदहं निर्विकल्पकः ॥१९॥ यदग्राह्यं न गृह्णाति गृहीतं नापि मुञ्चति । जानाति सर्वथा सर्वं तत्स्वसंवेद्यमस्म्यहम् ॥ २० ॥ उत्पन्नपुरुषभ्रान्तेः स्थाणौ यद्वद्विचेष्टितम् । तद्वन्मे चेष्टितं पूर्वं देहादिष्वात्मविभ्रमात् ॥ २१ ॥ यथासौ चेष्टते स्थाणौ निवृत्ते पुरुषाग्रहे । तथाचेष्टोऽस्मि देहादौ

विभ्रान्तात्मविभ्रमः ॥२२॥ येनात्मनानुभूयेऽहमात्मनैवात्मनात्मनि । सोऽहं न तन्न सा नासौ नैको न द्वौ न वा बहुः ॥२३॥ यदभावे सुषुप्तोऽहं यद्भावे व्युत्थितः पुनः । अतीन्द्रियमनिर्देश्यं तत्स्वसंवेद्यमस्म्यहम् ॥२४॥ क्षीयन्तेऽत्रैव रागाद्यास्तत्त्वतो मां प्रपश्यतः । बोधात्मानं ततः कश्चिन्न मे शत्रुर्न च प्रियः ॥२५॥ मामपश्यन्नयं लोको न मे शत्रुर्न च प्रियः । मां प्रपश्यन्नयं लोको न मे शत्रुर्न च प्रियः ॥२६॥ त्यक्त्वैवं बहिरात्मानमन्तरात्मव्यवस्थितः । भावयेत्परमात्मानं सर्वसङ्कल्पवर्जितम् ॥२७॥ सोऽहमित्यात्तसंस्कारस्तस्मिन् भावनया पुनः । तत्रैव दृढसंस्काराल्लभते ह्यात्मनि स्थितिम् ॥२८॥ मूढात्मा यत्र विश्वस्तस्ततो नान्यद्भयास्पदम् । यतो भीतस्ततो नान्यदभयस्थानमात्मनः ॥२९॥ सर्वेन्द्रियाणि संयम्य स्तिमितेनान्तरात्मना । यत्क्षणं पश्यतो भाति तत्तत्त्वं परमात्मनः ॥३०॥ यः परात्मा स एवाहं योऽहं स परमस्ततः । अहमेव मयोपास्यो नान्यः कश्चिदिति स्थितिः ॥३१॥ प्राच्याव्य विषयेभ्योऽहं मां मयैव मयि स्थितम् । बोधात्मानं प्रपन्नोऽस्मि परमानन्दनिर्वृतम् ॥३२॥ यो न वेत्ति परं देहादेवमात्मानमव्ययम् । लभते न स निर्वाणं तप्त्वापि परमं तपः ॥३३॥ आत्मदेहान्तरज्ञानजनिताह्लादनिर्वृतः तपसा दुष्कृतं घोरं भुञ्जानोऽपि न खिद्यते ॥३४॥ रागद्वेषादिकल्लोलैरलोलं यन्मनोजलम् । स पश्यत्यात्मनस्तत्त्वं तत्तत्त्वं नेतरो जनः ॥३५॥ अविक्षिप्तं मनस्तत्त्वं विक्षिप्तं भ्रान्तिरात्मनः ।

धारयेत्तदविक्षिप्तं विक्षिप्तं नाश्रयेत्ततः ॥३६॥ अविद्याभ्यास-
संस्कारैरवशं क्षिप्यते मनः। तदेव ज्ञानसंस्कारैः स्वतस्तत्त्वे-
ऽवतिष्ठते ॥३७॥ अपमानादयस्तस्य विक्षेपो यस्य चेतसः।
नापमानादयस्तस्य न क्षेपो यस्य चेतसः ॥३८॥ यदा मोहात्प्र-
जायेते रागद्वेषौ तपस्विनः। तदेव भावयेत्स्वस्थमात्मानं शाम्यतः
क्षणात् ॥३९॥ यत्र काये मुनेः प्रेम ततः प्रच्याव्य देहिनम्।
बुद्ध्या तदुत्तमे काये योजयेत्प्रेम नश्यति ॥४०॥ आत्मविभ्रमजं
दुःखमात्मज्ञानात्प्रशाम्यति। नायतास्तत्र निर्वान्ति कृत्वापि
परमं तपः ॥४१॥ शुभं शरीरं दिव्यांश्च विषयानभिवाञ्छति।
उत्पन्नात्ममतिर्देहे तत्त्वज्ञानी ततश्च्युतिम् ॥४२॥ परत्राहंमतिः
स्वस्माच्च्युतो बध्नात्यसंशयम्। स्वस्मिन्नहंमतिश्च्युत्वा परस्मा-
न्मुच्यते बुधः ॥४३॥ दृश्यमानमिदं मूढस्त्रिलिङ्गमवबुध्यते
इदमित्यवबुद्धस्तु निष्पन्नं शब्दवर्जितम् ॥ ४४ ॥ जानन्न-
प्यात्मनस्तत्त्वं विविक्तं भावयन्नपि। पूर्वविभ्रमसंस्काराद्
भ्रान्तिं भूयोऽपि गच्छति ॥४५॥ अचेतनमिदं दृश्यमदृश्यं
चेतनं ततः। क्व रुष्यामि क्व तुष्यामि मध्यस्थोऽहं भवाम्यतः
॥४६॥ त्यागादाने बहिर्मूढः करोत्यध्यात्ममात्मवित्। नान्त-
र्बहिरुपादानं न त्यागो निष्ठितात्मनः ॥४७॥ युञ्जीत मनसात्मा-
नं वाक्कायाभ्यां वियोजयेत्। मनसा व्यवहारं तु त्यजेद्वाक्काय-
योजितम् ॥४८॥ जगद्देहात्मदृष्टीनां विश्वास्यं रम्यमेव वा।
आत्मन्येवात्मदृष्टीनां क्व विश्वासः क्व वा रतिः ॥४९॥ आत्म-

ज्ञानात्परं कार्यं न बुद्धौ धारयेच्चिरम् । कुर्यादर्थवशात्किञ्चिद्वा-
क्कायाभ्यामतत्परः । ५० ।। यत्पश्यामीन्द्रियैस्तन्मे नास्ति यन्नि-
यतेन्द्रियः । अन्तः पश्यामि सानन्दं तदस्तु ज्योतिरुत्तमम् ।।५१।।
सुखमारब्धयोगस्य बहिर्दुःखमथात्मनि । बहिरेवासुखं सौख्य-
मध्यात्मं भावितात्मनः ।।५२।। तद्ब्रूयात्तत्परान्पृच्छेत्तदिच्छेत्त-
त्परो भवेत् । येनाविद्यामयं रूपं त्यक्त्वा विद्यामयं व्रजेत् ।।५३।।
शरीरे वाचि चात्मानं संधत्ते वाक्शरीरयोः । भ्रान्तोऽभ्रान्तः
पुनस्तत्त्वं पृथगेषां विबुध्यते ।।५४।। न तदस्तीन्द्रियार्थेषु यत्
क्षेमङ्करमात्मनः । तथापि रमते बालस्तत्रैवाज्ञानभावनात् ।।५५।।
चिरं सुषुप्तास्तमसि मूढात्मानः कुयोनिषु । अनात्मीयात्मभूतेषु
ममाहमिति जाग्रति ।।५६।। पश्येन्निरन्तरं देहमात्मनो नात्म-
चेतसा । अपरात्मधियान्येषामात्मतत्त्वे व्यवस्थितः ।। ५७ ।।
अज्ञापितं न जानन्ति यथा मां ज्ञापितं तथा । मूढात्मानस्ततस्तेषां
वृथा मे ज्ञापनश्रमः ।।५८।। यद्बोधयितुमिच्छामि तन्नाहं यदहं
पुनः । ग्राह्यं तदपि नान्यस्य तत्किमन्यस्य बोधये ।।५९।।
बहिस्तुष्यति मूढात्मा पिहितज्योतिरन्तरे । तुष्यत्यन्तः प्रबुद्धा-
त्मा बहिर्व्यावृत्तकौतुकः ।।६०।। न जानन्ति शरीराणि सुख-
दुःखान्यबुद्धयः । निग्रहानुग्रहधियं तथाप्यत्रैव कुर्वते ।। ६१ ।।
स्वबुद्ध्या यावद्गृह्णीयात् कायवाक्चेतसां त्रयम् । संसारस्तावदे-
तेषां भेदाभ्यासे तु निर्वृतिः ।।६२।। घने वस्त्रे यथात्मानं न
घनं मन्यते तथा । घने स्वदेहेऽप्यात्मानं न घनं मन्यते बुधः

॥६३॥ जीर्णे वस्त्रे यथात्मानं न जीर्णं मन्यते तथा । जीर्णे स्वदेहेऽप्यात्मानं न जीर्णं मन्यते बुधः ।६४। नष्टे वस्त्रे यथात्मानं न नष्टं मन्यते तथा । नष्टे स्वदेहेऽप्यात्मानं न नष्टं मन्यते बुधः।६५। रक्ते वस्त्रे यथात्मानं न रक्तं मन्यते तथा । रक्ते स्वदेहेऽप्यात्मानं न रक्तं मन्यते बुधः ॥६६॥ यस्य सस्पन्दमाभाति निष्पन्देन समं जगत् । अप्रज्ञमक्रियाभोगं स समं याति नेतरः ॥ ६७ ॥ शरीरकञ्चुकेनात्मा संवृतो ज्ञानविग्रहः । नात्मानं बुध्यते तस्माद् भ्रमत्यतिचिरं भवे ॥६८॥ प्रविशद्गलतां व्यूहे देहेऽणूनां समाकृतौ । स्थितिभ्रान्त्या प्रपद्यन्ते तमात्मानमबुद्धयः ॥६९॥ गौरः स्थूलः कृशो वाहमित्यङ्गेनाविशेषयन् । आत्मानं धारयेन्नित्यं केवलं ज्ञप्तिविग्रहम् ॥७०॥ मुक्तिरैकान्तिकी तस्य चित्ते यस्याचला धृतिः । तस्य नैकान्तिकी मुक्तिर्यस्य नास्त्यचला धृतिः ।७१। जनेभ्यो वाक् ततः स्पन्दो मनसश्चित्तविभ्रमाः । भवन्ति तस्मात्संसर्गं जनैर्योगी ततस्त्यजेत् ॥७२॥ ग्रामोऽरण्यमिति द्वेधा निवासोऽनात्मदर्शिनाम । दृष्टात्मनां निवासस्तु विविक्तात्मैव निश्चलः ॥७३॥ देहान्तरगतेर्बीजं देहेऽस्मिन्नात्मभावना । बीजं विदेहनिष्पत्तेरात्मन्येवात्मभावना ॥७४॥ नयत्यात्मानमात्मैव जन्मनिर्वाणमेव वा । गुरुरात्मात्मनस्तस्मान्नान्योऽस्ति परमार्थतः ॥७५॥ दृढात्मबुद्धिर्देहादावुत्पश्यन्नाशमात्मनः । मित्रादिभिर्वियोगं च बिभेति मरणाद्भृशम् ॥७६॥ आत्मन्येवात्मधीरन्यां शरीरगतिमात्मनः । मन्यते निर्भयं त्यक्त्वा वस्त्रं वस्त्रान्तरग्रहम् ॥७७॥

व्यवहारे सुषुप्तो यः स जागर्त्यात्मगोचरे। जागर्ति व्यवहारे ऽस्मिन् सुषुप्तश्चात्मगोचरे ।७८। आत्मानमन्तरे दृष्ट्वा दृष्ट्वा देहादिकं बहिः। तयोरन्तरविज्ञानादभ्यासादच्युतो भवेत् ॥७६॥ पूर्वं दृष्टात्मतत्त्वस्य विभात्युन्मत्तवज्जगत्। स्वभ्यस्तात्मधियः पश्चात्काष्ठपाषाणरूपवत् ॥८०॥ शृण्वन्नप्यन्यतः कामं वदन्नपि कलेवरात्। नात्मानं भावयेद्भिन्नं यावत्तावन्न मोक्षभाक् ॥८१॥ तथैव भावयेद्देहाद्व्यावृत्यात्मानमात्मनि। यथा न पुनरात्मानं देहे स्वप्नेऽपि योजयेत् ॥८२॥ अपुण्यमव्रतैः पुण्यं व्रतैर्मोक्षस्तयोर्व्ययः। अव्रतानीव मोक्षार्थी व्रतान्यपि ततस्त्यजेत् ॥८३॥ अव्रतानि परित्यज्य व्रतेषु परिनिष्ठितः। त्यजेत्तान्यपि सम्प्राप्य परमं पदमात्मनः ॥८४॥ यदन्तर्जल्पसंपृक्तमुत्प्रेक्षाजालमात्मनः मूलं दुःखस्य तन्नाशे शिष्टमिष्टं परं पदम् ॥८५॥ अव्रती व्रतमादाय व्रती ज्ञानपरायणः परात्मज्ञानसम्पन्नः स्वयमेव परो भवत् ॥८६॥ लिङ्गं देहाश्रितं दृष्टं देह एवात्मनो भवः। न मुच्यन्ते भवात्तस्मादेते लिङ्गकृताग्रहाः ॥८७॥ जातिर्देहाश्रिता दृष्टा देह एवात्मनो भवः। न मुच्यन्ते भवात्तस्मादेते जातिकृताग्रहाः ॥८८॥ जातिलिङ्गविकल्पेन येषां च समयाग्रहः। तेऽपि न प्राप्नुवन्त्येव परमं पदमात्मनः ॥८६॥ यत्त्यागाय निवर्तन्ते भोगेभ्यो यदवाप्तये। प्रीतिं तत्रैव कुर्वन्ति द्वेषमन्यत्र मोहिनः ॥६०॥ अनन्तरज्ञः संधत्ते दृष्टिं पङ्गोर्यथान्धके। संयोगाद्दृष्टिमङ्गेऽपि संधत्ते तद्वदात्मनः ।६१। दृष्टिभेदो यथा दृष्टिं पङ्गोरन्धे न योजयेत्। तथा न

योजयेद्देहे द्रष्टात्मा दृष्टिमात्मनः ।।९२।। सुप्तोन्मत्ताद्यवस्थैव विभ्रमो ऽनात्मदर्शिनाम् । विभ्रमः क्षीणदोषस्य सर्वावस्थात्मदर्शिनः ॥९३॥ विदिताशेषशास्त्रोऽपि न जाग्रदपि मुच्यते । देहात्मदृष्टिर्ज्ञातात्मा सुप्तोन्मत्तोऽपि मुच्यते ॥९४॥ यत्रैवाहितधीः पुंसः श्रद्धा तत्रैव जायते । यत्रैव जायते श्रद्धा चित्तं तत्रैव लीयते ॥९५॥ यत्रानाहितधीः पुंसः श्रद्धा तस्मान्निवर्तते । यस्मान्निवर्तते श्रद्धा कुतश्चित्तस्य तल्लयः ॥९६॥ भिन्नात्मानमुपास्यात्मा परो भवति तादृशः । वर्तिर्दीपं यथोपास्य भिन्ना भवति तादृशी ॥९७॥ उपास्यात्मानमेवात्मा जायते परमोऽथ वा । मथित्वात्मानमात्मैव जायतेऽग्निर्यथा तरुः ॥९७॥ इतीदं भावयेन्नित्यमवाचांगोचरं पदम् । स्वत एव तदाप्नोति यतो नावर्तते पुनः ॥९९॥ अयत्नसाध्यं निर्वाणं चित्तत्त्वं भूतजं यदि । अन्यथा योगतस्तस्मान्न दुःखं योगिनां क्वचित् ॥१००॥ स्वप्ने दृष्टे विनष्टेऽपि न नाशोऽस्ति यथात्मनः । तथा जागरदृष्टेऽपि विपर्यासाविशेषतः ।१०१। अदुःखभावितं ज्ञानं क्षीयते दुःखसन्निधौ । तस्माद्यथाबलं दुःखैरात्मानं भावयेन्मुनिः ।।१०२।। प्रयत्नादात्मनो वायुरिच्छाद्वेषप्रवर्तितात् । वायोः शरीरयन्त्राणि वर्तन्ते स्वेषु कर्मसु ।।१०३।। तान्यात्मनि समारोप्य साक्षाण्यास्ते सुखं जडः । त्यक्त्वारोपं पुनर्विद्वान् प्राप्नोति परमं पदम् ।।१०४।। मुक्त्वा परत्र परबुद्धिमहंधियं च संसारदुःखजननीं जननाद्विमुक्तः । ज्योतिर्मयं सुखमुपैति परात्मनिष्ठस्तन्मार्गमेतदधिगम्य समाधितन्त्रम् ॥१०५॥

येनात्मा बहिरन्तरुत्तमभिदा त्रेधा विवृत्योदितः, मोक्षोऽनन्तचतु-ष्टयामलवपुः सद्ध्यानतः कीर्तितः। जीयात्सोऽत्र जिनः समस्तविषयः श्रीपादपूज्योऽमलो, भव्यानन्दकरः समाधिशतकः श्रीमत्प्रभेन्दुः प्रभुः॥

इति श्रीमत्पूज्यपादस्वामिविरचितं समाधितन्त्रं समाप्तम्।

श्रीमद्विद्यानन्दिस्वामिविरचितं

पात्रकेशरिस्तोत्रम्

जिनेन्द्र ! गुणसंस्तुतिस्तव मनागपि प्रस्तुता, भवत्यखिलकर्मणां प्रहतये परं कारणम्। इति व्यवसिता मतिर्मम ततोऽहमत्याद-रात्, स्फुटार्थनयपेशलां सुगतः संविधास्ये स्तुतिम् ।१। मतिः श्रुतमथावधिश्च सहजं प्रमाणं हिते, ततः स्वयमबोधि मोक्षपदवीं स्वयंभूर्भवान्। नचैतदिह दिव्यचक्षुरधुनेक्ष्यतेऽस्मादृशां, यथा सुकृतकर्मणां सकलराज्यलक्ष्म्यादयः ।२। व्रतेषु परिरज्यसे निरुपमे च सौख्यस्पृहा, बिभेष्यपि च संसृतेरसुभृतां वधं द्वेक्षयसि कदाचिददयोदयो विगतचित्तकोऽप्यञ्जसा, तथापि गुरुरिष्यसे त्रिभुवनैकबन्धुर्जिनः ।३। तपः परमुपाश्रितस्य भवतोऽभवत्केवलं समस्तं विषयं निरवमपुनश्च्युति स्वात्मजं। निरावरणवर्जनं व्यतिकरादपेतात्मकं, तदेव पुरुषार्थसारमभिसम्मतं योगिनाम् ।४। परस्परविरोधवद्विविधभङ्गशाखाकुलं, पृथग्जनसुदुर्गमं तव निरर्थक शासनम्।

तथापि जिन ! सम्मतं सुविदुषां न चात्यद्भुतं । 'भवन्ति हि महात्मनां दुरुदितान्यपि ख्यातये' ॥५॥ सुरेन्द्रपरिकल्पितं बृहदनर्घ्यसिंहासनं तथाऽऽतपनिवारणत्रयमथोल्लसच्चामरम् । वशं च भुवनत्रयं निरुपमा च निःसंगता न संगतमिदं द्वयं त्वयि तथाऽपि संगच्छते ॥६॥ त्वमिन्द्रियविनिग्रहप्रवणनिष्ठुरं भाषसे तपस्यपि च यातयस्यनवघदुष्करे सश्रितान् । अनन्यपरदृष्टया षडसुकायसंरक्ष्या स्वनुग्रहपरोऽप्यहो ! त्रिभुवनात्मनां नापरः ॥७॥ ददास्यनुपमं सुखं स्तुतिपरेष्वतुष्यन्नपि क्षिपस्यकुपितोऽपि च ध्रुवमसूयकान्दुर्गतौ । न चेश ! परमेष्ठिता तव विरुद्ध्यते यद्भवान् न कुप्यति न तुष्यति प्रकृतिमाश्रितो माध्यमाम् ॥८॥ परिक्षपितकर्मणस्तव च जातु रागादयो न चेन्द्रियविवृत्तयो न च मनस्कृता व्यावृतिः । तथाऽपि सकलं जगद्युगपदंजसा वेत्सि च प्रपश्यसि च केवलाभ्युदितदिव्यसच्चक्षुषा ॥९॥ क्षयाच्च रतिरागमोहभयकारिणां कर्मणां कषायरिपुनिर्जयः सकलतत्त्वबिबोदयः । अनन्यमदृशं सुखं त्रिभुवनाधिपत्यं च ते सुनिश्चितमिदं विभो ! सुमुनिसम्प्रदायादिभिः ॥१०॥ न हीन्द्रियधिया विरोधि न च लिंगबुद्धया वचो न चाप्यनुमतेन ते सुनयसप्तधा योजितम् । व्यपेतपरिशङ्कनं वितथकारणादर्शना–दतोऽपि भगवँस्त्वमेव परमेष्ठितायाः पदम् ॥११॥ न लुब्ध इति गम्यसे सकलसङ्गसंन्यासतो न चाऽपि तव मूढता विगतदोषवाग्यद्भवान् । अनेकविधरक्षणादसुमतां न च द्वेषिता निरायुधतयाऽपि च व्यपगतं

तथा ते भयम् ॥१२॥ यदि त्वमपि भाषसे वितथमेवमाप्तोऽपि सन् परेषु जिन का कथा प्रकृतिलुब्धमुग्धादिषु । न चाप्यकृतकात्मिका वचनसंहतिर्दृश्यते पुनर्जननमप्यहो ! न हि विरुध्यते युक्तिभिः ॥१३॥ सजन्ममरणार्षिगोत्रचरणादिनामश्रुतेरनेकपदसंहतिप्रतिनियामसन्दर्शनात् । फलार्थिपुरुषप्रवृत्तिविनिवृत्तिहेत्वात्मनां श्रुतेश्च मनुसूत्रवत्पुरुषकर्तृकैव श्रुतिः ॥१४॥ स्मृतिरच परजन्मनः स्फुटमिहेष्यते कस्यचित्तथाप्तवचनान्तरात्प्रसृतलोकवादादपि । न चाप्यसत उद्भवो न च सतो निमूलात्क्षयः कथं हि परलोकिनामसुभृतामसत्त्वोच्यते ॥१५॥ न चाप्यसदुदीयते न च सदेव वा व्यज्यते सुराङ्गमदवत्तथा शिखिकलापवैचित्र्यवत् । क्वचिन्मृतकरन्धनार्थपिठरादिके नेष्यते कथं क्षितिजलादिसङ्गुण इष्यते चेतना ॥१६॥ प्रशान्तकरणं वपुर्विगतभूषणं चाऽपि ते समस्तजनचित्तनेत्रपरमोत्सवत्वं गतम् । विनाऽऽयुधपरिग्रहाज्जिन ! जितास्त्वया दुर्जयाः कषायरिपवो परैर्न तु गृहीतशास्त्रैरपि ॥१७॥ धियान्तरतमार्थवद्गतिसमन्वयान्वीक्षणात्क्षवेत्खपरिमाणवत्क्वचिदिह प्रतिष्ठा परा । प्रहाणमपि दृश्यते क्षयवतो निमूलात्क्वचित्तथाऽयमपि युज्यते ज्वलनवत्कषायक्षयः ॥१८॥ अशेषविदिहेष्यते सदसदात्मसामान्यविज्जिन ! प्रकृतिमानुषोऽपि किमुताखिलज्ञानवान् । कदाचिदिह कस्यचित्क्वचिदपेतरागादिता स्फुटं समुपलभ्यते किमुत ते व्यपेतैनसः ॥१९॥ अशेषपुरुषादितत्त्वगतदेशनाकौशलं त्वदन्यपुरुषान्तरानुचितमाप्तताज्ञापकम् । कणादकपिलाक्षपादमुनिशाक्यपुत्रोक्तयः स्खलन्ति हि सुमधुरा-

दिपरिनिश्चितार्थेष्वपि ॥२०॥ परैरपरिणामकः पुरुष इष्यते सर्वथा प्रमाणविषयादितत्त्वपरिलोपनं स्याचतः। कषायविरहाच्च चाऽस्य विनिबन्धनं कर्मभिः कुतश्च परिनिर्वृतिः क्षणिकरूपतायां तथा ॥२१॥ मनो विपरिणामकं यदिह संसृतिं चाश्नुते तदेव च विमुच्यते पुरुषकल्पना स्याद् वृथा। न चाऽस्य मनसो विकार उपपद्यते सर्वथा ध्रुवं तदिति हीष्यते द्वितयवादिता कोपिनी ॥२२॥ पृथग्जनमनोनुकूलमपरैः कृतं शासनं सुखेन सुखमाप्यते न तपसेत्यवश्येन्द्रियैः। प्रतिक्षणविभंगुरं सकलसंस्कृतं चेष्यते ननु स्वमतलोकलिङ्गपरिनिश्चयैर्व्याहितम् ॥२३॥ न सन्ततिरनश्वरी न हि च नश्वरी नो द्विधा वनादिवदभाव एव यत इष्यते तत्त्वतः वृथैव कृपिदानशीलमुनिवन्दनादिक्रियाः कथञ्चिदविनश्वरी यदि भवेत्प्रतिज्ञाक्षतिः ॥२४॥ अनन्यपुरुषोत्तमो मनुजतामतीतोऽपि स मनुष्य इति शस्यसे त्वमधुना नरैर्बालिशैः। क्व ते मनुजगर्भिता क्व च विरागसर्वज्ञता न जन्ममरणात्मता हि तव विद्यते तत्त्वतः ॥२५॥ स्वमातुरिह यद्यपि प्रभव इष्यते गर्भतो मलैरनुपसंप्लुतो वरसरोजपत्रेऽम्बुवत् हिताहितविवेकशून्यहृदयो न गर्भेऽप्यभूः कथं तव मनुष्यमात्रसदृशत्वमाशङ्क्यते ॥२६॥ न मृत्युरपि विद्यते प्रकृतिमानुषस्येव ते मृतस्य परिनिर्वृतिर्न मरणं पुनर्जन्मवत् जरा च न हि यद्वपुर्विमलकेवलोत्पत्तितः प्रभृत्यरुजमेकरूपमवतिष्ठते प्राङ् मृतेः ॥२७॥ परैः कृपणदेवकैः स्वयमसत्सुखैः प्रार्थ्यते सुखं युवतिसेवनादिपरसन्निधिप्रत्ययम्। त्वया तु परमात्मना न परतो यतस्ते सुखं व्यपेतपरिणामकं निरु-

पर्म ध्रुवं स्वात्मजं ।।२८।। पिशाचपरिवारितः पितृवने नरीनृत्यते च।द्र्ुधिरभीषणद्विरदकृत्तिहेलापटः हरो हसति चायतं कहकहा-ट्टहासोल्वणं कथं परमदेवतेति परिपूज्यते पण्डितैः ।।२६।। मुखेन किल दक्षिणेन पृथुनाऽखिलप्राणिनां समत्ति शवपूतिमज्जरुधिरां-त्रमांसानि च। गणैः स्वसदृशैभृशं रतिमुपैति रात्रिंदिवं पिबत्यपि च यः सुरां स कथमाप्ततामाजनम् ।।३०।। अनादिनिधनात्मकं सकलतत्त्वसंबोधनं समस्तजगदाधिपत्यमथ तस्य संतृप्तता तथा विगतदोषता च किल विद्यते यन्मृषा सुयुक्तिविरहाच्च चाऽस्ति परिशुद्धतत्त्वागमः ।।४१।। कमण्डलुमृगाजिनाक्षवलयादिभि-र्ग्रहणः शुचित्वविरहादिदोषकलुषत्वमभ्यूह्यते भय विघृणता च विष्णुहरयोः मशस्त्रत्वतः स्वतो न रमणीयता च परिमूढता भूषणात् ।।३२।। स्वयं सृजति चेत्प्रजाः किमिति दैत्यविध्वंसनं सुदुष्टजननिग्रहार्थमिति चेदसृष्टिर्वरम् । कृतात्मकरणीयकस्य जगतां कृतिर्निष्फला स्वभाव इति चेन्मृषा स हि सुदुष्ट एवाऽऽप्यते।३३ प्रसन्नकुपितात्मनां नियमतो भवेद्दुःखिता तथैव परिमोहिता भय-मुपद्रुतिश्चामयैः । तृषाऽपि च बुभुक्षया च न च संसृतिश्छिद्यते जिनेन्द्र ! भवतोऽपरेषु कथमाप्तता युज्यते ।।३४।। कथं स्वयमुप-द्रुताः परसुखोदये कारणं स्वयं रिपुभयार्दिताश्च शरणं कथं विम्यताम् । गतानुगतिकैरहो त्वदपरत्र भक्तैर्जैनैरनायतनसेवनं निरयहेतुरङ्गीकृतम् ।।३५।। सदा हननघातनाद्यनुमतिप्रवृत्तात्मनां प्रदुष्टचरितोदितेषु परिहृष्यतां देहिनाम् । अवश्यमनुषज्यते दुरित-बन्धनं तत्त्वतः शुभेऽपि परिनिश्चितस्त्रिविधबन्धहेतुर्भवेत् ।।३६।

विमोक्षसुखचैत्यदानपरिपूजनाद्यात्मिकाः क्रिया बहुविधासुभृन्मर-णपीडना हेतवः त्वया ज्वलितकेवलेन न हि देशिताः किं नु ता-स्त्वयि प्रसृतभक्तिभिः स्वयमनुष्ठिताः श्रावकैः ॥३७॥ त्वया त्वदुपदेशकारिपुरुषेण वा केनचित् कथंचिदुपदिश्यतेस्म जिन ! चैत्यदानक्रियाः । अनाशकविधिश्च केशपरिलुंचनं चाऽथवा श्रुतादनिधनात्मकादधिगतं प्रमाणान्तरात् ॥३८॥ न चासुपरि-पीडनं नियमतोऽशुभायेष्यते त्वया न च शुभाय वा न हि च सर्वथा सत्यवाक् । न चाऽपि दमदानयोः कुशलहेतुतैकान्ततो विचित्रनयभङ्गजालगहनं त्वदीयं मतम् ॥३९॥ त्वयाऽपि सुखजी-वनार्थमिह शासनं चेत्कृतं कथं सकलसंग्रहत्यजनशासिना युज्यते । तथा निरशनाद्यमुक्तिरसवर्जनाद्युक्तिभिर्जितेन्द्रियतया त्वमेव जिन ! इत्यभिख्यां गतः ॥४०॥ जिनेश्वर ! न ते मतं पटकव-स्त्रपात्रग्रहो विमृष्य सुखकारणं स्वयमशक्तकैः कल्पितः । अथाय-मपि सत्पथस्तव भवेद्वृथा नग्नता न हस्तसुलभे फले सति तरुः समारुह्यते ॥४१॥ परिग्रहवतां सतां भयमवश्यमापद्यते प्रकोपपरि-हिंसने च परुषानृतव्याहृती ममत्वमथ चोरतो स्वमनसश्च विभ्रा-न्तता कुतो हि कलुषात्मनां परमशुक्लसद्ध्यानता ॥४२॥ स्वभाजनगतेषु पेयपरिभोज्यवस्तुष्वमी यदा प्रतिनिरीक्षिता-स्तनुभृतः सुसूक्ष्मात्मिका । तदा क्वचिदपोज्झने मरणमेव तेषां भवेद्धाऽप्यभिनिरोधनं बहुतरात्मसंमूर्च्छनम् ॥४३॥ दिगम्बरतया स्थिताः स्वभुजभोजिनो ये सदा प्रमाद-रहिताशयाः प्रचुरजीवहत्यामपि । न बन्धफलभागिनस्त इति

गम्यते येन ते प्रवृत्तमनुविभ्रति स्वबलयोग्यमवाप्यमी ॥४४॥ यथागमविहारिणामशनपानमत्स्यादिषु प्रयत्नपरचेतसामविकलेन्द्रियालोकिनाम् । कथंचिदसुपीडनाद्यदि भवेदपुण्योदय—स्तपोऽपि वध एव ते स्वपरजीवसंतापनात् ॥४५॥ मरुज्ज्वलनभूपयःसु नियमात्क्वचिद्युज्यते परस्परविरोधितेषु विगतासुता सर्वदा प्रमाद दजनितागसां क्वचिदपीहनं स्वागमात्कथं स्थितिभुजां सतां गगन वाससां दोषितः ॥४६॥ परैरनघनिर्वृतिः स्वगुणतत्त्वविध्वंसनं व्यघोषि कपिलादिभिश्च पुरुषार्थविभ्रंशनं । त्वया सुमृदितैनसा ज्वलितकेवलौघश्रिया ध्रुव निरुपमात्मकं सुखमनन्तमव्याहतम्४७ निरन्वयविनश्वरी जगति मुक्तिरिष्टापरैर्न कश्चिदिह चेष्टते स्वव्यसनाय मूढेतरः। त्वयाऽनुगुणसंहृतेरतिशयोपलब्ध्यात्मिका स्थितिः शिवमयी प्रवचने तव ख्यापिता ॥४८॥ इयत्यपि गुणस्तुतिः परमनिर्वृतेः साधनी भवत्यलमतो जनो व्यवसितश्च तत्काङ्क्षया विरंस्यतिच साधुना रुचिरलोभलाभे सतां मनोऽभिलषिताप्तिरेव ननु च प्रयासावधिः ॥४९॥ इति मम मतिवृत्त्या संहृतिं त्वद् - गुणानामनिशममितशक्तिं संस्तुवानस्य भक्त्या। सुखमनघमनंतं स्वात्मसंस्थं महात्मन् ! जिन ! भवतु महत्या केवलश्रीविभूत्या ॥५०॥

इति श्री निखिलतार्किक चूडामणिविद्यानन्दिस्वामिप्रणीतम् बृहत्पञ्चनमस्कारस्तोत्रापरनामधेयं पात्रकेशरिस्तोत्रं समाप्तम् ।

श्री पद्मनन्दाचार्यविरचिता

* एकत्वसप्ततिः *

चिदानन्दैकसद्भावं परमात्मानमव्ययम् । प्रणमामि सदा शान्तं शान्तये सर्वकर्मणाम् ॥१॥ खादिपञ्चकनिर्मुक्तं कर्माष्टकविवर्जितम् । चिदात्मकं परं ज्योतिर्वन्दे देवेन्द्रपूजितम् ॥२॥ यदव्यक्तमबोधानां व्यक्तं सद्बोधचक्षुषाम् । सारं यत्सर्ववस्तूनां नमस्तस्मै चिदात्मने ॥३॥ चित्तत्त्वं तत्प्रतिप्राणिदेह एव व्यवस्थितम् । तमश्छन्ना न जानन्ति भ्रमन्ति च बहिर्बहिः ॥४॥ भ्रमतोऽपि सदा शास्त्रजाले महति केचन । न विदन्ति परं तत्त्वं दारुणीव हुताशनम् ॥५॥ केचित् केन्येऽपि कारुण्यात्कथ्यमानमपि स्फुटम् । न मन्यन्ते न शृण्वन्ति महामोहमलीमसाः ॥६॥ धुरि धर्मात्मकं तत्त्वं दुःश्रुतेर्मन्दबुद्धयः । जात्यन्धहस्तिरूपेण ज्ञात्वा नश्यन्ति केचन ॥७॥ केचित्किञ्चित्परिज्ञाय कुतश्चिद् गर्विताशयाः । जगन्मन्दं प्रपश्यन्तो नाश्रयन्ति मनीषिणः ॥८॥ जन्तुमुद्धरते धर्मः पतन्तं जन्मसंकटे । अन्यथा स कुतो भ्रान्त्या लोकैर्ग्राह्यः परीक्षितः ॥९॥ सर्वविद्वीतरागोक्तो धर्मः सूनृततां व्रजेत् । प्रामाण्यतो यतः पुंसो वाचः प्रामाण्यमिष्यते ॥१०॥ बहिर्विषयसंबन्धः सर्वः सर्वस्य सर्वदा । अतस्तद्भिन्नचैतन्यबोधयोगौ तु दुर्लभौ ॥११॥ लब्धिपञ्चकसामग्रीविशेषात् पात्रतां गतः । भव्यः सम्यग्दगादीनां यः स मुक्तिपथे स्थितः ॥१२॥

सम्यग्दृग्बोधचारित्रं त्रितयं मुक्तिकारणम् । मुक्तावेव सुखं तेन तत्र यत्नो विधीयतां ॥१३॥ दर्शनं निश्चयः पुंसि बोधस्तद्बोध इष्यते । स्थितिरत्रैव चारित्रमिति योगः शिवाश्रयः ॥१४॥ एकमेव हि चैतन्यं शुद्धनिश्चयतोऽथवा । कोऽवकाशो विकल्पानां तत्राखण्डैकवस्तुनि ॥१५॥ प्रमाणनयनिक्षेपा अर्वाचीने पदे स्थिताः । केवले च पुनस्तस्मिंस्तदेकः प्रतिभासते ॥१६ निश्चयैकदृशा नित्यं तदेवैकं चिदात्मकम् । प्रपश्यामि गतभ्रान्तिर्व्यवहारदृशा परम् ॥१७॥ अजमेकं परं शांतं सर्वोपाधिविवर्जितम् । आत्मानमात्मना ज्ञात्वा तिष्ठेदात्मनि यः स्थिरः ॥१८॥ स एवार्हन् जगन्नाथः स एव प्रभुरीश्वरः ॥१९॥ केवलज्ञानदृक्सौख्यस्वभावं तत्परं महः । तत्र ज्ञाते न किं ज्ञातं दृष्टे दृष्टं श्रुते श्रुतम् ॥२०॥ इति ज्ञेयं तदेवैकं श्रवणीयं तदेव हि । दृष्टव्यञ्च तदेवैकं नान्यन्निश्चितो बुधैः ॥२१॥ गुरूपदेशातोऽभ्यासाद्वैराग्यादुपलभ्य यत् । कृतकृत्यो भवेद्योगी तदेवैकं न चापरम् ॥२२॥ तत्प्रति प्रीतिचित्तेन येन वार्तापि हि श्रुता । निश्चितं स भवेद्भव्यो याति निर्वाणभाजनम् ॥२३॥ जानीते यः परं ब्रह्म कर्मणः पृथगेकताम् । गतं तद्गतबोधात्मा तत्स्वरूपं स गच्छति ॥२४॥ केनापि परेण स्यात्सम्बन्धो बन्धकारणम् परैकत्वपदे शान्ते मुक्तये स्थितिरात्मनः ॥२५॥ विकल्पोर्मिभरत्यक्तः शान्तः कैवल्यमाश्रितः । कर्माभावे भवेदात्मा वाताभावे समुद्रवत् ॥२६॥ संयोगेन यदा यातं मत्तस्तत्सकलं परम् । तत्परित्याग-योगेन मुक्तोऽहमिति मे मतिः ॥२७॥ किं मे

करिष्यतः क्रूरौ शुभाशुभ निशाचरौ। रागद्वेषपरित्याग मोह-मंत्रेण कीलितौ ॥२८॥ सम्बन्धेऽपि सति त्याज्यौ रागद्वेषौ महात्मभिः। विना तेनापि ये कुर्युस्ते कुर्युः किं न वातुलाः॥२९ मनोवाक्कायचेष्टाभिस्तद्विधं कर्मजृम्भते। उपास्यते तदेवैकं तेभ्यो भिन्नं मुमुक्षुभिः ॥३०॥ द्वैततो द्वैतमद्वैतादद्वैतं खलु जायते। लोहाल्लोहमयं पात्रं हेम्नो हेममयं यथा ॥३१॥ निश्चयेन तदेकत्वमद्वैतममृतं परम्। द्वितीयेन कृतं द्वैतं संसृतिर्व्यवहारतः ॥३२॥ बंधमोक्षौ रतिद्वेषौ कर्मात्मनौ शुभाशुभौ। इति द्वैताश्रिता बुद्धिरसिद्धिरभिधीयते ॥३३॥ उदयोदीरणासत्ताप्रबन्धः खलु कर्मणः। नोधात्मधाम सर्वेभ्यस्तदेवैकं परं परम् ॥३४॥ क्रोधादिकर्मयोगेऽपि निर्विकारं परं महः। विकारकारिभिर्मेघैर्न विकारि नभो भवेत् ॥३५॥ नामापि हि परं तस्मान्निश्चयात्तद-नामकम्। जन्ममृत्यादि चाशेषं वपुर्धर्मं विदुर्बुधाः ॥३६॥ बोधेनापि युतिस्तस्य चैतन्यस्य तु कल्पना। स च तच्च तयोरैक्यं निश्चयेन विभाव्यते ॥३७॥ क्रियाकारकसम्बन्धप्रबन्धोज्झितमूर्ति यत्। एवं ज्योतिस्तदेवैकं शरण्यं मोक्षकांक्षिणाम् ॥३८॥ तदेवैकं परं ज्ञानं तदेकं शुचि दर्शनम्। चारित्रं च तदेकं स्यात् तदेकं निर्मलं तपः ॥३९॥ नमस्यञ्च तदेवैकं तदेवैकञ्च मंगलम् उत्तमञ्च तदेवैकं तदेव शरणं सताम् ॥४०॥ आचारश्च तदेवैकं तदेवावश्यकक्रिया। स्वाध्यायस्तु तदेवैकमप्रमत्तस्य योगिनः ॥४१॥ गुणशीलानि सर्वाणि धर्मश्चात्यन्तनिर्मलः। सम्भाव्यते परं ज्योतिस्तदेकमनुतिष्ठतः ॥४२॥ तदेवैकं परं रत्नं सर्वशास्त्र-

महोदधेः । रमणीयेषु सर्वेषु तदेकं पुरतः स्थितम् ॥४३॥ तदेवैकं परं तत्त्वं तदेवैकं परं पदम् । भव्याराध्यं तदेवैकं तदेवैकं परं महः ॥४४॥ शस्त्रं जन्मतरुच्छेदि तदेवैकं सतां मतम् । योगिनां योगनिष्ठानां तदेवैकं प्रयोजनम् ॥४५॥ मुमुक्षूणां तदेवैकं मुक्तेः पन्था न चापरः । आनन्दोऽपि न चान्यत्र तद्विहाय विभाव्यते ॥४६॥ संसारघोरघर्मेण सदा तप्तस्य देहिनः । यन्त्रधारागृहं शान्तं तदेव हिमशीतलम् ॥४७॥ तदेवैकं परं दुर्गमगम्यं कर्मविद्विषाम् । तदेवैतत्तिरस्कारकारि सारं निजं बलम् ॥४८॥ तदेव महती विद्या स्फुरन्मन्त्रस्तदेव हि । औषधं तदपि श्रेष्ठं जन्मव्याधिविनाशनम् ॥४९॥ अक्षयस्याक्षयानन्दमहाफलभरश्रियः । तदेवैकं परं बीजं निःश्रेयसलसत्तरोः ॥५०॥ तदेवैकं परं विद्धि त्रैलोक्यगृहनायकम् येनैकेन विना शङ्के वसदप्येतदुद्वसम् ।५१।शुद्धं यदेव चैतन्यं तदेवाहं न संशयः । कल्पनयानयाप्येतद्धीनमानन्दमन्दिरम् ।५२। स्पृहा मोक्षेपि मोहोत्था तन्निषेधाय जायते । अन्यस्मै तत्कथं शान्ता स्पृहयन्ति मुमुक्षवः ।५३। अहं चैतन्यमेवैकं नान्यत्किमपि जातुचित् । सम्बन्धोऽपि न केनापि दृढपक्षो ममेदृशः ॥५४॥ शरीरादिबहिश्चिन्ताचक्रसम्पर्कवर्जितम् । विशुद्धात्मस्थितं चित्तं कुर्वन्नास्तेनिरन्तरम् ।५५। एवं सति यदेवास्ति तदस्तु किमिहापरैः । आसाद्यात्मन्निदं तत्त्वं शान्तो भव सुखी भव ॥५६॥ अपारजन्मसन्तानपथभ्रान्तिकृतश्रमम् । तत्त्वामृतमिदं पीत्वा नाशयन्तु मनीषिणः ॥५७। अतिसूक्ष्ममतिस्थूलमेकं चानेकमेव तत् । स्वसंवेद्यमवेद्यञ्च यदक्षरमनक्षरम् ॥५८॥ अनौपम्यमनिर्देश्यम-

प्रमेयमनाकुलम् । शून्यं पूर्वं च यन्नित्यमनित्यं च प्रचक्ष्यते ।५९
निश्शरीरं निरालम्बं निश्शब्दं निरुपाधि यत् । चिदात्मकं परं ज्योतिर्वाङ्मानसगोचरम् ॥६०॥ इत्यत्र गहनेऽत्यन्तदुर्लक्ष्ये परमात्मनि । उच्यते यत्तदाकाशं प्रत्यालेख्यं विलिख्यते ॥६१॥ आस्तां तत्र स्थितो यस्तु चिंतामात्रपरिग्रहः । तस्यात्र जीवितं श्लाघ्यं देवैरपि स पूज्यते ॥६२॥ सर्वविद्भिरसंसारैः सम्यग्ज्ञानविलोचनैः । एतस्योपासनोपायः साम्यमेकमुदाहृतम् ॥६३॥ साम्यं स्वास्थ्यं समाधिश्च योगश्चेतोनिरोधनम् । शुद्धोपयोग इत्येते भवन्त्येकार्थवाचकाः ॥६४॥ नाकृतिर्नाक्षरं वर्णो नो विकल्पश्च कश्चन । शुद्धचैतन्यमेवैकं यत्र तत्साम्यमुच्यते ॥६५॥ साम्यमेकं परं कार्यं साम्यं तत्त्वं परं स्मृतम् । साम्यं सर्वोपदेशानामुपदेशो विमुक्तये ॥६६॥ साम्यं सद्बोधनिर्माणं शश्वदानन्दमन्दिरम् । साम्यं शुद्धात्मनो रूपं द्वारं मोक्षैकसद्मनः ॥६ ॥ साम्यं निश्शेषशास्त्राणां सारमाहुर्विपश्चितः । साम्यं कर्ममहादावदाहे दावानलायते ॥६८॥ साम्यं शरण्यमित्याहुर्योगिनां योगगोचरम् । उपाधिरचिताशेषं दोषक्षपणकारणम् ॥६९॥ निस्पृहायाणिमाद्यब्जखण्डे साम्यसरोजुषे । हंसाय शुचये मुक्तिहंसीदत्तदृशे नमः ॥७०॥ ज्ञानिनोऽमृतसंगाय मृत्युस्तापकरोऽपि सन् । आमकुम्भस्य लोकेऽस्मिन् भवेत् पाकविधिर्यथा ॥७१॥ मानुष्यं सत्कुले जन्म लक्ष्मीर्बुद्धिः कृतज्ञता । विवेकेन विना सर्वं सदप्येतन्न किञ्चन ॥७२॥ चिदचिद्द्वे परे तत्त्वे विवेकस्तद्विवेचनम् । उपादेयमुपादेयं हेयं हेयञ्च कुर्वतः ॥७३॥ दुःखं किञ्चित्सुखं

किञ्चिच्चिन्न भाति जडात्मनः। संसारेऽत्र पुनर्नित्यं सर्वं दुःखं विवेकिनः ॥७४॥ हेयञ्च कर्म रागादि तत्कार्यञ्च विवेकिनः। उपादेयं परं ज्योतिरुपयोगैकलक्षणम् ।७५॥ यदेव चैतन्यमहं तदेव, तदेव जानाति तदेव पश्यति। तदेव चैकं परमस्ति निश्चयाद् गतोऽस्मि भावेन तदेकतां परम् ॥७६॥ एकत्वसप्ततिरियं सुरसिन्धुरुच्चैः श्रीपद्मनन्दिहिमभूधरतः प्रसूता। यो गाहते शिवपदाम्बुनिधिं प्रविष्टामेतां लभेत स नरः परमां विशुद्धिम् ॥ ७७॥ संसारसागरसमुत्तरणैकसेतुमेव सतां सदुपदेशमुपाश्रिताताम्। कुर्यात्पदं मललवोऽपि किमन्तरङ्गे सम्यक् समाधिविधिसन्निधिनिस्तरङ्गे ॥७८॥ आत्मा भिन्नस्तदनुगतिमत्कर्म भिन्नं तयोर्या, प्रत्यासत्तेर्भवति विकृतिः सापि भिन्ना तथैव। कालक्षेत्रप्रमुखमपि यत्तच्च भिन्नं मतं मे, भिन्नं भिन्नं निजगुणकलालङ्कृतं सर्वमेतत् ॥७९॥ येऽभ्यासयन्ति कथयन्ति विचारयन्ति, सम्भावयन्ति च मुहुर्मुहुरात्मतत्त्वम्। ते मोक्षमक्षयमनूनमनन्तसौख्यम्, क्षिप्रं प्रयान्ति नवकेवललब्धिरूपम् ॥८०॥

॥ इति पद्मनन्द्याचार्यविरचिता एकत्वसप्ततिः समाप्ता ॥

तत्त्वार्थसूत्रम्

(आचार्यश्रीमदुमास्वामिविरचितं)

सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः ॥१॥ तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् ॥ २ ॥ तन्निसर्गादधिगमाद्वा ॥ ३ ॥ जीवाजीवास्रवबन्धसंवरनिर्जरामोक्षास्तत्त्वम् ॥ ४ ॥ नामस्थापनाद्रव्यभावतस्तन्न्यासः ॥ ५ ॥ प्रमाणनयैरधिगमः ॥ ६ ॥ निर्देशस्वामित्वसाधनाऽधिकरणस्थितिविधानतः ॥ ७ ॥ सत्संख्याक्षेत्रस्पर्शनकालान्तरभावाल्पबहुत्वैश्च ॥८॥ मतिश्रुतावधिमनःपर्ययकेवलानि ज्ञानम् ॥ ९ ॥ तत्प्रमाणे ॥ १० ॥ आद्ये परोक्षम् ॥ ११ ॥ प्रत्यक्षमन्यत् ॥ १२ ॥ मतिः स्मृतिः संज्ञा चिन्ताऽभिनिबोध इत्यनर्थान्तरम् ॥ १३ ॥ तदिन्द्रियानिन्द्रियनिमित्तम् ॥ १४ ॥ अवग्रहेहावायधारणाः ॥ १५ ॥ बहुबहुविधक्षिप्राऽनिःसृताऽनुक्तध्रुवाणां सेतराणाम् ॥ १६ ॥ अर्थस्य ॥१७॥ व्यञ्जनस्यावग्रहः ॥१८॥ न चक्षुरनिन्द्रियाभ्याम् ॥ १९ ॥ श्रुतं मतिपूर्वं द्व्यनेकद्वादशभेदम् ॥ २० ॥ भवप्रत्ययोऽवधिर्देवनारकाणाम् ॥ २१ ॥ क्षयोपशमनिमित्तः षड्विकल्पः शेषाणाम् ॥ २२ ॥ ऋजुविपुलमती मनःपर्ययः ॥ २३ ॥ विशुद्ध्यप्रतिपाताभ्यां तद्विशेषः॥२४ विशुद्धिक्षेत्रस्वामिविषयेभ्योऽवधिमनःपर्यययोः ॥ २५ ॥ मतिश्रुतयोर्निबन्धो द्रव्येष्वसर्वपर्यायेषु ॥ २६॥ रूपिष्ववधेः॥२७॥ तदनन्तभागे मनःपर्ययस्य ॥२८॥ सर्वद्रव्यपर्यायेषु केवलस्य॥२९॥

एकादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥ ३० ॥ मतिश्रुतावधयो विपर्ययश्च ॥ ३१ ॥ सदसतोरविशेषाद्यदृच्छो-पलब्धेरुन्मत्तवत् ॥ ३२ ॥ नैगमसंग्रहव्यवहारर्जुसूत्रशब्दसमभि-रूढैवंभूता नयाः ॥ ३३ ॥

इति पूज्यपादश्रीमदुमास्वामिविरचिते तत्त्वार्थाधिगमे मोक्षशास्त्रे प्रथमोऽध्यायः

औपशमिकक्षायिकौ भावौ मिश्रश्च जीवस्य स्वतत्त्वमौदयिक-पारिणामिकौ च ॥१॥ द्विनवाष्टादशैकविंशतित्रिभेदा यथाक्रमम् ॥ २ ॥ सम्यक्त्वचारित्रे । ३ ॥ ज्ञानदर्शनदानलाभभोगोपभोग-वीर्याणि च ॥ ४ ॥ ज्ञानाज्ञानदर्शनलब्धयश्चतुस्त्रित्रिपञ्चभेदाः सम्यक्त्वचारित्रसंयमासंयमाश्च ॥ ५ ॥ गतिकषायलिङ्गमिथ्या-दर्शनाऽज्ञानाऽसंयताऽसिद्धलेश्याश्चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः ॥ ६ ॥ जीवभव्याऽभव्यत्वानि च ॥७॥ उपयोगो लक्षणम् ॥८॥ स द्विविधोऽष्टचतुर्भेदः ॥ ९ ॥ संसारिणो मुक्ताश्च ॥ १० ॥ समनस्काऽमनस्काः ॥ ११ ॥ संसारिणस्त्रसस्थावराः ॥ १२ ॥ पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः ॥१३॥ द्वीन्द्रियादयस्त्रसाः ॥१४॥ पञ्चेन्द्रियाणि ॥ १५ ॥ द्विविधानि ॥ १६ ॥ निर्वृत्युप-करणे द्रव्येन्द्रियम् ॥ १७ ॥ लब्ध्युपयोगौ भावेन्द्रियम् ॥ १८॥ स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि ॥ १९ ॥ स्पर्शरसगन्धवर्णशब्दा-स्तदर्थाः ॥ २० ॥ श्रुतमनिन्द्रियस्य ॥ २१ ॥ वनस्पत्यन्ता-नामेकम् ॥ २२ ॥ कृमिपिपीलिकाभ्रमरमनुष्यादीनामेकैकवृद्धानि ॥ २३ ॥ संज्ञिनः समनस्काः ॥ २४ ॥ विग्रहगतौ कर्मयोगः ॥ २५ ॥ अनुश्रेणि गतिः ॥२६ ॥ अविग्रहा जीवस्य ॥२७॥

विग्रहवती च संसारिणः प्राक् चतुर्भ्यः ॥ २८ ॥ एकसमयाऽविग्रहा ॥२९॥ एकं द्वौ त्रीन्वानाहारकः ॥ ३० ॥ सम्मूर्छनगर्भोपपादा जन्म ॥ ३१ ॥ सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः ॥ ३२ ॥ जरायुजाण्डजपोतानां गर्भः ॥ ३३ ॥ देवनारकाणामुपपादः ॥ ३४ ॥ शेषाणां सम्मूर्छनम् ॥ ३५ ॥ औदारिकवैक्रियिकाहारकतैजसकार्मणानि शरीराणि ॥३६॥ परं परं सूक्ष्मम् ॥३७॥ प्रदेशतोऽसंख्येयगुणं प्राक् तैजसात् ॥३८॥ अनन्तगुणे परे ॥३९॥ अप्रतीघाते ॥४०॥ अनादिसम्बन्धे च ॥४१॥ सर्वस्य ॥४२॥ तदादीनि भाज्यानि युगपदेकस्मिन्नाचतुर्भ्यः ॥४३॥ निरुपभोगमन्त्यम् ॥४४॥ गर्भसम्मूर्छनजमाद्यम् ॥४५॥ औपपादिकं वैक्रियिकम् ॥४६॥ लब्धिप्रत्ययं च ॥४७॥ तैजसमपि ॥४८॥ शुभं विशुद्धमव्याघाति चाहारकं प्रमत्तसंयतस्यैव ॥४९॥ नारकसम्मूर्छिनो नपुंसकानि ॥५०॥ न देवाः ॥५१॥ शेषास्त्रिवेदाः ॥५२॥ औपपादिकचरमोत्तमदेहाऽसंख्येयवर्षायुषोऽनपवर्त्यायुषः ॥

॥ इति पूज्यपादश्रीमदुमास्वामिविरचिते तत्त्वार्थाधिगमे मोक्षशास्त्रे द्वितीयोऽध्यायः ॥२॥

रत्नशर्करावालुकापङ्कधूमतमोमहातमः प्रभा भूमयो घनाम्बुवाताकाशप्रतिष्ठाः सप्ताधोऽधः ॥१॥ तासु त्रिंशत्पञ्चविंशतिपञ्चदशदशत्रिपञ्चोनैकनरकशतसहस्राणि पञ्च चैव यथाक्रमम् ॥ २ ॥ नारका नित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रियाः ॥३॥ परस्परोदीरितदुःखाः ॥४॥ संक्लिष्टासुरोदीरितदुःखाश्च प्राक्चतुर्थ्याः ॥५॥ तेष्वेकत्रिसप्तदशसप्तदशद्वाविंशति-

त्रयस्त्रिंशत्सागरोपमा सत्त्वानां परा स्थितिः ॥६॥ जम्बूद्वीपलवणोदादयः शुभनामानो द्वीपसमुद्राः ॥७॥ द्विर्द्विर्विष्कम्भाः पूर्वपूर्वपरिक्षेपिणो वलयाकृतयः ॥ ८ ॥ तन्मध्ये मेरुनाभिर्वृत्तो योजनशतसहस्रविष्कम्भो जम्बूद्वीपः ॥ ९ ॥ भरतहैमवतहरिविदेहरम्यकहैरण्यवतैरावतवर्षाः क्षेत्राणि ॥ १० ॥ तद्विभाजिनः पूर्वापरायता हिमवन्महाहिमवन्निषधनीलरुक्मिशिखरिणो वर्षधरपर्वताः ॥ ११ ॥ हेमार्जुनतपनीयवैडूर्यरजतहेममयाः ॥ १२ ॥ मणिविचित्रपार्श्वा उपरि मूले च तुल्यविस्ताराः ॥१३॥ पद्ममहापद्मतिगिञ्छकेसरिमहापुण्डरीकपुण्डरीका हृदास्तेषामुपरि ॥१४॥ प्रथमो योजनसहस्रायामस्तदर्द्धविष्कम्भो हृदः ॥ १५ ॥ दशयोजनावगाहः ॥ १६ ॥ तन्मध्ये योजनं पुष्करम् ॥ १७ ॥ तद्द्विगुणद्विगुणा हृदाः पुष्कराणि च १८॥ तन्निवासिन्यो देव्यःश्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः पल्योपमस्थितयः ससामानिकपारिषत्काः ॥ १९ ॥ गङ्गासिन्धुरोहिद्रोहितास्याहरिद्धरिकान्तासीतासीतोदानारीनरकान्तासुवर्णरूप्यकूलारक्तारक्तोदाः सरितस्तन्मध्यगाः ॥२०॥ द्वयोर्द्वयोः पूर्वाः पूर्वगाः ॥२१॥ शेषास्त्वपरगाः ॥२२॥ चतुर्दशनदीसहस्रपरिवृता गङ्गासिन्ध्वादयो नद्यः ॥ २३ ॥ भरतः षड्विंशतिपंचयोजनशतविस्तारः षट्चैकोनविंशतिभागा योजनस्य ॥ २४॥ तद्द्विगुणद्विगुणविस्तारा वर्षधरवर्षा विदेहान्ताः ॥ २५॥ उत्तरा दक्षिणतुल्याः ॥२६॥ भरतैरावतयोर्वृद्धिह्रासौ षट्समयाभ्यामुत्सर्पिण्यवसर्पिणीभ्याम् ॥ २७ ॥ ताभ्यामपरा भूमयोऽवस्थिताः ॥ २८ ॥ एकद्वित्रिपल्योपमस्थितयो हैमवतकहारिवर्षकदैवकुरवकाः ॥२९॥ तथोत्तराः ॥३०॥ विदेहेषु

सङ्ख्येयकालाः ॥३१॥ भरतस्य विष्कम्भो जम्बूद्वीपस्य नवतिशतभागः ॥३२॥ द्विर्धातकीखण्डे ॥३३॥ पुष्करार्द्धे च ॥३४॥ प्राङ् मानुषोत्तरान्मनुष्याः ॥३५॥ आर्य्या म्लेच्छाश्च ॥३६॥ भरतैरावतविदेहाः कर्मभूमयोऽन्यत्र देवकुरूत्तरकुरुभ्यः ॥३७॥ नृस्थिती परावरे त्रिपल्योपमान्तर्मुहूर्ते ॥३८॥ तिर्यग्योनिजानां च ॥३९॥

॥ इति पूज्यपादश्रीमदुमास्वामिविरचिते तत्त्वार्थाधिगमे मोक्षशास्त्रे तृतीयोऽध्यायः ॥३॥

देवाश्चतुर्णिकायाः ॥१॥ आदितस्त्रिषु पीतान्तलेश्याः ॥२॥ दशाष्टपञ्चद्वादशविकल्पाः कल्पोपपन्नपर्यन्ताः ॥३॥ इन्द्रसामानिकत्रायस्त्रिंशपारिषदात्मरक्षलोकपालानीकप्रकीर्णकाभियोग्यकिल्बिषिकाश्चैकशः ॥४॥ त्रायस्त्रिंशलोकपालवर्ज्या व्यन्तरज्योतिष्काः ॥५॥ पूर्वयोर्द्वीन्द्राः ॥६॥ कायप्रवीचारा आ ऐशानात् ॥७॥ शेषाः स्पर्शरूपशब्दमनःप्रवीचाराः ॥८॥ परेऽप्रवीचाराः ॥९॥ भवनवासिनोऽसुरनागविद्युत्सुपर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ॥१०॥ व्यन्तराः किन्नरकिम्पुरुषमहोरगगन्धर्वयक्षराक्षसभूतपिशाचाः ॥११॥ ज्योतिष्काः सूर्य्याचन्द्रमसौ ग्रहनक्षत्रप्रकीर्णकतारकाश्च ॥ १२ ॥ मेरुप्रदक्षिणा नित्यगतयो नृलोके ॥१३॥ तत्कृतः कालविभागः ॥१४॥ बहिरवस्थिताः ॥१५॥ वैमानिकाः ॥१६॥ कल्पोपपन्नाः कल्पातीताश्च ॥१७॥ उपर्युपरि ॥१८॥ सौधर्मैशानसानत्कुमारमाहेन्द्रब्रह्मब्रह्मोत्तरलान्तवकापिष्ठशुक्रमहाशुक्रशतारसहस्रारेष्वानतप्राणतयोरारणाच्युतयोर्नवसु ग्रैवेयकेषु विजयवैजयन्तजय-

न्वापराजितेषु सर्वार्थसिद्धौ च ॥१९॥ स्थितिप्रभावसुखद्युतिलेश्या विशुद्धीन्द्रियावधिविषयतोऽधिकाः ॥२०॥ गतिशरीरपरिग्रहाभिमानतो हीनाः ॥२१॥ पीतपद्मशुक्ललेश्या द्वित्रिशेषेषु ॥ २२ ॥ प्राग्ग्रैवेयकेभ्यः कल्पाः ॥२३॥ ब्रह्मलोकालया लौकान्तिकाः ॥२४॥ सारस्वतादित्यवह्न्यरुणगर्दतोयतुषिताव्याबाधारिष्टाश्च ॥२५॥ विपयादिषु द्विचरमाः ॥२६॥ औपपादिकमनुष्येभ्यः शेषास्तिर्यग्योनयः ॥२७॥ स्थितिरसुरनागसुपर्णद्वीपशेषाणां सागरोपमत्रिपल्योपमार्द्धहीनमिताः ॥ २८॥ सौधर्मैशानयोः सागरोपमे अधिके ॥ २९ ॥ सानत्कुमारमाहेन्द्रयोः सप्त ॥ ३० ॥ त्रिसप्तनवैकादशत्रयोदशपंचदशभिरधिकानि तु ॥ १॥ आरणाच्युतादूर्ध्वमेकैकेन नवसुग्रैवेयकेषु विजयादिषु सर्वार्थसिद्धौ च ॥३२॥ अपरा पल्योपममधिकम् ॥३३॥ परतः परतः पूर्वापूर्वानन्तराः ॥३४॥ नारकाणां च द्वितीयादिषु ॥३५॥ दशवर्षसहस्राणि प्रथमायाम् ॥ ३६ ॥ भवनेषु च ॥ ३७ ॥ व्यन्तराणां च ॥ ३८ ॥ परा पल्योपममधिकं ॥३९॥ ज्योतिष्काणां च ॥ ४० ॥ तदष्टभागोऽपरा ॥ ४१ ॥ लोकान्तिकानामष्टौ सागरोपमाणि सर्वेषाम् ॥४२ ॥

॥ इति पूज्यपादश्रीमदुमास्वामिविरचिते तत्वार्थाधिगमे मोक्षशास्त्रे चतुर्थोऽध्यायः ॥४॥

अजीवकाया धर्माधर्माकाशपुद्गलाः ॥ १ ॥ द्रव्याणि ॥२॥ जीवाश्च ॥३॥ नित्यावस्थितान्यरूपाणि ॥४॥ रूपिणः पुद्गलाः ॥५॥ आ आकाशादेकद्रव्याणि ॥६॥ निष्क्रियाणि च ॥ ७ ॥ असङ्ख्येयाः प्रदेशाः धर्माधर्मैकजीवानाम् ॥८॥ आकाशस्या-

नन्ताः ॥९॥ सङ्ख्येयासङ्ख्येयाश्च पुद्गलानाम् ॥१०॥नाणोः ॥११॥ लोकाकाशेऽवगाहः॥१२॥धर्माधर्मयोः कृत्स्ने ॥१३॥ एकप्रदेशादिषु भाज्यः पुद्गलानाम् ॥१४॥ असङ्ख्येयभागादिषु जीवानाम् ॥१५॥ प्रदेशसंहारविसर्पाभ्यां प्रदीपवत् ॥१६॥ गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकारः ॥१७॥ आकाशस्यावगाहः ॥१८॥ शरीरवाङ्मनःप्राणापानाः पुद्गलानाम् ॥१९॥ सुखदुःखजीवितमरणोपग्रहाश्च ॥२०॥ परस्परोपग्रहो जीवानाम् ॥२१॥ वर्तनापरिणामक्रियाः परत्वापरत्वे च कालस्य ॥२२॥ स्पर्शरसगन्धवर्णवन्तः पुद्गलाः ॥२३॥ शब्दबन्धसौक्ष्म्यस्थौल्यसंस्थानभेदतमश्छायाऽऽतपोद्योतवन्तश्च ॥२४॥ अणवस्कन्धाश्च ॥२५॥ भेदसङ्घातेभ्य उत्पद्यन्ते ॥२६॥ भेदादणुः ॥२७॥ भेदसङ्घाताभ्यां चाक्षुषः ॥२८॥ सद्द्रव्यलक्षणम् ॥२९॥ उत्पादव्ययध्रौव्ययुक्तं सत् ॥३०॥ तद्भावाव्ययं नित्यम् ॥३१॥ अर्पितानर्पितसिद्धेः ॥३२॥ स्निग्धरूक्षत्वाद्बन्धः ॥३३॥ न जघन्यगुणानाम् ॥३४॥ गुणसाम्ये सदृशानाम् ॥३५॥ द्व्यधिकादिगुणानां तु ॥३६॥ बन्धेऽधिकौ पारिणामिकौ च ॥३७॥ गुणपर्ययवद्द्रव्यम् ॥३८॥ कालश्च ॥३९॥ सोऽनन्तसमयः ॥४०॥ द्रव्याश्रया निर्गुणागुणाः ॥४१॥ तद्भावःपरिणामः ॥४२॥

इति तत्त्वार्थाधिगमे पूज्यपादश्रीमदुमास्वामिविरचिते मोक्षशास्त्रे पञ्चमोऽध्यायः ॥ ५ ॥

कायवाङ्मनःकर्मयोगः ॥१॥ स आस्रवः ॥२॥ शुभः पुण्यस्याशुभःपापस्य ॥३॥ सकषायाकषाययोः साम्परायिकेर्यापथयोः ॥४॥ इन्द्रियकषायाव्रतक्रियाः पञ्चचतुःपञ्चपञ्च-

विंशतिसंख्याः पूर्वस्य भेदाः ॥ ५ ॥ तीव्रमन्दज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः ॥ ६ ॥ अधिकरणं जीवाजीवाः ॥ ७ ॥ आद्यं संरम्भसमारम्भारम्भयोगकृतकारितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः ॥८॥ निर्वर्तनानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः परम् ॥ ९ ॥ तत्प्रदोषनिन्हवमात्सर्यान्तरायासादनोपघाता ज्ञानदर्शनावरणयोः ॥ १० ॥ दुःखशोकतापाक्रन्दनवधपरिदेवनान्यात्मपरोभयस्थानान्यसद्वेद्यस्य ॥ ११ ॥ भूतव्रत्यनुकम्पादानसरागसंयमादियोगः क्षान्तिः शौचमिति सद्वेद्यस्य ॥ १२ ॥ केवलिश्रुतसङ्घधर्मदेवावर्णवादो दर्शनमोहस्य ॥१३॥ कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य ॥१४॥ बह्वारम्भपरिग्रहत्वं नारकस्यायुषः ॥१५॥ माया तैर्यग्योनस्य ॥१६॥ अल्पारम्भपरिग्रहत्वं मानुषस्य ॥१७॥ स्वभावमार्दवं च ॥१८॥ निःशीलव्रतित्वं च सर्वेषाम्॥१९॥ सरागसंयमसंयमासंयमाकामनिर्जराबालतपांसि दैवस्य ॥२०॥ सम्यक्त्वं च ॥२१॥ योगवक्रता विसंवादनं चाशुभस्य नाम्नः ॥ २२ ॥ तद्विपरीतं शुभस्य ॥ २३ ॥ दर्शनविशुद्धिर्विनयसम्पन्नता शीलव्रतेष्वनतीचारोऽभीक्ष्णज्ञानोपयोगसंवेगौ शक्तितस्त्यागतपसी साधुसमाधिर्वैयावृत्त्यकरणमर्हदाचार्यबहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना प्रवचनवत्सलत्वमिति तीर्थकरत्वस्य ॥ २४ ॥ परात्मनिन्दाप्रशंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य ॥२५॥ तद्विपर्ययौ नीचैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥ २६ ॥ विघ्नकरणमन्तरायस्य ॥ २७ ॥

इति पूज्यपाद श्रीमदुमास्वामिविरचिते तत्त्वार्थाधिगमे मोक्षशास्त्रे षष्ठोऽध्यायः ६

हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् ॥१॥ देशसर्वतोऽणुमहती ॥ २ ॥ तत्स्थैर्यार्थं भावनाः पञ्च पञ्च ॥३॥ वाङ्मनोगुप्तीर्यादाननिक्षेपणसमित्यालोकितपानभोजनानि पञ्च ॥ ४ ॥ क्रोधलोभभीरुत्वहास्यप्रत्याख्यानान्यनुवीचीभाषणं च पंच ॥ ५ ॥ शून्यागारविमोचितावासपरोपरोधाकरणभैक्ष्यशुद्धिसधर्माविसंवादाः पंच ॥ ६ ॥ स्त्रीरागकथाश्रवणतन्मनोहराङ्गनिरीक्षणपूर्वरतानुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः पंच ॥ ७ ॥ मनोज्ञामनोज्ञेन्द्रियविषयरागद्वेषवर्जनानि पंच ॥ ८ ॥ हिंसादिष्विहामुत्रापायावद्यदर्शनं ॥ ९ ॥ दुःखमेव वा ॥ १० ॥ मैत्रीप्रमोदकारुण्यमाध्यस्थानि च सत्त्वगुणाधिकक्लिश्यमानाविनयेषु ॥ ११ ॥ जगत्कायस्वभावौ वा संवेगवैराग्यार्थम् ॥१२॥ प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा ॥ १३ ॥ असदभिधानमनृतम् ॥ १४ ॥ अदत्तादानं स्तेयम् ॥१५॥ मैथुनमब्रह्म ॥१६॥ मूर्च्छा परिग्रहः ॥१७॥ निःशल्यो व्रती ॥१८॥ अगार्यनगारश्च ॥१९॥ अणुव्रतोऽगारी ॥२०॥ दिग्देशानर्थदण्डविरतिसामायिकप्रोषधोपवासोपभोगपरिभोगपरिमाणातिथिसंविभागव्रतसम्पन्नश्च ॥२१॥ मारणान्तिकीं सल्लेखनां जोषिता ॥ २२ ॥ शङ्काकाङ्क्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः सम्यग्दृष्टेरतीचाराः ॥ २३ ॥ व्रतशीलेषु पंच पंच यथाक्रमम् ॥ २४ ॥ बन्धवधच्छेदातिभारारोपणान्नपाननिरोधाः ॥ २५ ॥ मिथ्योपदेशरहोभ्याख्यानकूटलेखक्रियान्यासापहारसाकारमन्त्रभेदाः ॥ २६ ॥ स्तेनप्रयोगतदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानोन्मानप्रतिरूपकव्यवहाराः ॥२७॥ परविवाहकरणेत्वरिकापरिगृहीतापरिगृहीतागमनानङ्गक्री-

ढाकामतीव्राभिनिवेशाः ॥२८॥ क्षेत्रवास्तुहिरण्यसुवर्णधनधान्य-दासीदासकुप्यप्रमाणातिक्रमाः ॥२६॥ ऊर्ध्वाधस्तिर्यग्व्यतिक्रम-क्षेत्रवृद्धिस्मृत्यन्तराधानानि ॥३०॥ आनयनप्रेष्यप्रयोगशब्दरूपा-नुपातपुद्गलक्षेपाः ॥३१॥ कन्दर्पकौत्कुच्यमौखर्यासमीक्ष्याधि-करणोपभोगपरिभोगानर्थक्यानि ॥३२॥ योगदुःप्रणिधानानाद-रस्मृत्यनुपस्थानानि ॥३३॥ अप्रत्यवेक्षिताप्रमार्जितोत्सर्गादान-संस्तरोपक्रमणानादरस्मृत्यनुपस्थानानि ॥३४॥ सचित्तसम्बन्ध-सम्मिश्राभिषवदुःपक्वाहाराः ॥ ३५ ॥ सचित्तनिक्षेपापिधानपर-व्यपदेशमात्सर्यकालातिक्रमाः ॥ ३६ ॥ जीवितमरणाशंसामित्रा-नुरागसुखानुबन्धनिदानानि ॥३७॥ अनुग्रहार्थं स्वस्यातिसर्गो-दानम् ॥ ३८ ॥ विधिद्रव्यदातृपात्रविशेषात्तद्विशेषः ॥ ३९ ॥

॥ इति पूज्यपादश्रीमदुमास्वामिविरचिते तत्वार्थाधिगमे मोक्षशास्त्रे सप्तमोऽध्यायः ॥७॥

मिथ्यादर्शनाविरतिप्रमादकषाययोगा बन्धहेतवः ॥ १ ॥ सकषायत्वाज्जीवः कर्मणो योग्यान्पुद्गलानादत्ते स बन्धः ॥२॥ प्रकृतिस्थित्यनुभागप्रदेशास्तद्विधयः ॥ ३ ॥ आद्यो ज्ञानदर्शना-वरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायाः ॥ ४ ॥ पञ्चनवद्व्यष्टा-विंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चभेदा यथाक्रमम् ॥ ५ ॥ मतिश्रु-तावधिमनःपर्ययकेवलानाम् ॥ ६ ॥ चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचलाप्रचलाप्रचलास्त्यानगृद्धयश्च ॥७॥ सदस-द्वेद्ये ॥८॥ दर्शनचारित्रमोहनीयाकषायकषायवेदनीयाख्यास्त्रि-द्विनवषोडशभेदाः सम्यक्त्वमिथ्यात्वतदुभयान्यकषायकषायौ हास्यरत्यरतिशोकभयजुगुप्सास्त्रीपुन्नपुंसकवेदा अनन्तानुबन्ध-

प्रत्याख्यानप्रत्याख्यानसंज्वलनविकल्पाश्चैकशः क्रोधमानमाया-लोभाः ॥ ९ ॥ नारकतैर्यग्योनमानुषदैवानि ॥१०॥ गतिजाति-शरीराङ्गोपाङ्गनिर्माणबन्धनसङ्घातसंस्थानसंहननस्पर्शरसगन्ध-वर्णानुपूर्व्यगुरुलघूपघातपरघातातपोद्योतोच्छ्वासविहायोगतयः प्रत्येकशरीरत्रससुभगसुस्वरशुभसूक्ष्मपर्याप्तिस्थिरादेययशःकीर्ति-सेतराणि तीर्थकरत्वं च ॥११॥ उच्चैर्नीचैश्च ॥१२॥ दानलाभ-भोगोपभोगवीर्याणाम् ॥ १३ ॥ आदितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटीकोट्यः परा स्थितिः ॥१४॥ सप्ततिर्मोहनीयस्य ॥१५॥ विंशतिर्नामगोत्रयोः ॥१६॥ त्रयस्त्रिंश-त्सागरोपमाण्यायुषः ॥१७॥ अपरा द्वादशमुहूर्ता वेदनीयस्य ॥ १८॥ नामगोत्रयोरष्टौ ॥१९॥ शेषाणामन्तर्मुहूर्ता ॥२०॥ विपाकोऽ-नुभवः ॥२१॥ स यथानाम ॥२२॥ ततश्च निर्जरा ॥ २३ ॥ नामप्रत्ययाःसर्वतोयोगविशेषात्सूक्ष्मैकक्षेत्रावगाहस्थिताःसर्वात्म-प्रदेशेष्वनन्तानन्तप्रदेशाः ॥ २४ ॥ सद्वेद्यः शुभायुर्नामगोत्राणि पुण्यम् ॥ २५ ॥ अतोऽन्यत्पापम् ॥ २६ ॥

॥ इति पूज्यपादश्रीमदुमास्वामिविरचिते तत्त्वार्थाधिगमे मोक्षशास्त्रे अष्टमोऽध्यायः ॥८॥

आस्रवनिरोधः संवरः ॥१॥ स गुप्तिसमितिधर्मानुप्रेक्षापरी-षहजयचारित्रैः ॥ २ ॥ तपसा निर्जरा च ॥ ३ ॥ सम्यग्योगनि-ग्रहो गुप्तिः ॥४॥ ईर्याभाषैषणादाननिक्षेपोत्सर्गाः समितयः॥५॥ उत्तमक्षमामार्दवार्जवसत्यशौचसंयमतपस्त्यागाकिञ्चन्य ब्रह्मच-र्याणि धर्मः ॥६॥ अनित्याशरणसंसारैकत्वान्यत्वाशुच्या-स्रवसंवरनिर्जरालोकबोधिदुर्लभधर्मस्वाख्याततत्त्वानुचिन्तनमनु-

प्रेक्षाः ॥७॥ मार्गाच्यवननिर्जरार्थं परिषोढव्याः परीषहाः ॥८॥ क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्य्यानिषद्याशय्याक्रोशवधयाञ्चालाभरोगतृणस्पर्शमलसत्कारपुरस्कारप्रज्ञाज्ञानादर्शनानि ॥९॥ सूक्ष्मसाम्परायछद्मस्थवीतरागयोश्चतुर्दश ॥१०॥ एकादश जिने ॥११॥ बादरसाम्पराये सर्वे ॥१२॥ ज्ञानावरणे प्रज्ञाज्ञाने ॥१३॥ दर्शनमोहान्तराययोरदर्शनालाभौ ॥ १४ ॥ चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाञ्चासत्कारपुरस्काराः ॥ १५ ॥ वेदनीये शेषाः ॥ १६ ॥ एकादयो भाज्या युगपदेकस्मिन्नेकोनविंशतिः ॥ १७ ॥ सामायिकच्छेदोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्पराययथाख्यातमिति चारित्रम् ॥ १८ ॥ अनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशा बाह्यं तपः ॥१९॥ प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानान्युत्तरम् ॥ २० ॥ नवचतुर्दशपञ्चद्विभेदा यथाक्रमं प्राग्ध्यानात् ॥ २१ ॥ आलोचनाप्रतिक्रमणतदुभयविवेकव्युत्सर्गतपश्छेदपरिहारोपस्थापनाः ॥ २२ ॥ ज्ञानदर्शनचारित्रोपचाराः ॥ २३ ॥ आचार्योपाध्यायतपस्विशैक्ष्यग्लानगणकुलसंघसाधुमनोज्ञानाम् ॥२४॥ वाचनापृच्छनानुप्रेक्षाम्नायधर्मोपदेशाः ॥२५॥ बाह्याभ्यन्तरोपध्योः ॥ २६ ॥ उत्तमसंहननस्यैकाग्रचिन्तानिरोधो ध्यानमान्तर्मुहूर्तात् ॥२७॥ आर्तरौद्रधर्म्यशुक्लानि ॥२८॥ परे मोक्षहेतू ॥ २९ ॥ आर्तममनोज्ञस्य सम्प्रयोगे तद्विप्रयोगाय स्मृतिसमन्वाहारः ॥३०॥ विपरीतं मनोज्ञस्य ॥ ३१ ॥ वेदनायाश्च ॥ ३२ ॥ निदानं च ॥३३॥ तदविरतदेशविरतप्रमत्तसंयतानाम् ॥ ३४ ॥ हिंसानृतस्तेयविषयसंरक्षणेभ्यो रौद्रमविरत-

देशविरतयोः ॥३५॥ आज्ञापायविपाकसंस्थानविचयाय धर्म्यम् ॥३६॥ शुक्ले चाद्ये पूर्वविदः ॥३७॥ परे केवलिनः ॥३८॥ पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युपरतक्रियानिवर्तीनि ॥३९॥ त्र्येकयोगकाययोगायोगानाम् ॥ ४० ॥ एकाश्रये सवितर्कवीचारे पूर्वे ॥ ४१ ॥ अवीचारं द्वितीयम् ॥ ४२ ॥ वितर्कः श्रुतम् ॥४३॥ वीचारोऽर्थव्यञ्जनयोगसंक्रान्तिः ॥४४॥ सम्यग्दृष्टिश्रावकविरतानन्तवियोजकदर्शनमोहक्षपकोपशमकोपशान्तमोहक्षपकक्षीणमोहजिनाः क्रमशोऽसंख्येयगुणनिर्जराः ॥४५॥ पुलाकबकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्थाः ॥४६॥ संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपादस्थानविकल्पतः साध्याः ॥ ४७ ॥

॥ इति पूज्यपादश्रीमदुमास्वामिविरचिते तत्त्वार्थाधिगमे मोक्षशास्त्रे नवमोऽध्यायः ॥९॥

मोहक्षयाज्ज्ञानदर्शनावरणान्तरायक्षयाच्च केवलम् ॥ १ ॥ बन्धहेत्वभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षो मोक्षः ॥ २ ॥ औपशमिकादिभव्यत्वानां च ॥ ३ ॥ अन्यत्र केवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः ॥ ४ ॥ तदनन्तरमूर्ध्वं गच्छन्त्यालोकान्तात् ॥ ५ ॥ पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्च ॥६॥ आविद्धकुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्च ॥ ७ ॥ धर्मास्तिकायाभावात् ॥ ८ ॥ क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनान्तरसंख्याल्पबहुत्वतः साध्याः ॥ ९ ॥

॥ इति पूज्यपादश्रीमदुमास्वामिविरचिते तत्त्वार्थाधिगमे मोक्षशास्त्रे दशमोऽध्याय ॥१०॥

अक्षरमात्रपदस्वरहीनं व्यञ्जनसन्धिविवर्जितरेफम् । साधुभिरत्र मम क्षमितव्यं को न विमुह्यति शास्त्रसमुद्रे ॥ १ ॥ दशाध्याये परिच्छिन्ने तत्त्वार्थे पठिते सति । फलं स्यादुपवासस्य भाषितं मुनिपुङ्गवैः ॥२॥ तत्त्वार्थसूत्रकर्तारं गृद्धपिच्छोपलक्षितं । वन्दे गणीन्द्रसंजातमुमास्वामि मुनीश्वरम् ॥३॥

६—अध्यात्मसूत्र

ॐ नमः परम शुद्धाय ॥ १ ॥ शुद्धस्थितिर्हिता साध्या ॥ २ ॥ तस्याः साधिका निरुपधिदृष्टिः ॥ ३ ॥ तस्याश्च स्वभावपरभावविवेकः ॥ ४ ॥ तस्य च परीक्षा ॥ ५ ॥ सा प्रमाणात् ॥ ६ ॥ तस्यांशौ निश्चयव्यवहारनयौ ॥ ७ ॥ स्वाश्रितो निश्चयः ॥ ८ ॥ पराश्रितो व्यवहारः ॥९॥ निश्चयस्त्रेधा ॥ १० ॥ अशुद्धशुद्धपरमशुद्धभेदात् ॥ ११ ॥ यथा स्वचतुष्टयस्यैव परिणत्याऽशुद्धो जीव इत्यवलोकनमशुद्धो निश्चयः ॥ १२ ॥ शुद्धपरिणतो जीव इति शुद्धः ॥ १३ ॥ पर्यायगुणनिरपेक्षतया सामान्यभावेन द्रव्यदृष्टिः परमशुद्धनिश्चयनयः ॥ १४ ॥ उत्तरान्तर्दृष्ट्यां पूर्वोनिश्चयो व्यवहारः ॥ १५ ॥ सर्वभेदप्रतिषेधगम्यो निश्चय एव ॥ १६ ॥ निर्विकल्पकतया स्वरूपानुभवनमर्थानुभवः ॥ १७ ॥ व्यवहारश्चैकशाद्विधा ॥ १८ ॥ आश्रयनिमित्तोभयसम्बन्धका उपचरितानुपचरिता

सद्भूतसद्भूतव्यवहारा अशुद्धशुद्धपरमशुद्धनिरपेक्ष शुद्धनिरूपकाश्चेति ॥ १६ ॥ धनगृहचित्रादयो रागादेराश्रयाः ॥ २० ॥ द्रव्यकर्म निमित्तम् ॥ २१॥ नोकर्माश्रयम् ॥ २२ ॥ बुद्धिगा रागादय उपचरितासद्भूताः ॥ २३ । तेऽन्य अनुपचारितासद्भूताः ॥ २४ ॥ मतिज्ञानादय उपचरित सद्भूताः ॥ २५ ॥ ज्ञानं गुण इत्यादिरनुपचरितसद्भूताः ॥ २६ ॥ उक्तानामशुद्धनिश्चयादीनां प्ररूपणाश्च व्यवहाराः ॥ २७ ॥ अन्याश्च यावन्तो दृष्टयस्तावन्तो नयाः ॥ २८ ॥

इति अध्यात्मयोगिन्यायतीर्थक्षुल्लकवर्णि श्रीमदध्यात्मयोगि सहजानन्दवर्णिविरचिते स्वतत्त्वाधिगमे अध्यात्म-सूत्रे निश्चयव्यवहारप्ररूपकः प्रथमोऽध्यायः । इति

अथ द्वितीयोऽध्यायः

जीवपुद्गलधर्माधर्माकाशकाला द्रव्याणि ॥ १ ॥ जीवा अनन्तानन्ताः ॥ २ ॥ पुद्गलास्ततोऽप्यनन्तगुणाः ॥ ३ ॥ धर्माधर्माकाशा एकैकम् ॥ ४ ॥ कालाणवोऽसंख्याताः ॥ ५ ॥ स्वस्वपरिणत्यैवैतानि परिणमन्ते ॥ ६ ॥ अन्वयव्यतिरेक-सम्बन्धावच्छिन्नानीतराणि ॥७॥ यस्मिन् सत्येव परिणतिः सोऽन्वयः ॥ ८ ॥ नासति व्यतिरेकः ॥ ६ ॥ विवक्षितं परिणममानमुपादानम् ॥ १० ॥ अत्यन्ताभाववदन्यसंबंधानि निमित्तानि ॥ ११ ॥ यथा रागादेरुपादानमशुद्धपरिणता

जीवः ॥१२॥ निमित्तानि च कर्माणि ॥१३॥ रागाद्येऽशुद्ध-निश्चयेनात्मनः ॥ १४ ॥ निमित्तापेक्षया व्यवहारेण वा कर्मणाम् ॥ १५ ॥ शुद्धनिश्चयेन सन्त्येव न ॥ १६॥ प्रथम क्षणस्थकैवल्यस्य निमित्तं कर्मक्षयः ॥ १७ ॥ उपादानं शुद्धात्मा ॥१८॥ निश्चयेनात्मजम् ॥ १९ ॥ व्यवहारेण क्षायिकम् ॥ २० ॥ अनंतरवर्तिशुद्धीनामुपादानं शुद्धात्मा ॥२१॥ निमित्तं कालमात्रम् ॥२२॥ सम्यक्त्वाविर्भावस्यो-पादानं श्रद्धालुः ॥२३॥ श्रोतृश्रद्धाज्ञानित्वप्राप्तवस्त्ववतुदेशक देशना निमित्तम् ॥ २४ ॥ बिम्बदर्शनादीनि च ॥ २५ ॥ एवमन्येष्वपि प्रयोज्यम् ॥ २६ ॥

इति श्रीमदध्यात्मयोगि सहजानन्दविरचिते स्वतत्त्वाधिगमे अध्यात्मसूत्रे उपादाननिमित्तप्ररूपको द्वितीयोऽध्यायः ।

ॐ ——

अथ तृतीयोऽध्यायः

परिणममानःकर्ता ॥१॥ परिणामःकर्म ॥२॥ परिणतिः क्रिया ॥३॥ इति वस्तु स्वस्यैव स्वक्रिययेव स्वयं कर्ता ॥४॥ अन्यन्निमित्तमात्रम् ॥५॥ निमित्तं प्राप्योपादानं स्वप्रभाववत् ॥६॥ एषः परिणममानद्रव्यस्वभावः ॥७॥ परिणामो द्वेधा स्वभावविभावभेदात् ॥८॥ स्वभावपरिणामो नियतो वि-विधनिमित्तानपेक्षत्वात् ॥९॥ विभावपरिणामो नियता-ऽनियतश्च ॥१०॥ सकलविशेषज्ञाभ्यां ज्ञातत्वात्तत्र यदा

यदपि भवेत्तथैव भवनाच्च नियतः ॥ ११ ॥ सोऽपि प्रतिक्षण परिणतिपूर्वकः ॥ १२ ॥ विशिष्टक्रमवत्त्कगुणाभावादन्यभि-मित्तं प्राप्य भवनाच्चानियतः ॥१३॥ निमित्तसन्निधानेऽपि वस्तु स्वैकत्वगतमेव ॥ १४ ॥ परस्य परैः संबंधाभावात् ॥ १५ ॥ अन्योन्यकर्तृत्वमुपचारः ॥ १६ ॥ स्वपरिणाम-कर्तृत्वं निश्चयः ॥ १७ ॥ अशुद्धनिश्चयेनात्मना रागादि-कर्तृत्वम् ॥ १८ ॥ शुद्धनिश्चयेन स्वच्छभावकर्तृत्वम् ॥१९॥ परमशुद्धनिश्चयेनाकर्तृत्वम् ॥ २० ॥ परिणमनेनैव कर्तृत्वम् ॥ २१ ॥ विभावपरयोः कर्तृत्वबुद्धिरज्ञानम् ॥ २२ ॥ कैवल्यपरयोर्भेदविज्ञानाभावात् ॥ २३ ॥ भेदविज्ञानतः स्वस्याकर्तृत्वावधारणे सति पुनरभेदचित्स्वभावस्थैर्य शिवोपायः ॥२४॥ स च सम्यग्दर्शनज्ञानचारित्रत्रयात्मक एव ॥२५॥ सकलनयपक्षातिक्रान्तश्च ॥२६॥

इति श्रीमत्सहजानन्दविरचिते स्वतत्त्वाधिगमे अध्यात्मसूत्रे कर्तृकर्मत्वप्ररूपकः तृतीयोऽध्यायः ।

अथ चतुर्थोऽध्यायः

कषायहेतुका प्रकृतिः कर्म ॥१॥ तल्लोकबुद्धे द्विविधं पुण्यं पापं च ॥२॥ प्रत्येकं द्विधा ॥ ३॥ जीवाजीवाभ्यां भाव-द्रव्याभ्यां वा ॥४॥ सातादिविकल्पो भावपुण्यम् ॥५॥ तन्निमित्तभूतं कर्म द्रव्यपुण्यम् ॥ ६ ॥ असातादिविकल्पो

भावपापम् ॥७॥ तन्निमित्तभूतं कर्म द्रव्यपापम् ॥ ८ ॥ कर्मत्वशक्तिर्वा भावः ॥ ६ ॥ हेतुस्वभावानुभवाश्रयाभेदात्सर्व मे कम् ॥१०॥ विकारास्रवणमास्रवः ॥११॥ स्वभावच्युतिर्वन्धः ॥ १२ ॥ तावपि द्विविधौ ॥ १३ ॥ भावद्रव्याभ्यां जीवाजीवाभ्यां वा ॥ १४ ॥ ज्ञेयं हेय सर्वम् ॥१६॥ पुण्यपापास्रवबन्धविविक्त आत्मस्वभाव उपादेयः ॥१७॥ तस्योपलब्धिः शुद्धोपयोगात् ॥१८॥ स चाशुद्धोपेक्षणात् ॥१६॥ स च भेदविज्ञानात् ॥ २० ॥ तज्ज्ञानस्वभावस्य शुचिस्वभावभूतध्रुवशरणानाकुलत्वादेरास्रवादीनां तद्विपरीतत्वादेश्च परीक्षणात् ॥२१॥

इति अध्यात्मयोगिन्यायतीर्थक्षुल्लकवर्णि- श्रीमत्सहजानंदविरचिते स्वतत्त्वाधिगमे अध्यात्मसूत्रे पुण्यपापास्रवबन्धप्ररूपकश्चतुर्थोऽध्यायः ।

अथ पञ्चमोऽध्यायः

विकारानुत्पत्तिः संवरः ॥ १ ॥ स मुख्यमुपादेयं तत्त्वम् ॥ २ ॥ मोक्षमूलत्वान्मोक्षेऽपि वर्तमानत्वाच्च ।३॥ तन्मूलं स्वभावविभावयोर्भेदविज्ञानम् ॥ ४ ॥ तस्माच्छुद्धात्मरुचिः ॥५॥ ततः शुद्धात्मोपलम्भः ॥ ६ ॥ ततोऽध्यवसानाभावः ॥ ७ ॥ ततो रागद्वेषमोहानामभावः ॥ ८ ॥ ततः कर्माभावः ॥ ६ ॥ ततो नोकर्माभावः ॥ १० ॥ ततः संसाराभावः ॥ ११ ॥ संसाराभावे सदा तेषामभावः ॥१२॥

शुद्धात्मोपलम्भस्य सदा प्रवर्तमानत्वात् ॥ १३ ॥ संवरो द्वेधा ॥ १४ ॥ भावद्रव्याभ्यां जीवजीवाभ्यां वा ॥ १५ ॥ तद्द्वयं संवार्यसंवारकोभयम् ॥१६॥ संवार्यो विभावानास्रवः ॥ १७ ॥ द्रव्यास्रवश्च ॥ १८ ॥ संवारकः शुद्धपरिणामः ॥ १९ ॥ विभावनिमित्तस्याभावश्च ॥ २० ॥ संवारकसंवार्यत्वे जीवाजीवौ मुख्यौ ॥ २१ ॥ आदेयमिदम् तत्त्वमानिर्विकल्पात् ॥ २२ ॥

इति अध्यात्मयोगिक्षुल्लकवर्णिश्रीमत्सहजानन्दविरचिते स्वतत्त्वाधिगमे अध्यात्मसूत्रे भावद्रव्यसंवरप्ररूपकः पंचमोऽध्यायः ।

अथ षष्ठोऽध्यायः

विकृतिनिर्जरणं निर्जरा ॥ १ ॥ सैव मोक्षापायः ॥ २ ॥ द्वेधा ॥ ३ ॥ भावद्रव्ययोः ॥ ४ ॥ वीतरागनिर्विकल्पसमाधिर्भावनिर्जरा ॥ ५ ॥ बन्धानिमित्तं निष्फलं कर्मनिर्जरणं द्रव्यनिर्जरा ॥ ६ ॥ ते च परमार्थैकत्वद्रष्टुरेव ॥ ७ ॥ स चान्तर्बहिर्निःशङ्कितः ॥ ८ ॥ अनाकांक्षः ॥ ९ ॥ निर्विचिकित्सः ॥ १० ॥ अमूढः ॥ ११ ॥ उपगूहकः ॥ १२ ॥ शिवस्थापकः ॥ १३ ॥ धर्मवत्सलः ॥ १४ ॥ प्रभावकश्च ॥ १५ ॥ परस्थितिनिर्जरार्थम् स्वभावविभावौ विभेद्य स्वभाव उपलम्भनीयः ॥ १६ ॥ निरुपधिरुपादानकारणीभूत एकीकृतशुद्धपर्यायः स्वभावः ॥ १५ ॥ आत्मनोऽपावनायन-

न्ताहेतुकासाधारणज्ञानस्वभावः ॥ १८ ॥ तत्स्थैर्याय सकलरागविकल्पास्त्याज्याः ॥ १६ ॥ तत्त्यागाय स्वभावो दृश्यः ॥२०॥ तमभिप्रेत्य बाह्यसयोगं निवर्तयेत् ॥ २१ ॥ स्वभावमाश्रित्य स्वमिदं तयाऽनुभवेत् ॥२२॥ शुद्धचिद्रूपोऽहम् ॥ २३ ॥

इति अध्यात्मयोगिन्यायतीर्थक्षुल्लकवर्णि श्रीमत्सहजानन्दविरचिते, स्वतत्त्वाधिगमे अध्यात्मसूत्रे भावद्रव्यनिर्जराप्ररूपकः षष्ठोऽध्यायः।

अथ सप्तमोऽध्यायः

पूर्णशुद्धस्वरूपसमवस्थानं मोक्षः ॥ १ ॥ तत्सम्यग्दर्शनज्ञानचारित्रैकत्वम् ॥ २ ॥ विशुद्धज्ञानदर्शनस्वरूपनिजशुद्धात्मानुभूतिः सम्यग्दर्शनम् ॥ ३ ॥ अखण्डस्वरूपप्रतीत्या सह वस्तुज्ञप्तिः सम्यग्ज्ञानम् ॥ ४ ॥ विकल्पपरिहरणस्वभावेन ज्ञप्तिस्थितिः सम्यक्चारित्रम् ॥ ५ ॥ त्रयाणामेकत्वं ज्ञातृत्वमात्रम् ॥ ६ ॥ उपधिमोचनं वा मोक्षः ॥ ७ ॥ स बन्धच्छेदात् ॥ ८ ॥ स बन्धभावारागात् ॥९॥ स बन्धात्मनोः स्वभावभेदपरिज्ञानात् ॥ १० ॥ मोक्षो द्वेधा ॥ ११ ॥ द्रव्यभावाभ्याम् ॥ १२ ॥ तावपि द्वेधा मोक्ष्य मोक्षकभेदात् ॥ १३ ॥ भूतार्थेन स्वैकत्वमेव ॥ १४ ॥ तद्वेयं फलञ्च ॥ १५ ॥ शान्तस्वरूपम् ॥ १६ ॥ शुद्ध-

परिणतिगतो धर्मो वा ॥ १७ ॥ स्वस्ति । १८ ।

इति अध्यात्मयोगिक्षुल्लकवर्णिश्रीमत्सहजानन्दविरचिते स्वतत्त्वाधिगमे अध्यात्मसूत्रे भावद्रव्यमोक्ष प्ररूपकः सप्तमोऽध्यायः ।

अथाष्टमोऽध्यायः

पर्यायतो नानात्मगुणस्थानानि ॥ १ ॥ श्रद्धाचारित्रयोगैः ॥ २ ॥ विपरीताभिनिवेशो मिथ्यात्वम् ॥ ३ ॥ तदनादिवद्धस्यानादि ॥ ४ ॥ सम्यक्त्वच्युतस्य सादि ॥ ५ ॥ सम्यक्त्वासादने सासादनसम्यक्त्वम् ॥ ६ ॥ मिश्राभिनिवेशो मिश्रः ॥७॥ अविरतसम्यक्त्वम् ॥ ८ ॥ अंशतो विरतौ देशविरतिः ॥ ९ ॥ सर्वतः प्रमादे च प्रमत्तविरतः ॥ १० ॥ प्रमादाभावेऽप्रमत्तविरतः ॥ ११ ॥ स द्वेधा ॥ १२ ॥ स्वस्थानसातिशयभेदात् ॥ १३ ॥ प्रमत्ताप्रमत्तपरिवृत्तौ स्वस्थानी ॥ १४ ॥ सातिशयोऽधःकरणस्थः ॥ १५ ॥ ततोऽपूर्वकरणश्चारित्रमोहस्योपशमकः क्षपको वा ॥१६॥ अनिवृत्तिकरणश्च ॥ १७ ॥ अवशिष्टसूक्ष्मसाम्परायजेता च ॥ १८ ॥ उपशान्तमोहः ॥ १९ ॥ क्षीणमोहः ॥२०॥ योगेन युतः सर्वज्ञः संयोगः केवली । २१ । रहितोऽयोगः ॥२२॥ ततः सिद्धो गुणस्थानातीतः ॥२३॥ गुणस्थानानीमानि क्रमाक्रमोभयरूपेण यथागमं योज्यानि ॥२४॥ सिद्धः सर्वतः पूर्णशुद्धः ॥२५॥ ॐ नमः सिद्धाय ॥२६॥

इति अध्यात्मयोगिन्यायतीर्थक्षुल्लकवर्णि श्रीमत्सहजानन्दविरचिते अध्यात्मसूत्रे गुणस्थान संकेतकोऽष्टमोऽध्यायः ।

अथ नवमोऽध्यायः

सर्वार्थेषु सारः समयः ॥ १ ॥ सोऽनन्तशक्तिकः ॥ २ ॥ तत्र ज्ञानं मुख्यम् ॥ ३ ॥ सर्वचेतकत्वात् ॥ ४ ॥ तस्य पर्यायो द्वेधा ॥ ५ ॥ सम्यग्मिथ्याभेदात् ॥ ६ ॥ मिथ्याज्ञानमुपचारात् ॥ ७ ॥ सम्यग्ज्ञानं सम्यक्त्वसहचारात् ॥ ८ ॥ ज्ञानानि मतिश्रुतावधिमनःपर्ययकेवलानि ॥ ९ ॥ तत्र चत्वारि विकलज्ञानानि ॥ १० ॥ सकलज्ञानं केवलम् ॥ ११ ॥ वाञ्छान्तरं च्युतवर्ति ज्ञानस्वभावोपादानम् ॥ १२ ॥ अन्त्ये सम्यगेव ॥ १३ ॥ सर्वपर्यायेष्वेकरूपमखण्डं ज्ञानमात्रं विशुद्धम् ॥ १४ ॥ तदनादि ॥ १५ ॥ अनन्तम् ॥ १६ ॥ अहेतुकम् ॥ १७ ॥ परपरिणत्या परिणतिशून्यम् ॥ १८ ॥ स्वपरिणामेन परिणन्तृ ॥ १९ ॥ सर्वशक्तिगर्भम् ॥ २० ॥ विशेषताऽभेदषट्कारकविषयं ॥ २१ ॥ सामान्यतः स्वलक्षणमात्रम् ॥ २२ ॥ कर्तृभोक्त्रादिभावरहितम् ॥ २३ ॥ विकृतिमुक्त्यकल्पितम् ॥ २४ ॥ ज्ञानमयत्वादात्मैव तथा ॥ २५ ॥ तच्छ्रद्धानं सम्यग्दर्शनम् ॥ २६ ॥ तदनुभूतिः सम्यग्ज्ञानम् ॥ २७ ॥ तत्स्थैर्यं सम्यक्चारित्रम् ॥ २८ ॥ शुद्धं शुद्धं तत्स्फूर्जतु ॥ २९ ॥

इति अध्यात्मयोगिन्यायतीर्थक्षुल्लकवर्णिश्रीमत्सहजानन्दविरचिते स्वतत्त्वाधिगमे अध्यात्मसूत्रे विशुद्धज्ञानप्ररूपकः नवमोऽध्यायः।

अथ दशमोऽध्यायः

ज्ञानवृत्तिः संयमः ॥ १ ॥ विशुद्धद्रष्टुःशुभरागप्रवृत्तिर-प्युपचारात् ॥ २ ॥ संयमः पञ्चधा ॥ ३ ॥ सामायिकच्छे-दोपस्थापनापरिहारविशुद्धिसूक्ष्मसाम्परायथाख्यातसंयमभे-दात् ॥ ४ ॥ बाह्याभ्यन्तरपरिग्रहविरतसाम्यभावः सामायिकः ॥ ५ ॥ हिंसादिविरतश्छेदोपस्थापकः ॥ ६ ॥ स च भेद-संयमः ॥ ७ ॥ बुद्धिपूर्वकोऽयमेव ॥ ८ ॥ समितिगुप्तिधर्मा-नुप्रेक्षापरीषहजया भेदसंयमेऽन्तर्गता अभेदस्पर्शिनः ॥ ९ ॥ सर्वं एते जोषितव्या आनिर्विकल्पसंयमात् ॥ १० ॥ ऋद्धि-विशेषजातः प्राणिपीडापरिहारप्रवणः परिहारविशुद्धिः ॥ ११ ॥ अवशिष्टसूक्ष्मलोभपरिहाणिकुशला विशुद्धिः सूक्ष्मसाम्प-रायः ॥ १२ ॥ यथाख्यातो निरुपधिस्वभावख्यातिः ॥ १३ ॥ तदर्थं संयमः सेव्यः ॥ १४ ॥ ततः संवरनिर्जरे ॥ १५ ॥ ततः सर्वपरभावविमुक्ते मोक्षः ॥ १६ ॥ स सहजज्ञानानन्द-स्वरूपः स्वत एव ॥ १७ ॥

इति अध्यात्मयोगिन्यायतीर्थक्षुल्लकवर्णिश्रीमत्सहजानंदविरचिते स्वतत्त्वाधिगमे अध्यात्मसूत्रे संयमप्ररूपकः दशमोऽध्यायः।

— :०: —

॥ ॐ तत्सत्परमात्मने नमः ॥

पूज्य श्री क्षुल्लक मनोहरवर्णिसहजानन्दस्वामिविरचितम्

१० तत्त्वसूत्रम्

(अष्टाध्यायी)

प्रथमोऽध्यायः

ॐ । १ । तत् । २ । सत् । ३ । एकम् । ४ । नित्यम् । ५ । सप्रतिपक्षम् । ६ । अप्रतिपक्षम् । ७ । अतत् । ८ । असत् । ९ । अनेकम् । १० । क्षणिकम् । ११ । अविभक्तम् । १२ । विभक्तम् । १३ । अखण्डम् । १४ । सांशम् । १५ । स्वपरिणतम् । १६ । अस्वापरिणतम् । १७ । स्वभाववत् । १८ । अस्वाभाव्यम् । १९ । ज्ञानमात्रम् । २० ।

अथ द्वितीयोऽध्यायः

तदहम् । १ । चित् । २ । ब्रह्म । ३ । जीवः । ४ । आत्मा । ५ । ज्ञाता । ६ । द्रष्टा । ७ । अमूर्तः । ८ । कर्ता । ९ । भोक्ता । १० । अकर्ता । ११ । अभोक्ता । १२ । विभुः । १३ । अव्यापी । १४ । स्रष्टा । १५ । अस्रष्टा । १६ । शुद्धः । १७ । अशुद्धः । १८ । शक्तिमयम् । १९ । ज्ञान-मात्रम् । २० ।

अथ तृतीयोध्यायः

अहम् । १ । आनन्दः । २ । निर्विकल्पः । ३ । निष्कर्मा । ४ । निष्कलः । ५ । निर्विश्वः । ६ । दिव्यः । ७ । मधु-

बुद्धिर्देवी । ८ । दुर्गा । ९ । शक्तिः । १० । चण्डी । ११ । मुण्डी । १२ । चन्द्रघण्टा । १३ । भद्रकाली । १४ । अम्बा । १५ । सरस्वती । १६ । भगवती । १७ । तत्प्रसादाभिराकुलः । १८ । शिवमयम् । १९ । ज्ञानमात्रम् । २० ।

अथ चतुर्थोऽध्यायः

प्रभुः । १ । सर्वज्ञः । २ । सर्वदर्शी । ३ । स्वच्छः । ४ । स्वविलासः । ५ । अकार्यः । ६ । अकारणः । ७ । परिणामी ८ । अन्यूनः । ९ । अनतिरिक्तः । १० । अपरिणामी । ११ । निष्क्रियः । १२ । नियतः । १३ । अनन्तधर्मा । १४ । विरुद्धधर्मा । १५ । उपायः । १६ । उपेयः । १७ । योगिगम्यम् । १८ । स्वानुभाव्यम् । १९ । ज्ञानमात्रम् । २० ।

अथ पञ्चमोऽध्यायः

सिद्धः । १ । जिनः । २ । हरिः । ३ । हरः । ४ । ईश्वरः । ५ । परमात्मा । ६ । भगवान् । ७ । शिवः । ८ । ब्रह्मा । ९ । विष्णुः । १० । बुद्धः । ११ । रामः । १२ । ईशः । १३ । सनातनः । १४ । परमेष्ठी । १५ । शम्भुः । १६ । मुक्तः । १७ । अर्हन् । १८ । स्वयंभूः । १९ । ज्ञानमात्रम् । २० ।

अथ षष्ठोऽध्यायः

अस्वादपेत्य । १ । जडात् । २ । बन्धोः । ३ । देहात् । ४ । शब्दात् । ५ । रूपात् । ६ । गन्धात् । ७ । रसात् । ८ । स्पर्शात् । ९ । क्रोधात् । १० । मानात् । ११ । छलात्

। १२ । लोभात् । १३ । तर्कात् । १४ । भक्तेः । १५ । ध्यानात् । १६ । ज्ञेयमात्रात् । १७ । ज्ञानव्यक्तेः । १८ । ज्ञेयाकारात् । १९ । ज्ञानमात्रम् । २० ।

अथ सप्तमोऽध्यायः

तं लचे । १ । ज्ञातम् । २ । स्वजातम् । ३ । प्रतिभातम् । ४ । भूतार्थम् । ५ । सत्यार्थम् । ६ । परमार्थम् । ७ । स्वार्थम् । ८ । अबद्धम् । ९ । अस्पृष्टम् । १० । अनन्यम् । ११ । नियतम् । १२ । अविशेषम् । १३ । असंयुक्तम् । १४ । अजम् । १५ । अनन्तम् । १६ । गुप्तम् । १७ । स्वयम् । १८ । सहजम् । १९ । ज्ञानमात्रम् २० ।

अथ अष्टमोऽध्यायः

तच्छृणवानि । १ । अवगृह्णानि । २ । धारयानि । ३ । ब्रुवाणि । ४ । गच्छानि । ५ । जानीयाम् । ६ । मन्ये । ७ । इच्छामि । ८ । रोचै । ९ । प्रत्येमि । १० । श्रद्दधानि । ११ । भावयेयम् । १२ । ध्यायेयम् । १३ । स्पृशानि । १४ । प्राप्नुवाणि । १५ । प्रतपानि । १६ । अनुभवानि । १७ । संचेतानि । १८ । एकीभवेयम् । १९ । ज्ञानमात्रम् । २० ।

॥ इति तत्त्वसूत्रनाम्नी अष्टाध्यायी समाप्ता ॥

श्रीमद्देवसेनविरचिता

११ आलापपद्धतिः ।

गुणानां विस्तरं वक्ष्ये स्वभावानां तथैव च ।
पर्यायाणां विशेषेण नत्वा वीरं जिनेश्वरम् ॥

आलापपद्धतिर्वचनरचनाऽनुक्रमेण नयचक्रस्योपरि उच्यते। सा च किमर्थम्? द्रव्यलक्षणसिद्ध्यर्थम् स्वभावसिद्ध्यर्थञ्च। द्रव्याणि कानि? जीवपुद्गलधर्माधर्माकाशकालद्रव्याणि। सद्द्रव्यलक्षणम्, उत्पादव्ययध्रौव्ययुक्तं सत्। इति द्रव्याधिकारः।

लक्षणानि कानि? अस्तित्वं, वस्तुत्वं, द्रव्यत्वं, प्रमेयत्वं, अगुरुलघुत्वं, प्रदेशत्वं, चेतनत्वमचेतनत्वं मूर्तत्वममूर्तत्वं द्रव्याणां दश सामान्यगुणाः प्रत्येकमष्टावष्टौ सर्वेषाम्।

[एकैकद्रव्ये अष्टौ अष्टौ गुणाः भवन्ति। जीवद्रव्ये अचेतनत्वं मूर्तत्वं च नास्ति, पुद्गलद्रव्ये चेतनत्वममूर्तत्वंच नास्ति, धर्माधर्माकाशकालद्रव्येषु चेतनत्वं मूर्तत्वं च नास्ति। एवं द्विद्विगुणवर्जिते अष्टौ अष्टौ गुणा. प्रत्येकद्रव्ये भवन्ति।]

ज्ञानदर्शनसुखवीर्याणि स्पर्शरसगन्धवर्णाः गतिहेतुत्वं स्थितिहेतुत्वमवगाहनहेतुत्वं वर्त्तनाहेतुत्वं चेतनत्वमचेतनत्वं मूर्तत्वममूर्तत्वं द्रव्याणां षोडश विशेषगुणाः। षोडशविशेषगुणेषु जीवपुद्गलयोः षडिति। जीवस्य ज्ञानदर्शनसुखवीर्याणि चेतनत्वममूर्तत्वमिति षट्। पुद्गलस्य स्पर्शरसगन्धवर्णाः मूर्त्तत्वमचेतनत्वमिति षट्। इतरेषां धर्माधर्माकाशकालानां

प्रत्येकं त्रयो गुणाः। धर्मद्रव्ये गतिहेतुत्वममूर्तत्वमचेतनत्वमेते त्रयो गुणाः। अधर्मद्रव्ये स्थितिहेतुत्वममूर्तत्वमचेतनत्वमिति। आकाशद्रव्ये अवगाहनहेतुत्वममूर्तत्वमचेतनत्वमिति। कालद्रव्ये वर्तनाहेतुत्वममूर्तत्वमचेतनत्वमिति विशेषगुणाः। अन्तस्थाश्चत्वारो गुणाः स्वजात्यपेक्षया सामान्यगुणा विजात्यपेक्षया त एव विशेषगुणाः, इति गुणाधिकारः।

गुणविकाराः पर्यायास्ते द्वेधा स्वभावविभावपर्यायभेदात् अगुरुलघुविकाराः स्वभावपर्यायास्ते द्वादशधा षड्वृद्धिरूपाः षड्ढानिरूपाः। अनन्तभागवृद्धिः, असंख्यातभागवृद्धिः, संख्यातभागवृद्धिः, संख्यातगुणवृद्धिः, असंख्यातगुणवृद्धिः, अनन्तगुणवृद्धिः, एवं षड्वृद्धिरूपास्तथा अनन्तभागहानिः, असंख्यातभागहानिः, संख्यातभागहानिः, संख्यातगुणहानिः. असंख्यातगुणहानिः, अनन्तगुणहानिः एवं षड्ढानिरूपा ज्ञेयाः। विभावद्रव्यव्यञ्जनपर्यायश्चतुर्विधा नरनारकादिपर्यायाः अथवा चतुरशीतिलक्षा योनयः। विभावगुणव्यञ्जनपर्याया मत्यादयः। स्वभावद्रव्यव्यञ्जनपर्यायाश्चरमशरीरात्किञ्चिन्न्यूनसिद्धपर्यायाः। स्वभावगुणव्यञ्जनपर्याया अनन्तचतुष्टयस्वरूपा जीवस्य। पुद्गलस्य तु द्व्यणुकादयो विभावद्रव्यव्यञ्जनपर्यायाः। रसरसान्तरगन्धगन्धान्तरादिविभावगुणव्यञ्जनपर्यायाः। अविभागिपुद्गलपरमाणुः स्वभावद्रव्यव्यञ्जनपर्यायः। वर्णगन्धरसैकैकाविरुद्धस्पर्शद्वयं स्वभावगुणव्यञ्जनपर्यायः।

अनाद्यनिधने द्रव्ये स्वपर्यायाः प्रतिक्षणम् ।
उन्मज्जन्ति निमज्जन्ति जलकल्लोलवज्जले ॥ १ ॥
धर्माधर्मनभः काला अर्थपर्यायगोचराः ।
व्यञ्जनेन तु संबद्धौ द्वावन्यौ जीवपुद्गलौ ॥ २ ॥
इति पर्यायाधिकारः गुणपर्ययवद्द्रव्यम् ।

स्वभावाः कथ्यन्ते । अस्तिस्वभावः, नास्तिस्वभावः, नित्यस्वभावः, अनित्यस्वभावः, एकस्वभावः, अनेकस्वभावः, भेदस्वभावः, अभेदस्वभावः, भव्यस्वभावः, अभव्यस्वभावः, परमस्वभावः,द्रव्याणामेकादश सामान्यस्वभावाः । चेतनस्वभावः, अचेतनस्वभावः, मूर्तस्वभावः, अमूर्तस्वभावः, एकप्रदेशस्वभावः, अनेकप्रदेशस्वभावः,विभावस्वभावः, शुद्धस्वभावः, अशुद्धस्वभावः, उपचरितस्वभावः, एते द्रव्याणां दश विशेषस्वभावाः । जीवपुद्गलयोरेकविंशतिः चेतनस्वभावः, मूर्तस्वभावः, विभावस्वभावः, एकप्रदेशस्वभावः, अशुद्धस्वभाव एतैःपञ्चभिःस्वभावंविना धर्मादित्रयाणां षोडश स्वभावाः सन्ति । तत्र बहुप्रदेशंविना कालस्य पञ्चदश स्वभावाः ।

एकविंशतिभावाः स्युर्जीवपुद्गलयोर्मताः ।
धर्मादीनां षोडश स्युः काले पञ्चदश स्मृताः ॥३॥

ते कुतो ज्ञेयाः ? प्रमाणनयविवक्षातः । सम्यग्ज्ञानं प्रमाणम् । तद्द्वेधा प्रत्यक्षेतरभेदात् अवधिमनःपर्ययावेकदेशप्रत्यक्षौ । केवलं सकलप्रत्यक्षं । मतिश्रुते परोक्षे । प्रमाणमुक्तं । तदवयवा नयाः ।

नयभेदा उच्यन्तेः —

णिच्छयववहारणया मूलमभेयाण णयाण सव्वाणं ।
णिच्छय साहणहेओ दव्वयपज्जत्थिया मुणह ॥ ४ ॥

द्रव्यार्थिकः, पर्यायार्थिकः नैगमः, संग्रहः, व्यवहारः, ऋजुसूत्रः, शब्दः,समभिरूढः,एवंभूत इति नव नयाः स्मृताः । उपनयाश्च कथ्यन्ते । नयानां समीपा उपनयाः। सद्भूतव्यवहारः असद्भूतव्यवहारः उपचरितासद्भूतव्यवहारश्चेत्युपनयास्त्रेधा ।

इदानीमेतेषां भेदा उच्यन्ते । द्रव्यार्थिकस्य दशभेदाः ।

कर्मोपाधिनिरपेक्षः शुद्धद्रव्यार्थिको यथा संसारी जीवः सिद्धसदृक् शुद्धात्मा । उत्पादव्ययगौणत्वेन सत्ताग्राहकः शुद्धद्रव्यार्थिको यथा द्रव्यं नित्यम् । भेदकल्पनानिरपेक्षःशुद्धो-द्रव्यार्थिको यथा निजगुणपर्यायस्वभावाद्द्रव्यमभिन्नम् ।

कर्मोपाधिसापेक्षोऽशुद्धद्रव्यार्थिको यथा क्रोधादिकर्मजभाव आत्मा । उत्पादव्ययसापेक्षोऽशुद्धद्रव्यार्थिको यथैकस्मिन् समये द्रव्यमुत्पादव्ययध्रौव्यात्मकम् । भेदकल्पना-सापेक्षोऽशुद्धद्रव्यार्थिको यथात्मनो दर्शनज्ञानादयो गुणाः । अन्वयद्रव्यार्थिको तथा-गुणपर्यायस्वभावं द्रव्यम् । स्वद्रव्यादि-ग्राहकद्रव्यार्थिकोयथा-स्वद्रव्यादिचतुष्टयापेक्षया द्रव्यमस्ति । परद्रव्यादिग्राहकद्रव्यार्थिको यथा—परद्रव्यादिचतुष्टयापेक्षया द्रव्यं नास्ति । परमभावग्राहकद्रव्यार्थिको यथा—ज्ञानस्वरूप

आत्मा। अत्रानेकस्वभावानां मध्ये ज्ञानाख्यः परमस्वभावो गृहीतः।

इति द्रव्यार्थिकस्य दशभेदाः

अथ पर्यायार्थिकस्य षड्भेदा उच्यन्ते—

अनादिनित्यपर्यायार्थिको यथा पुद्गलपर्यायो नित्यो मेर्वादिः। सादिनित्यपर्यायार्थिको यथा—सिद्धपर्यायो नित्यः। सत्तागौणत्वेनोत्पादव्ययग्राहकस्वभावो नित्याशुद्धपर्यायार्थिको यथा—समयं समयं प्रति पर्याया विनाशिनः। सत्तासापेक्षस्वभावो नित्याशुद्धपर्यायार्थिको यथा—एकस्मिन् समये त्रयात्मकः पर्यायः। कर्मोपाधिनिरपेक्षस्वभावो नित्यशुद्धपर्यायार्थिको यथा—सिद्धपर्यायसदृशाः शुद्धाः संसारिणां पर्यायाः। कर्मोपाधिसापेक्षस्वभावोऽनित्याशुद्धपर्यायार्थिको यथा—संसारिणामुत्पत्तिमरणे स्तः। इति पर्यायार्थिकस्य षड् भेदाः।

नैगमस्त्रेधा भूतभाविवर्त्तमानकालभेदात्। अतीते वर्त्तमानारोपणं यत्र स भूतनैगमो यथा—अद्य दीपोत्सवदिने श्रीवर्द्धमानस्वामी मोक्षं गतः। भाविनि भूतवत्कथनं यत्र स भाविनैगमो यथा अर्हन् सिद्ध एव। कर्त्तुमारब्धमीषन्निष्पन्नमनिष्पन्नं वा वस्तु निष्पन्नवत्कथ्यते यत्र स वर्त्तमाननैगमो यथा—ओदनः पच्यते इति नैगमस्त्रेधा।

संग्रहो द्विविधः। सामान्यसंग्रहो यथा—सर्वाणि द्रव्याणि

परस्परमविरोधीनि । विशेषसंग्रहो यथा—सर्वे जीवाः परस्परमविरोधिनः इति संग्रहोऽपि द्विधा ।

व्यवहारोऽपि द्वेधा । सामान्यसंग्रहभेदको व्यवहारो यथा-द्रव्याणि जीवाजीवाः । विशेषसंग्रहभेदको व्यवहारो यथा-जीवाः संसारिणो मुक्ताश्च इति व्यवहारोऽपि द्वेधा ।

ऋजुसूत्रो द्विविधः । सूक्ष्मर्जुसूत्रो यथा—एकसमयावस्थायी पर्यायः । स्थूलर्जुसूत्रो यथा-मनुष्यादिपर्यायास्तदायुःप्रमाणकालं तिष्ठन्ति इति ऋजुसूत्रोऽपि द्वेधा ।

शब्दसमभिरूढैवंभूता नयाः प्रत्येकमेकैका नया । शब्दनयो यथा दारा भार्या कलत्रं जलं आपः । समभिरूढनयो यथा गौः पशुः । एवंभूतनयो यथा-इन्दतीति इन्द्रः । उक्ता अष्टाविंशतिर्नयभेदाः ।

उपनयभेदा उच्यन्ते-सद्भूतव्यवहारो द्विधा । शुद्धसद्भूतव्यवहारो यथा-शुद्धगुणशुद्धगुणिनोः शुद्धपर्यायशुद्धपर्यायिणोर्भेदकथनम् । अशुद्धसद्भूतव्यवहारो यथाऽशुद्धगुणाऽशुद्धगुणिनोरशुद्धपर्यायाऽशुद्धपर्यायिणोर्भेदकथनम् इति सद्भूतव्यवहारोऽपि द्वेधा ।

असद्भूतव्यवहारस्त्रेधा । स्वजात्यसद्भूतव्यवहारो यथा—परमाणुर्बहुप्रदेशीति कथनमित्यादि । विजात्यसद्भूतव्यवहारो यथा मूर्त्तं मतिज्ञानं यतो मूर्त्तद्रव्येण जनितम् । स्वजातिविजात्यसद्भूतव्यवहारो यथा ज्ञेये जीवेऽजीवे ज्ञानमिति कथनं ज्ञानस्य विषयात् । इत्यसद्भूतव्यवहारस्त्रेधा ।

उपचरितासद्भूतव्यवहारस्त्रेधा । स्वजात्युपचरितासद्भूतव्यवहारो यथा-पुत्रदारादि मम । विजात्युपचरितासद्भूतव्यवहारो यथा वस्त्राभरणहेमरत्नादि मम । स्वजातिविजात्युपचरितासद्भूतव्यवहारो यथा–देशराज्य दुर्गादि मम इत्युपचरितासद्भूतव्यवहारस्त्रेधा ।

सहभावा गुणाः, क्रमवर्तिनः पर्यायाः । गुण्यन्ते पृथक् क्रियन्ते द्रव्यं द्रव्यान्तैर्यैस्ते गुणाः । अस्तीत्येतस्य भावोऽस्तित्वं सद्रूपत्वम् । वस्तुनो भावो वस्तुत्वम्, सामान्यविशेषात्मकं वस्तु । द्रव्यस्वभावो द्रव्यत्वम् । निजनिजप्रदेशसमूहैरखण्डवृत्त्या स्वभावविभावपर्यायान् द्रवति द्रोष्यति अदुद्रवदिति द्रव्यम् । सद्द्रव्यलक्षणम्, सीदति स्वकीयान् गुणपर्यायान् गुणपर्यायान् व्याप्नोतीति सत् । उत्पादव्ययध्रौव्ययुक्तं सत् । प्रमेयस्य भावः प्रमेयत्वम् प्रमाणेन स्वपरस्वरूपपरिच्छेद्यं प्रमेयम् । अगुरुलघोर्भावोऽगुरुलघुत्वं । सूक्ष्मा वागगोचराः प्रतिक्षणं वर्तमाना आगमप्रमाणादभ्युपगम्या अगुरुलघुगुणाः ।

"सूक्ष्मं जिनोदितं तत्त्वं हेतुभिर्नैव हन्यते ।
आज्ञासिद्धं तु तद्ग्राह्यं नान्यथावादिनो जिनाः" ॥५॥

प्रदेशस्य भावः प्रदेशत्वं क्षेत्रत्वं अविभागीपुद्गलपरमाणुनावष्टब्धम् । चेतनस्य भावश्चेतनत्वम् चैतन्यमनुभवनम् ।

चैतन्यमनुभूतिः स्यात् सा क्रियारूपमेव च ।
क्रिया मनोवचःकायेष्वन्विता वर्तते ध्रुवम् ॥६॥

अचेतनस्य भावोऽचेतनत्वमचैतन्यमननुभवनम् । मूर्तस्य

भावो मूर्तत्वं रूपादिमत्त्वम्। अमूर्तस्य भावोऽमूर्तत्वंरूपादि-रहितत्वम्। इति गुणानां व्युत्पत्तिः। स्वभावविभावरूपतया-याति पर्येति परिणमतीति पर्याय इति पर्यायस्य व्युत्पत्तिः। स्वभावलाभादच्युतत्वादस्तिस्वभावः। परस्वरूपेणाभावान्नास्ति स्वभावः। निजनिजनानापर्यायेषु तदेवेदमिति द्रव्यस्योपल-म्भान्नित्यस्वभावः। तस्याप्यनेकपर्यायपरिणामित्वादनित्यस्व-भावः। स्वभावानामेकाधारत्वादेकस्वभावः एकस्याप्यनेकस्व-भावोपलम्भादनेकस्वभावः। गुणगुण्यादिसंज्ञाभेदाद् भेदस्व-भावः। संज्ञासंख्यालक्षणप्रयोजनानि गुणगुण्याद्येकस्वभावा-दभेदस्वभावः। भाविकाले परस्वरूपाकारभवनाद् भव्यस्वभावः। कालत्रयेऽपि परस्वरूपाकाराभवनादभव्यस्वभावः। उक्तञ्च—

"अण्णोण्णं पविसंता दिंता उग्गासमण्णमण्णस्स।
मेलंतावि य णिच्चं सगसगभावं ण विजहंति" ॥७॥

पारिणामिकभावप्रधानत्वेन परमस्वभावः। इति सामा-न्यस्वभावानां व्युत्पत्तिः। प्रदेशादिगुणानां व्युत्पत्तिश्चेतनादि-विशेषस्वभावानां च व्युत्पत्तिर्निगदिता।

धर्मापेक्षया स्वभावा गुणा न भवन्ति, स्वद्रव्यचतुष्टया-पेक्षया परस्परं गुणाः स्वभावा भवन्ति। द्रव्याण्यपि भवन्ति। स्वभावादन्यथाभवनं विभावः। शुद्धं केवलभावमशुद्धं तस्यापि विपरीतम्। स्वभावस्याप्यन्यत्रोपचारादुपचरितस्वभावः। स द्वेधा—कर्मजस्वाभाविकभेदात्। यथा जीवस्य मूर्तत्वमचेतनत्वं

यथा सिद्धानां परज्ञता परदर्शकत्वं च। एवमितरेषां द्रव्याणामुपचारो यथासम्भवो ज्ञेयः।

"दुर्नयैकान्तमारूढा भावानां स्वार्थिका हि ते।
स्वार्थिकाश्च विपर्यस्ताः सकलङ्का नया यतः" ॥८॥

तत्कथं तथाहि–सर्वथैकान्तेन सद्रूपस्य न नियतार्थव्यवस्था–संकरादिदोषत्वात् तथा–सद्रूपस्य सकलशून्यता प्रसङ्गात्, नित्यस्यैकरूपत्वादेकरूपस्यार्थक्रियाकारित्वाभावः, अर्थक्रियाकारित्वाभावे द्रव्यस्याप्यभावः। अनित्यपक्षेऽपि अनित्यरूपत्वादर्थक्रियाकारित्वाभावः, अर्थक्रियाकारित्वाभावे द्रव्यस्याप्यभावः। एकस्वरूपस्यैकान्तेन विशेषाभावः, सर्वथैकरूपत्वात् विशेषाभावे सामान्यस्याप्यभावः।

"निर्विशेषं हि सामान्यं भवेत्खरविषाणवत्।
सामान्यरहितत्वाच्च विशेषस्तद्वदेव हि" ॥९॥ इति ज्ञेयः॥

अनेकपक्षेऽपि तथा द्रव्याभावो निराधारत्वात् आधाराधेयाभावाच्च। भेदपक्षेऽपि विशेषस्वभावानां निराधारत्वादर्थक्रियाकारित्वाभावः, अर्थक्रियाकारित्वाभावे द्रव्यस्याप्यभावः। अभेदपक्षेऽपि सर्वेषामेकत्वम् सर्वेषामेकत्वेऽर्थक्रियाकारित्वाभाव अर्थक्रियाकारित्वाभावे द्रव्यस्याप्यभावः। भव्यस्यैकान्तेन पारिणामिकत्वात् द्रव्यस्य द्रव्यान्तरत्वप्रसङ्गात् सङ्करादिदोषसम्भवात्। सङ्करव्यतिकरविरोधवैयधिकरण्यानवस्थासंशयाप्रतिपत्त्यभावाश्चेति। सर्वथाऽभव्यस्यैकान्तेऽपि तथा शून्यताप्रसंगात् स्वभावरूपस्यैकान्तेन संसाराभावः।

विभावपक्षेऽपि मोक्षस्याप्यभावः। सर्वथा चैतन्यमेवेत्युक्ते सर्वेषां शुद्धज्ञानचैतन्यावाप्तिः स्यात्, तथा सति ध्यानं ध्येयं ज्ञानं ज्ञेयं गुरुशिष्याद्यभावः। सर्वथाशब्दः सर्वप्रकारवाची, अथवा सर्वकालवाची, अथवा नियमवाची, वा अनेकान्तसापेक्षी वा? यदि सर्वप्रकारवाची सर्वकालवाची अनेकान्तवाची वा सर्वादिगणे पठनात् सर्वशब्द एवंविधश्चेत्तर्हि सिद्धं नः समीहितम्। अथवा नियमवाची चेत्तर्हि सकलार्थानां तव प्रतीतिः कथं स्यात्? नित्यः, अनित्यः, एकः, अनेकः, भेदः, अभेदः कथं प्रतीतिः स्यात् नियमितपक्षत्वात्। तथा चैतन्यपक्षेऽपि सकलचैतन्योच्छेदः स्यात्, मूर्तस्यैकान्तेनात्मनो मोक्षस्यावाप्तिः स्यात्। सर्वथाऽमूर्तस्यापि तथात्मनः संसारविलोपः स्यात् एकप्रदेशस्यैकान्तेनाखण्डपरिपूर्णस्यात्मनोऽनेककार्यकारित्व एव हानिः स्यात्। सर्वथाऽनेकप्रदेशत्वेऽपि तथा तस्यानर्थकार्यकारित्वं स्वस्वभावशून्यताप्रसङ्गात्। शुद्धस्यैकान्तेनात्मनो न कर्ममलकलङ्कावलेपः सर्वथा निरञ्जनत्वात्। सर्वथाऽशुद्धैकान्तेऽपि तथात्मनो न कदापि शुद्धस्वभावप्रसङ्गः स्यात् तन्मयत्वात्। उपचरितैकान्तपक्षेऽपि नात्मज्ञता सम्भवति नियमितपक्षत्वात्। तथात्मनोऽनुपचरितपक्षेऽपि परज्ञतादीनां विरोधः स्यात्।

"नानास्वभावसंयुक्तं द्रव्यं ज्ञात्वा प्रमाणतः।
तच्च सापेक्षसिद्ध्यर्थं स्यान्नयमिश्रितं कुरु" ॥१०॥

स्वद्रव्यादिग्राहकेणास्तिस्वभावः। परद्रव्यादिग्राहकेण

नास्तिस्वभावः । उत्पादव्ययगौणत्वेन सत्ताग्राहकेण नित्यस्व भावः। केनचित्पर्यायार्थिकेनानित्यस्वभावः। भेदकल्पनानिरपेक्षे-णैकस्वभावः । अन्वयद्रव्यार्थिकेनैकस्याप्यनेकद्रव्यस्वभाव त्वम्। सद्भूतव्यवहारेण गुणगुण्यादिभिर्भेदस्वभावः। भेदक-ल्पनानिरपेक्षेण गुणगुण्यादिभिरभेदस्वभावः । परमभावग्राह-केण भव्याभव्यपारिणामिकस्वभावः । शुद्धाशुद्धपरमभाव-ग्राहकेण चेतनस्वभावो जीवस्य। असद्भूतव्यवहारेण कर्मनो-कर्मणोरपि चेतनस्वभावः। परमभावग्राहकेण कर्मनोकर्मणो रचेतनस्वभावः।

जीवस्याप्यसद्भूतव्यवहारेणाचेतनस्वभावः । परमभाव-ग्राहकेण कर्मनोकर्मणोमूर्तस्वभावः। जीवस्याप्यासद्भूतव्यव-हारेण मूर्तस्वभावः। परमभावग्राहकेण पुद्गलं विहाय इतरे-षाममूर्तस्वभावः, पुद्गलस्योपचारादपि नास्त्यमूर्तत्वम्। परमभावग्राहकेण कालपुद्गलाणूनामेकप्रदेशस्वभावत्वम्। भेद-कल्पनानिरपेक्षेणेतरेषां धर्माधर्माकाशजीवानां चाखण्डत्वादे-कप्रदेशत्वम्। भेदकल्पनासापेक्षेण चतुर्णामपि नानाप्रदेशस्व-भावत्वम्। पुद्गलाणोरुपचारतो नानाप्रदेशत्वं न च कालाणोः स्निग्धरूक्षत्वाभावात्। अरूक्षत्वाणोरमूर्तपुद्गलस्यैकविंशति-तमो भावो न स्यात्। परोक्षप्रमाणापेक्षयाऽसद्भूतव्यवहारे-णाप्युपचारेणामूर्तत्वं। पुद्गलस्य शुद्धाशुद्धद्रव्यार्थिकेन विभावस्वभावत्वम्। शुद्धद्रव्यार्थिकेन शुद्धस्वभावः। अशुद्ध-द्रव्यार्थिकेनाशुद्धस्वभावः। असद्भूतव्यवहारेणोपचरितस्वभावः

"द्रव्याणां तु यथारूपं तल्लोकेऽपि व्यवस्थितम् ।
तथाज्ञानेन संज्ञातं नयोऽपि हि तथाविधः" ॥११॥

इति नययोजनिका ।

—०—

सकलवस्तुग्राहकं प्रमाणं, प्रमीयते परिच्छिद्यते वस्तुतत्त्वं येन ज्ञानेन तत्प्रमाणम् । तद्द्वेधा सविकल्पेतरभेदात् । सविकल्पं मानसं तच्चतुर्विधम् । मतिश्रुतावधिमनःपर्ययरूपम् । निर्विकल्पं मनोरहितं केवलज्ञानमिति प्रमाणस्य व्युत्पत्तिः । प्रमाणेन वस्तु संगृहीतार्थैकांशो नयः, श्रुतविकल्पो वा, ज्ञातुरभिप्रायो वा नयः, नानास्वभावेभ्यो व्यावृत्य एकस्मिन्स्वभावे वस्तु नयति प्राप्नोतीति वा नयः । स द्वेधा सविकल्पनिर्विकल्पभेदादिति नयस्य व्युत्पत्तिः । प्रमाणनययोर्निक्षेप आरोपणं स नामस्थापनादिभेदेन चतुर्विधं इति निक्षेपस्य व्युत्पत्तिः । द्रव्यमेवार्थः प्रयोजनमस्येति द्रव्यार्थिकः । शुद्धद्रव्यमेवार्थः प्रयोजनमस्येति शुद्धद्रव्यार्थिकः । अशुद्धद्रव्यमेवार्थः प्रयोजनमस्येति अशुद्धद्रव्यार्थिकः । सामान्यगुणादयोऽन्वयरूपेण द्रव्यं द्रव्यमिति द्रवति व्यवस्थापयतीत्यन्वयद्रव्यार्थिकः । स्वद्रव्यादिग्रहणमर्थः प्रयोजनमस्येति स्वद्रव्यादिग्राहकः । परद्रव्यादि ग्रहणमर्थः प्रयोजनमस्येति परद्रव्यादिग्राहकः । परमभावग्रहणमर्थः प्रयोजनमस्येति परमभावग्राहकः ।

इति द्रव्यार्थिकस्य व्युत्पत्तिः ।

—०—

पर्याय एवार्थः प्रयोजनमस्येति पर्यायार्थिकः। अनादिनित्यपर्याय एवार्थः प्रयोजनमस्येत्यनादिनित्यपर्यायार्थिकः। सादिनित्यपर्याय एवार्थः प्रयोजनमस्येति सादिनित्यपर्यायार्थिकः। शुद्धपर्याय एवार्थः प्रयोजनमस्येति शुद्धपर्यायार्थिकः। अशुद्धपर्याय एवार्थः प्रयोजनमस्येत्यशुद्धपर्यायार्थिकः।

इति पर्यायार्थिकस्य व्युत्पत्तिः।

—०—

नैकं गच्छतीति निगमः, निगमो विकल्पस्तत्रभवो नैगमः। अभेदरूपतया वस्तुजातं संगृह्णातीति संग्रहः। संग्रहेण गृहीतार्थस्य भेदरूपतया वस्तु व्यवह्रियत इति व्यवहारः। ऋजु प्रांजलं सूत्रयतीति ऋजुसूत्रः। शब्दात् व्याकरणात् प्रकृतिप्रत्ययद्वारेण सिद्धः शब्दः शब्दनयः। परस्परेणाभिरूढाः समभिरूढाः। शब्दभेदेऽप्यर्थभेदो नास्ति। यथा शक्र इन्द्रः पुरन्दर इत्यादयः समभिरूढाः। एवंक्रियाप्रधानत्वेन भूयत इत्येवंभूतः। शुद्धाशुद्धनिश्चयौ द्रव्यार्थिकस्य भेदौ। अभेदानुपचारतया वस्तु निश्चीयत इति निश्चयः। भेदोपचारतया वस्तु व्यवह्रियत इति व्यवहारः। गुणगुणिनोः संज्ञादिभेदात् भेदकः सद्भूतव्यवहारः। अन्यत्र प्रसिद्धस्य धर्मस्यान्यत्र समारोपणमसद्भूतव्यवहारः। असद्भूतव्यवहार एवोपचारः, उपचारादप्युपचारं यः करोति स उपचरितासद्भूतव्यवहारः। गुणगुणिनोःपर्यायपर्यायिणोः स्वभावस्वभाविनोः कारककारकिणोर्भेद सद्भूतव्यवहारस्यार्थः। द्रव्ये द्रव्योपचारः, पर्याये

पर्यायोपचारः, गुणे गुणोपचारः, द्रव्ये गुणोपचारः, द्रव्ये पर्यायोपचारः, गुणे द्रव्योपचारः, गुणे पर्यायोपचारः, पर्याये द्रव्योपचारः, पर्याये गुणोपचार इति नवविधोऽसद्भूतव्यवहारस्यार्थो द्रष्टव्यः ।

उपचारः पृथग् नयो नास्तीति न पृथक् कृतः । मुख्याभावे सति प्रयोजने निमित्ते चोपचारः प्रवर्तते सोऽपि सम्बन्धाविनाभावः । संश्लेषः सम्बन्धः । परिणामपरिणामिसम्बन्धः, श्रद्धाश्रद्धेयसम्बन्धः, ज्ञानज्ञेयसम्बन्धः, चारित्रचर्यासम्बन्धश्चेत्यादिसत्यार्थः, असत्यार्थः, सत्यासत्यार्थश्चेत्युपचरितासद्भूतव्यवहारनयस्यार्थः ।

पुनरप्यध्यात्मभाषया नया उच्यन्ते । तावन्मूलनयौ द्वौ निश्चयो व्यवहारश्च । तत्र निश्चयनयोऽभेदविषयो व्यवहारो भेदविषयः । तत्र निश्चयो द्विविधः शुद्धनिश्चयोऽशुद्धनिश्चयश्च । तत्र निरुपाधिकगुणगुण्यभेदविषयकोशुद्धनिश्चयो यथा–केवलज्ञानादयो जीव इति । सोपाधिकविषयोऽशुद्धनिश्चयो यथा–मतिज्ञानादयो जीव इति । व्यवहारो द्विविधः सद्भूतव्यवहारोऽसद्भूतव्यवहारश्च । तत्रैकवस्तुविषयः सद्भूतव्यवहारः, भिन्नवस्तुविषयोऽसद्भूतव्यवहारस्तत्रसद्भूतव्यवहारो द्विविधः उपचरितानुपचरितभेदात् । तत्र सोपाधिगुणगुणिनोर्भेदविषयः उपचरितसद्भूतव्यवहारो यथा–जीवस्य मतिज्ञानादयो गुणाः । निरुपाधिगुणगुणिनोर्भेदविषयोऽनुपचरितसद्भूतव्यवहारो यथा–जीवस्य केवलज्ञानादयो गुणाः । असद्भूतव्यवहारो द्विविधः उपचरिता-

नुपचरितभेदात् । तत्र संश्लेषरहितवस्तुसम्बन्धविषय उपचरितासद्भूतव्यवहारो—यथा देवदत्तस्य धनमिति । संश्लेषसहितवस्तुसम्बन्धविषयोऽनुपचरितासद्भूतव्यवहारो यथा—जीवस्य शरीरमिति ।

इति सुखबोधार्थमालापपद्धतिः श्रीमद्देवसेनविरचिता परिसमाप्ता

—: o :—

श्रीमन्माणिक्यनन्दिविरचितानि

१२ परीक्षामुखसूत्राणि ।

प्रमाणादर्थसंसिद्धिस्तदाभासाद्विपर्ययः ।

इति वक्ष्ये तयोर्लक्ष्म सिद्धमल्पं लघीयसः ॥१॥

स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणं ॥ १ ॥ हिताहितप्राप्तिपरिहारसमर्थं हि प्रमाणं ततो ज्ञानमेव तत् ॥ २ ॥ तन्निश्चयात्मकं समारोपविरुद्धत्वादनुमानवत् ॥ ३ ॥ अनिश्चितोऽपूर्वार्थः ॥ ४ ॥ दृष्टोऽपि समारोपात्तादृक् ॥ ५ ॥ स्वोन्मुखतया प्रतिभासनं स्वस्य व्यवसायः ॥ ६ ॥ अर्थस्येव तदुन्मुखतया ॥ ७ ॥ घटमहमात्मना वेद्मि ॥ ८ ॥ कर्मवत्कर्तृकरणक्रियाप्रतीतेः ॥ ६ ॥ शब्दानुच्चारणेऽपि स्वस्यानुभवनमर्थवत् ॥ १० ॥ को वा तत्प्रतिभासिनमर्थमध्यक्षमिच्छंस्तदेव तथा नेच्छेत् ॥११॥ प्रदीपवत् ॥ १२ ॥ तत्प्रामाण्यं स्वतः परतश्च ॥ १३ ॥

इति प्रमाणस्य स्वरूपोद्देशः प्रथमः ॥ १ ॥

तद्द्वेधा ॥ १ ॥ प्रत्यक्षेतरभेदात् ॥ २ ॥ विशदं प्रत्यक्षं

॥ ३ ॥ प्रतीत्यन्तराव्यवधानेन विशेषवत्तया वा प्रतिभासनं वैशद्यं ॥ ४ ॥ इन्द्रियानिन्द्रियनिमित्तं देशतः सांव्यवहारिकम् ॥ ५ ॥ नार्थालोकौ कारणं परिच्छेद्यत्वात्तमोवत् ॥ ६ ॥ तदन्वयव्यतिरेकानुविधानाभावाच्च केशोण्डुकज्ञानवन्नक्तंचरज्ञानवच्च ॥ ७ ॥ अतज्जन्यमपि तत्प्रकाशकं प्रदीपवत् ॥ ८ ॥ स्वावरणक्षयोपशमलक्षणयोग्यतया हि प्रतिनियतमर्थं व्यवस्थापयति ॥ ९ ॥ कारणस्य च परिच्छेद्यत्वे करणादिना व्यभिचारः ॥ १० ॥ सामग्रीविशेषविश्लेषिताखिलावरणमतीन्द्रियमशेषतो मुख्यं ॥ ११ ॥ सावरणत्वे करणजन्यत्वे च प्रतिबन्धसम्भवात् ॥१२ ॥

इति प्रत्यक्षोद्देशः द्वितीयः ॥ २ ॥

परोक्षमितरत् ॥ १ ॥ प्रत्यक्षादिनिमित्तं स्मृतिप्रत्यभिज्ञानतर्कानुमानागमभेदं ॥ २ ॥ संस्कारोद्बोधनिबन्धना तदित्याकारा स्मृतिः ॥ ३ ॥ स देवदत्तो यथा ॥ ४ ॥ दर्शनस्मरणकारणकं सङ्कलनं प्रत्यभिज्ञानं तदेवेदं तत्सदृशं तद्विलक्षणं तत्प्रतियोगीत्यादि ॥ ५ ॥ यथा स एवायं देवदत्तः गोसदृशो गवयः गोविलक्षणो महिष इदमस्माद्दूरं वृक्षोऽयमित्यादि ॥ ६ ॥ उपलम्भानुपलम्भनिमित्तं व्याप्तिज्ञानमूहः इदमस्मिन्सत्येव भवत्यसति न भवत्येवेति च ॥ ७ ॥ यथाग्नावेव धूमस्तदभावे न भवत्येवेति च ॥ ८ ॥ साधनात्साध्यविज्ञानमनुमानं ॥ ९ ॥ साध्याविनाभावित्वेन निश्चितो हेतुः ॥ १० ॥ सहक्रमभावनियमोऽविनाभावः ॥ ११ ॥ सहचारिणोर्व्याप्यव्यापकयोश्च सहभावः ॥ १२ ॥ पूर्वोत्तरचारिणोः कार्यकारणयोश्च क्रमभावः

॥ १३ ॥ तर्कात्तन्निर्णयः ॥ १४ ॥ इष्टमबाधितमसिद्धं साध्यं ॥ १५ ॥ सन्दिग्धविपर्यस्ताव्युत्पन्नानां साध्यत्वं यथा स्यादित्यसिद्धपदं ॥ १६ ॥ अनिष्टाध्यक्षादिबाधितयोः साध्यत्वं मा-भूदितीष्टाबाधितवचनं ॥ १७ ॥ न चासिद्धवदिष्टं प्रतिवादिनः ॥१८॥ प्रत्यायनाय हीच्छा वक्तुरेव ॥१९॥ साध्यं धर्मः क्व-चित्तद्विशिष्टो वा धर्मी ॥२०॥ पक्ष इति यावत् ॥२१॥ प्रसिद्धो धर्मी ॥२२॥ विकल्पसिद्धे तस्मिन्सत्तेतरे साध्ये ॥२३॥ अस्ति सर्वज्ञो नास्ति खरविषाणं ॥२४॥ प्रमाणोभयसिद्धे तु साध्यधर्मविशिष्टता ॥२५॥ अग्निमानयं देशः परिणामी शब्द इति यथा ॥२६॥ व्याप्तौ तु साध्यं धर्म एव ॥२७॥ अन्यथा तदघटनात् ॥२८॥ साध्यधर्माधारसन्देहापनोदाय गम्यमानस्यापि पक्षस्य वचनं ॥२९॥ साध्यधर्मिणि साधन-धर्मावबोधनाय पक्षधर्मोपसंहारवत् ॥३०॥ को वा त्रिधा हेतु-मुक्त्वा समर्थयमानो न पक्षयति ॥३१॥ एतद्द्वयमेवानुमानांगं नोदाहरणं ॥३२॥ न हि तत्साध्यप्रतिपत्त्यंगं तत्र यथोक्तहेतो-रेव व्यापारात् ॥३३॥ तदविनाभावनिश्चयार्थं वा विपक्षे बाधा-कादेव तत्सिद्धेः ॥३४॥ व्यक्तिरूपं च निदर्शनं सामान्येन तु व्याप्तिस्तत्रापि तद्विप्रतिपत्तावनवस्थानं स्याद् दृष्टान्तान्तरा-पेक्षणात् ॥३५॥ नापि व्याप्तिस्मरणार्थं तथाविधहेतुप्रयोगादे-व तत्स्मृतेः ॥३६॥ तत्परमभिधीयमानं साध्यधर्मिणि साध्य-साधने सन्देहयति ॥३७॥ कुतोऽन्यथोपनयनिगमने ॥३८॥ न च ते तदङ्गे, साध्यधर्मिणि हेतुसाध्ययोर्वचनादेवासंशयात्

॥ ३६ ॥ समर्थनं वा वरं हेतुरूपमनुमानावयवो वाऽस्तु साध्ये तदुपयोगात् ॥४०॥ बालव्युत्पत्त्यर्थं तत्त्रयोपगमे शास्त्र एवासौ न वादेऽनुपयोगात् ॥४१॥ दृष्टान्तो द्वेधाऽन्वयव्यतिरेकभेदात् ॥४२॥ साध्यव्याप्तं साधनं यत्र प्रदर्श्यते सोऽन्वयदृष्टान्तः ॥४३॥ साध्याभावे साधनाभावो यत्र कथ्यते स व्यतिरेकदृष्टान्तः ॥४४॥ हेतोरुपसंहार उपनयः ॥४५॥ प्रतिज्ञायास्तु निगमनं ॥४६॥ तदनुमानं द्वेधा ॥४६॥ स्वार्थपरार्थभेदात् ॥४८॥ स्वार्थमुक्तलक्षणं ॥४६॥ परार्थं तु तदर्थपरामर्शवचनाज्जातं ॥५०॥ तद्वचनमपि तद्धेतुत्वात् ॥५१॥ स हेतुर्द्वेधोपलब्ध्यनुपलब्धिभेदात् ॥५२॥ उपलब्धिर्विधिप्रतिषेधयोरनुपलब्धिश्च ॥५३॥ अविरुद्धोपलब्धिर्विधौ षोढा व्याप्यकार्यकारणपूर्वोत्तरसहचरभेदात् ॥५४॥ रसादेकसामग्र्यनुमानेन रूपानुमानमिच्छद्भिरिष्टमेव किञ्चत्कारणं हेतुर्यत्र सामर्थ्याप्रतिबन्धकारणान्तरावैकल्ये ॥५५॥ न च पूर्वोत्तरचारिणोस्तादात्म्यं तदुत्पत्तिर्वा कालव्यवधाने तदनुपलब्धेः ॥५६॥ भाव्यतीतयोर्मरणजाग्रद्बोधयोरपि नारिष्टोद्बोधौ प्रतिहेतुत्वम् ॥५७॥ तद्व्यापाराश्रितं हि तद्भावभावित्वम् ॥५८॥ सहचारिणोरपि परस्परपरिहारेणावस्थानात्सहोत्पादाच्च ॥५६॥ परिणामी शब्दः कृतकत्वात् य एवं स एवं दृष्टो यथा घटः, कृतकश्चायं, तस्मात्परिणामीति, यस्तु न परिणामी स न कृतको दृष्टो यथा बन्ध्यास्तनन्धयः, कृतकश्चायं, तस्मात्परिणामी ॥६०॥ अस्त्यत्र देहिनि बुद्धिर्व्याहारादेः ॥६१॥

अस्त्यत्रच्छाया छत्रात् ॥ ६२ ॥ उदेष्यति शकटं कृत्तिकोदयात् ॥६३॥ उदगाद्भरणिः प्राक् तत एव ॥६४॥ अस्त्यत्र मातुलिंगे रूपं रसात् ॥६५॥ विरुद्धतदुपलब्धिः प्रतिषेधे तथा ॥६६॥ नास्त्यत्र शीतस्पर्श औष्ण्यात् ॥६७॥ नास्त्यत्र शीतस्पर्शो धूमात् ॥६८॥ नास्मिन् शरीरिणि सुखमस्ति हृदयशल्यात् ॥६९॥ नोदेष्यति मुहूर्तान्ते शकटं रेवत्युदयात् ॥ ७० ॥ नोदगाद्भरणिर्मुहूर्तात्पूर्वं पुष्योदयात् ॥ ७१ ॥ नास्त्यत्र भित्तौ परभागाभावोऽर्वाग्भागदर्शनात् ॥७२॥ अविरुद्धानुपलब्धिः प्रतिषेधे सप्तधा स्वभावव्यापककार्यकारणपूर्वोत्तरसहचरानुपलम्भभेदात् ॥ ७३ ॥ नास्त्यत्र भूतले घटोऽनुपलब्धेः ॥ ७४ ॥ नास्त्यत्र शिंशपा वृक्षानुपलब्धेः ॥ ७५ ॥ नास्त्यत्राप्रतिबद्धसामर्थ्योऽग्निर्धूमानुपलब्धेः ॥ ७६ ॥ नास्त्यत्र धूमोऽनग्नेः ॥७७॥ न भविष्यति मुहूर्तान्ते शकटं कृत्तिकोदयानुपलब्धेः ॥७८॥ नोदगाद्भरणिर्मुहूर्तात्प्राक्तत एव ॥७९॥ नास्त्यत्र समतुलायामुन्नामो नामानुपलब्धेः ॥ ८० ॥ विरुद्धानुपलब्धिर्विधौ त्रेधा विरुद्धकार्यकारणस्वभावानुपलब्धिभेदात् ॥ ८१ ॥ यथास्मिन्प्राणिनि व्याधिविशेषोऽस्ति निरामयचेष्टानुपलब्धेः ॥ ८२॥ अस्त्यत्र देहिनि दुःखमिष्टसंयोगाभावात् ॥८३॥ अनेकान्तात्मकं वस्त्वेकान्तस्वरूपानुपलब्धेः ॥ ८४ ॥ परम्परया संभवत्साधनमत्रैवान्तर्भावनीयम् ॥८५॥ अभूदत्र चक्रे शिवकः स्थासात् ॥ ८६ ॥ कार्यकार्यमविरुद्धकार्योपलब्धौ ॥८७॥ नास्त्यत्र गुहायां मृगक्रीडनं मृगारिसंशब्दनात्,

कारणविरुद्धकार्योपलब्धौ यथा ॥८८॥ व्युत्पन्नप्रयोगस्तु तथोपपत्त्याऽन्यथानुपपत्त्यैव वा ॥८९॥ अग्निमानयं देशस्तथैव धूमवत्त्वोपपत्तेर्धूमवत्त्वानुपपत्तेर्वा ॥९०॥ हेतुप्रयोगो हि यथा व्याप्तिग्रहणं विधीयते सा च तावन्मात्रेण व्युत्पन्नैरवधार्यते ॥९१॥ तावता च साध्यसिद्धिः ॥९२॥ तेन पक्षस्तदाधारसूचनायोक्तः ॥९३॥ आप्तवचनादिनिबन्धनमर्थज्ञानमागमः ॥९४॥ सहजयोग्यतासङ्केतवशाद्धि शब्दादयो वस्तुप्रतिपत्तिहेतवः ॥९५॥ यथा मेर्वादयः सन्ति ॥९६॥

इति परोक्षप्रपंचस्तृतीयः समुद्देशः ॥३॥

सामान्यविशेषात्मातदर्थो विषयः ॥१॥ अनुवृत्तव्यावृत्तप्रत्ययगोचरत्वात्पूर्वोत्तराकारपरिहारावाप्तिस्थितिलक्षणपरिणामेनार्थक्रियोपपत्तेश्च ॥२॥ सामान्यं द्वेधा तिर्यगूर्ध्वताभेदात् ॥३॥ सदृशपरिणामस्तिर्यक् खण्डमुण्डादिषु गोत्ववत् ॥४॥ परापरविवर्तव्यापिद्रव्यमूर्ध्वता मृदिव स्थासादिषु ॥५॥ विशेषश्च ॥६॥ पर्यायव्यतिरेकभेदात् ॥७॥ एकस्मिन्द्रव्ये क्रमभाविनः परिणामाः पर्याया आत्मनिहर्षविषादादिवत् ॥८॥ अर्थान्तरगतो विसदृशपरिणामो व्यतिरेको गोमहिषादिवत् ॥९॥

इति प्रमाणस्य विषयसमुद्देशश्चतुर्थः ॥ ४ ॥

अज्ञाननिवृत्तिर्हानोपादानोपेक्षाश्च फलम् ॥१॥ प्रमाणादभिन्नं भिन्नं च ॥२॥ यः प्रमिमीते स एव निवृत्ताज्ञानो जहात्यादत्त उपेक्षते चेति प्रतीतेः ॥३॥

इति प्रमाणस्य फलसमुद्देशः पंचमः ॥५॥

ततोऽन्यत्तदाभासम् ॥१॥ अस्वसंविदितगृहीतार्थदर्शन-संशयादयः प्रमाणाभासाः ॥२॥ स्वविषयोपदर्शकत्वाभावात् ॥३॥ पुरुषान्तरपूर्वार्थगच्छत्तृणस्पर्शस्थाणुपुरुषादिज्ञानवत् ॥४॥ चक्षूरसयोर्द्रव्ये संयुक्तसमवायवच्च ॥५॥ अवैशद्ये प्रत्यक्षं तदाभासं बौद्धस्याकस्माद्धूमदर्शनाद्वह्निविज्ञानवत् ॥६॥ वैशद्येऽपि परोक्षं तदाभासं मीमांसकस्य करणज्ञानवत् ७ अतस्मिंस्तदिति ज्ञानं स्मरणाभासं जिनदत्ते स देवदत्तो यथा ॥८॥ सदृशे तदेवेदं तस्मिन्नेव तेन सदृशं यमलकवदित्यादिप्रत्यभिज्ञानाभासं ॥९॥ असम्बद्धे तज्ज्ञानं तर्काभासं यावांस्तत्पुत्र स श्याम इति यथा ॥१०॥ इदमनुमानाभासम् ॥११॥ तत्रानिष्टादिः पक्षाभासः ॥१२॥ अनिष्टो मीमांसकस्यानित्यः शब्दः ॥१३॥ सिद्धः श्रावणः शब्दः ॥१४। बाधितः प्रत्यक्षानुमानागमलोकस्ववचनैः ॥१५॥ तत्र प्रत्यक्षबाधितो यथा अनुष्णोऽग्निर्द्रव्यत्वाज्जलवत् ॥ १६ ॥ अपरिणामी शब्द कृतकत्वात् घटवत् ॥१७॥ प्रेत्यासुखप्रदो धर्मः पुरुषाश्रितत्वादधर्मवत् ॥१८॥शुचि नरशिर कपालं प्राण्यङ्गत्वाच्छङ्खशुक्तिवत् ॥१९॥ माता मे वन्ध्या पुरुषसंयोगेऽप्यगर्भत्वात्प्रसिद्धवन्ध्यावत् ॥२०॥ हेत्वाभासा असिद्धविरुद्धानैकान्तिकाकिञ्चित्कराः ॥२१॥ असत्सत्तानिश्चयोऽसिद्धः ॥२२॥ अविद्यमानसत्ताकः परिणामी शब्दश्चाक्षुषत्वात् ॥२३॥ स्वरूपेणैवासिद्धत्वात् ॥२४॥ अविद्यमाननिश्चयो मुग्धबुद्धिं प्रत्यग्निरत्र धूमात् ॥२५॥ तस्य बाष्पादिभावेन भूतसंघाते संदेहात् ॥२६॥ सांख्यं प्रति परिणामी शब्दः कृतकत्वात् ॥२७॥

तेनाज्ञातत्वात् ॥२८॥ विपरीतनिश्चिताविनाभावो विरुद्धोऽपरिणामी शब्दः कृतकत्वात् ॥२९॥ विपक्षेऽप्यविरुद्धवृत्तिरनैकान्तिकः ॥३०॥ निश्चितवृत्तिरनित्यः शब्दः प्रमेयत्वाद् घटवत् ॥३१॥ आकाशे नित्येऽप्यस्य निश्चयात् ॥३२॥ शङ्कितवृत्तिस्तु नास्ति सर्वज्ञो वक्तृत्वात् ॥३३॥ सर्वज्ञत्वेन वक्तृत्वाविरोधात् ॥३४॥ सिद्धे प्रत्यक्षादिबाधिते च साध्ये हेतुरकिञ्चित्करः ॥३५॥ सिद्धः श्रावणः शब्दः शब्दत्वात् ॥३६॥ किंचिदकरणात् ॥३७॥ यथाऽनुष्णोऽग्निर्द्रव्यत्वादित्यादौ किञ्चित्कर्तुमशक्यत्वात् ॥३८॥ लक्षण एवासौ दोषो व्युत्पन्नप्रयोगस्तय पक्षदोषेणैव दुष्टत्वात् ॥३९॥ दृष्टान्ताभासा अन्वयेऽसिद्धसाध्यसाधनोभयाः ॥४०॥ अपौरुषेयः शब्दोऽमूर्तत्वादिन्द्रियसुखपरमाणुघटवत् ॥४१॥ विपरीतान्वयश्च यदपौरुषेयं तदमूर्तम् ॥४२॥ विद्युदादिनाऽतिप्रसङ्गत् ॥४३॥ व्यतिरेके सिद्धतद्व्यतिरेकाः परमाण्विन्द्रियसुखाकाशवत् ॥४४॥ विपरीतव्यतिरेकश्च यन्नामूर्तं तन्नापौरुषेयम् ॥४५॥ बालप्रयोगाभासः पञ्चावयवेषु कियद्धीनता ॥४६॥ अग्निमानयं देशोधूमवत्वात् यदित्थं तदित्थं यथा महानसः ॥४७॥ धूमवांश्चायमिति वा ॥४८॥ तस्मादग्निमान् धूमवांश्चायम् ॥४९॥ स्पष्टतया प्रकृतप्रतिपत्तेरयोगात् ॥५०॥ रागद्वेषमोहाक्रान्तपुरुषवचनाज्जातमागमाभासम् ॥५१॥ यथा नद्यास्तीरे मोदकराशयः सन्ति धावध्वं माणवकाः ॥५२॥ अंगुल्यग्रे हस्तियूथशतमास्त इति च ॥५३॥ विसंवदात् ॥५४॥ प्रत्यक्षमेवैकं प्रमाणमित्यादिसंख्याभासम् ॥५५॥ लौकायतिकस्य

प्रत्यक्षतः परलोकादिनिषेधस्य परबुद्ध्यादेश्चासिद्धेरतद्विषयत्वात् ॥५६॥ सौगतसांख्ययौगप्रभाकरजैमिनीयानां प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावैरेकैकाधिकैर्व्याप्तिवत् ॥५७। अनुमानादेस्तद्विषयत्वे च प्रमाणान्तरत्वम् ॥५८॥ तर्कस्येव व्याप्तिगोचरत्वे प्रमाणान्तरत्वमप्रमाणस्याव्यवस्थापकत्वात् ॥५९॥ प्रतिभासभेदस्य च भेदकत्वात् ॥६०॥ विषयाभासः सामान्यं विशेषो द्वयं वा स्वतन्त्रम् ॥६१॥ तथाप्रतिभासनात्कार्याकरणाच्च ॥६२॥ समर्थस्य करणे सर्वदोत्पत्तिरनपेक्षत्वात् ॥६३॥ परापेक्षणे परिणामित्वमन्यथा तदभावात् ॥६४॥ स्वयमसमर्थस्याकारकत्वात्पूर्ववत् ॥६५॥ फलाभासं प्रमाणादभिन्नं भिन्नमेव वा ॥६६॥ अभेदे तद्व्यवहारानुपपत्तेः ॥६७॥ व्यावृत्त्याऽपि न तत्कल्पना फलान्तराद्व्यावृत्त्याऽफलत्वप्रसंगात् ॥६८॥ प्रमाणान्तराद्व्यावृत्त्येवाप्रमाणत्वस्य ॥६९॥ तस्माद्वास्तवोऽभेदः ॥ ७०॥ भेदे त्वात्मान्तरवत्तदनुपपत्ते ॥७१॥ समवायेऽतिप्रसङ्गः ॥७२॥ प्रमाणतदाभासौ दुष्टतयोद्भावितौ परिहृतापरिहृतदोषौ वादिनः साधनतदाभासौ प्रतिवादिना दूषणभूषणे च ॥७३॥ सम्भवदन्यद्विचारणीयम् ॥७४॥

परीक्षामुखमादर्शं हेयोपादेयतत्त्वयोः ।
संविदे मादृशो बालः परीक्षादक्षवद्व्यधाम् ॥१॥

१३० विशेष गाथासंग्रह

मिच्छोदयेण मिच्छत्तमसद्दहणं तु तच्च अत्थाणं । एयंतं विवरीयं विणयं संसयिदमण्णाणं । मिच्छत्तं वेदंतो जीवो विवरीयदंसणो होदि । णय धम्मं रोचेदि हु महुरं खुरसं जहा जरिदो । आदिमसम्मत्तद्धासम-

यादोछावलित्ति वासेसे। अण्णअणयदरुदयादो णासियसम्मोत्ति-सासणक्खोसे। सम्मामिच्छुदयेण य जत्तंतरसव्वघादिकज्जेण। ण य सम्ममिच्छंपियसम्मिस्सोहोदिपरिणामो। णोइंदियेसु विरदोणो जीवेथावरे तसे वापि। जो सद्दहदिजिणुत्तं सम्माइट्ठी अविरदोसो। पच्चक्खाणुदयादो संजमभावेण होदिणवरिं तु। थोववदो होदितदोदेसवदोहोदिपंचमंओ। संजलणणोकसायाणु-दओ मंदो जदा तदाहोदि। अपमत्तगुणोतेण य अपमत्तो संजदो होदि। णट्ठासेपमादोवयगुणसीलोलिमंडिओणाणी। अणुव समंओ अखवंओ झाणणिलीणोहु अपमत्तो। इगवीसमोहखवणु-वसमणणिमित्ताणितिकरणाणि तहिं। पढमं अधापवत्तंकरणं तु करेदि अपमत्तो; अंतोमुहुत्तकालं गमिऊण अधापविात्तकरणं तं। पडिसमयंसुज्झंतो अपुव्वकरणं समल्लियई। एदम्हि कालसमये संठाणादीहि जहणिवदंति। ण णिवदंति तदाविपपरिणामेहिं मिहेजिहिं। होंति अणियहिणोते पडिसमयंजेस्सिमेक्कपरिणामा। विमलयरझाणहुयवहसिहाहिंणिद्दड्ढकम्मवणा। धुदकोसुंभयवत्थं होदि जहा सुहुमरायसंजुत्तं। एवं सुहुमकसाओ सुहुमसरागोत्ति णादव्वो। कदकफलजुदजलंवारए सराणियं वणिम्मलयं। सयलोवसंतमोहो उवसंतकसायओ होदि। णिस्सेसखीणमोहो फलिहामलभायणुदयसमचित्तो। खीणकसाओ भण्णदिणिग्गंथो वीयरायेहिं। केवलणाणदिवायरकिरणकलावप्पणासियण्णाणो। णवकेवलद्धुग्गमसुजणियपरमप्पववएसो। असहायणाणदंसण सहिओइदि केवलोहु जोगेण। जुत्तोत्ति संजोगिजिणो अणाइणिं

हणारिसे उत्तो। सीलेसिसंपत्तोणिरुद्धणिस्सेसआसवो जीवो। कम्मरयविप्पमुक्को गयजोगो केवली होदि। जेहिं अणेया जीवा णज्जंते बहुविहावि तज्जादो। ते पुण संगहित्था जीवसमासात्ति विण्णेया जेहि दुलक्खिज्जंते उदयादिसु संभवेहिं भावेहिं। जीवा ते गुणसण्णा णिद्दिट्ठा सव्वदरसीहिं। जह पुण्णापुण्णाइं गिह-घडवत्थादियाइं दव्वाइं। तह पुण्णिदरा जीवा पज्जत्तिदरा-मुणेयव्वा बाहिरपाणेहिं जदातहेव अब्भंतरेहिं पाणेहिं। पाणंति जेहिं जीवा पाणा ते होंतिणिद्दिट्ठा। इह जाहि बाहिया विय जीवा पावंति दारुणं दुक्खं। सेवंतावि य उभये ताओ चत्तारि सण्णाओ। जाहि व जासु व जीवा मग्गिज्जंते जहा तहा दिट्ठा। ताओ चोद्दस जाणे सुयणाणे मग्गणाहोंति। गइउदयजपज्जाया चउगइगमणस्सहेउवा गई। णारयतिरिक्ख माणुसदेवगइत्तिय हवे चहुधा। अहमिंदा जहदेवा अविसेसं अह महंति मण्णंता ईसंतिएक्कमेक्कं इंदा इव इंदिये जाण। जाई अविणाभावी तसथावर उदयजो हवेकाओ। सो जिणमदम्हि भणिओ पुढवीकायादिछब्भेयो। पुग्गलविवाइदेहोदयेण मणव-यणकायजुत्तस्स। जीवस्स जा हुसत्ती कम्मागमकारणं जोगो। पुरुसिच्छिसंढवेदोदयेण पुरुसिच्छिसंढओ भावे। णामोदयेण दव्वेपाएण समा कहिं विसमा। सुहदुक्खसुबहुसस्सं कम्मक्खेत्तं करोदि जीवस्स। सँसारदूरमेरं तेण कसाओत्तिणं वेति। जाणइ तिकालविसए दव्वगुणे पज्जए बहुभेदे। पच्चक्खं च परोक्खं अणेण णाणोत्तिणं वेति वदसमिदिकसायाणं दंडाणतहिंदियाण

पंचएहं । णारणयालणाखिग्गहचागजओ संजमो भणिओ । जं सामएणं गहणं भावणमेव कट्टुमायारं । अविसेसदूण अट्टं देंसणमिदि भएणये समये , लिंपइ अप्पीकीरइएदीए णिय अपुएणपुएणं च । जोवोत्तिहोदिलेस्सा लेस्सागुणजाणयक्खादा । चंडोणमुचइ वेरं भंडणशीलोय धम्मदयरहिओ । दुट्ठोणयएदि वसं लक्खणमेयँतु किएहस्स । मंदोवुद्धिविहीणोणिव्विणाणीय विसयलोलोय । माणीमायी च तदा आलस्सो चेवमेज्जोय । णिंदावंचणवहुलो धणधएणेहोदि तिव्वसएणाय । लक्खणमेयं भवियं समासदोणीललेस्सस्स । रूसइणिंदइ अएणेदूसइ वहुसो यसोयभयवहुलो । असुयइ परिभवइ पर पसंसये अप्पयं वहुसो । णयपत्तियई परं सो अप्पाणं वियं परंपिमएणंतो । थूसइ अभित्थुवंतोणय जाणइ हाणिवड्ढि वा । मरणंपत्थेइ रणे देइ सुवहुगंवि थुव्वमाएणेहु । ण गणइ कज्जाकज्जं लक्खणमेयं तु काउस्स । जाणइ कज्जाकज्जं सेयमसेयं च सव्वसमयासी । दयदाणरदोयमिदू लक्खणमेयं तु तेउस्स । चागीभद्दो चोक्खो उज्जवकम्मो य खवदि वहुंगपि । साहुगुरुपूजणरदोलक्खणमेयं तु पम्मस्स । णय कुणइ पक्खवायं णवि य णिदाणं समो य सव्वेसिं । णत्थि य रायद्दोसाणेहोवियसुक्कलेस्सस्स । भविया सिद्धी जेसिं जीवाणं ते हवंति भवसिद्धा । तव्विवरीयाऽभव्या संसारादोणसिज्झंति । छप्पंचणवविहाणं अत्थाणं जिणवरोवइट्ठाणं । आणाए अहिगमेण य सद्दहणं होइ सम्मत्तं । खाइंदिय आवरणखओवसमं तज्जवोहणं सएणा । सा जस्स सोदुसएणी

इदरीसेसिंदिअवत्रोहो। उदयावएणसरीरोदयेण तद्देहवयणचित्ताणं। णोकम्मवग्गणाणं गहणं आहारयं णाम। वत्थुणिमित्तं भावो जादो जीवस्स जोहु उवजोगो। सो दुविहोणायव्वो सायारो चेवणायारो। सोलस पणवीस णभं दस चउछक्केक्क बंधवोच्छिण्णा। दुग तीस चदुरपुव्वे पणसोलस जोगिणो एक्को। मिच्छत्तहुंडसंढासंपत्तेयक्खथावरादावं। सुहुमतियं वियलिंदी णिरयदुणिरयाउगं मिच्छे। विदियगुणे अणथीणतिदुभगतिसंठाणसंहदिचउक्कं। दुग्गमणित्थीणीचं तिरियदुगुज्जोवतिरियाऊ अयदेविदियकसाया वज्जं ओरालमणुदुमणुवाऊ। देसे तदियकसाया णियमेणिह बंधवोच्छिण्णा। छट्ठे अथिरं असुहं असादमजसं च अरदिसोगं च। अपमत्ते देवाऊणिट्ठवणं चेव अत्थित्ति। मरणूणम्हिणियट्टीपढमेणिद्दा तदेव पयला य। छट्ठे भागेतित्थं णिमिणं सग्गमणपंचिंदी। तेजदुहारदु समचउसुरवण्णागुरुचउक्कतसणवयं। चरमे हस्सं च रदी भयं जुगुच्छाय बंधवोच्छिण्णा पुरिसं चदुसंजलणं कमेण अणियट्टि पंचभागेसु। पढमं विग्घं दंसणचउजसउच्च च सुहमंते। उवसंतखीणमोहे जोगिम्मि य समयियट्ठिदी सादं। णायव्वो पयडीणं बंधस्संतो अणतो य। सत्तरसेकग्गसयं चउसत्तत्तरि सगट्ठि तेवट्ठी। बंधाणवट्ठठाणादुवीससत्तारसेक्कोघे। पणणव इति सत्तरसं अड पंच च चउर छक्क छच्चेव। इति दुग सोलस तीसं बारस उदये अजोगंता मिच्छेमिच्छादावं सुहुमतियं सासणे अणेइंदी। थावरवियलं मिस्सेमिस्से च य उदयवेच्छिण्णा अयदेविदियकसाया

वेगुव्वियछक्कणिरयदेवाऊ। मणुयतिरियाणुपुव्वी दुब्भगणादेज्ज अज्जसयं देसे। तदियकसायातिरियाउज्जोवणीचतिरियगदी। छट्ठे आहारदुगं थीणतियं उदयवोच्छिण्णा। अपमत्ते सम्मत्तं अन्तिमतियसंहदीयऽपुव्वम्हि। छच्चेवणोकसाया अणियट्टी-भागभागेसु वेदतिय कोहमाणं मायासंजलणमेव सुहुमते सुहुमोलोहो संते वज्ज णारायणारायं। खीणकसाय दुचरिमे-णिद्दापयला य उदयवोच्छिण्णा। णाणंतरायदसय दंसणच-त्तारिचरिमम्हि। तदियेक्कवज्जणिमिणं थिरसुहसरगदि उरालतेजदुगं। संठाणंवण्णागुरुचउक्क पत्तेयजोगिम्हि तदियेक्कंमणुवगदीपंचदियसुभगतसतिगादेज्जं। जसतित्थंमणुवाऊ उच्च च अजोगिचरिमम्हि। सत्तरसेक्कारखचदुसहियसयं सगिगिसीदिछुदुसदरी। छावट्ठिसट्ठिणवसगवण्णासदुदालवा-रुदया पणणवइगि सत्तरसं अट्ठट्ठय चदुरछक्कछच्चेव य इगिदुगसोलुगदालं उदीरणाहोति जोगंता। सोलट्ठेक्किगि-छक्कं चदुसेक्कं वादरे अदो एक्कं। खीणे सोलसऽजोगे वायत्तरि तेरुवत्तंते। णिरयतिरिक्खदुवियलंथीणतिगुज्जोव-तावएइंदी। साहरणसुहुमथावर सोलं मज्झिमकसाय$\cdot$ट्ठं संढित्थिछक्कसाया पुरिसोकोहो य माणमायं च। थूले सुहुमे लोहो उदयं वाहोदि खीण म्हि। देहादीफस्संता थिरसुहसर सुरविहाय दुगदुमगं। णिमिणाजसणादेज्जं पत्तेयापुण्ण अगुरुचऊ,अणुदयतदियंणीचमजोगिदुचरिमम्हि सत्तवोच्छिण्णा। उदयगवार णराणू तेरस चरिमम्हि वोच्छिण्णा। णमतिणिणम

इगिदोद्दोदसदस सोलट्ठगदिहीणेसु। सत्ता हवंत्ति एवं असहायपरक्क मुद्दिट्ठं। छसु सगविहमट्ठविहं कम्मंबंधन्ति तिसुयसत्तविहं। छव्विहमेक्कट्ठाणेतिसु एक्कमवंधगो एक्को। चत्तारि तिण्णितियचउपयडिट्ठाणाणिमूलपयडीणं। भुजगारप्पदराणिय अवट्ठिदाणिविकमे होंति अट्ठ्दओ सुहुमोत्तिय मोहेण विणाडु संतरवीणेसु। घादिदराणचउक्कस्सुदओ केवलिदुगेणियमा संतोत्ति अट्ठसत्ता खीणे सत्तेव होंतिसत्ताणि। जोगिम्ह अजोगिम्हि य चत्तारि हवंति सत्ताणि। णवछक्क चदुक्कंच य विदियावरणस्स वंधणाणाणि। भुजगारप्पदराणि य अवट्ठिदाणिविय जाणाहि। णव सासणोत्तिवंधो छच्चेव अपुव्वपढमभागोत्ति। चत्तारिहोंति तत्तो सुहुमकसायस्स चरिमोत्ति खीणोत्ति चार उदया पंचसुणिद्दासुदोसुणिद्दासु। एक्के उदयंपत्ते खीणदुचरिमोत्तिय पंचुदया। मिच्छादुवसंतोत्तिय अणियट्टीखवगपढमभागोत्ति। णवसत्ता खीणस्सदुचरिमोत्तिय छच्चदुचरिमे। वावीसमे कवीसं सत्तारस तेरसेवणवपंच। चदुतिय दुगं च एक्कं वंधट्ठाणाणिमोहस्स। वावीसमेक्कवीसंसत्तर सत्तारतेरतिसुणवयं। थूलेपणचदुतिय दुगमेक्कं मोहस्सठाणाणि। छव्वावीसे चदुइगवीसे दोद्दो हवंति छट्ठोत्ति। एक्केक्कमदो भंगोवंधट्ठाणेसु मोहस्स। दसवीसं एक्कारस तेत्तीसं मोहबंधठाणाणि। भुजगारप्पदराणि अवट्ठिदाणिविय सामण्णे। सत्तावीसहियसयं पणदालं पचहत्तारिहियसयं। भुजगारप्पदराणि य अवट्ठिदाणिविसेसेण। णभ चउवीसं वारस बीसं चउरट्ठवीस दोद्दाय। थूले पणगादीणं तियतियमिच्छादिभुजगारा। अप्पदरा

पुणतीसं णम णम छद्दोण्णि दोण्णि णम एक्कं। थूले पणगादीणं एक्केक्के अन्तिमे सुण्णं। दसणव अट्ठयसत्तय छप्पण चत्तारिदोण्णि एक्कंच। उदयट्ठाणा मोहे णव चेव यहोंति णियमेण। एक्कयछक्केयारं एयारेयारसेव णव तिण्णि। एदे चउवीसगदा चदुवीसेयार दुगठाणे। अट्ठय सत्तय छक्कय चदुतिदुगेगाधिगाणि वीसाणि वीसाणि। तेरसबारेयार' पणादि एगूणयंसत्तं। पढमतियं च य पढमपढमंचउवीसयं च मिस्सम्हि पढमं चउवीसचऊ अविरददेसेमत्तिदरे। अउचउरेक्कावीसं उवसमसेढिम्हि खवगसेढिम्हि। एक्कावीसंसत्ता अट्ठकसाया णियट्टित्ति। इगिचदुबंधक्खवगे तेरस बारस एगार चउसत्ता। तिदुइगिबंधे तिदुइ गि णव गुच्छिट्ठाणमविवक्खा तेवीसं, पणवीसं छव्वीसं, अट्ठवीस, णुगतीसं, तीसे,क्कतीस,मेवंएक्को, बंधोदुसेढिम्हि एयक्खअपज्जत्तं, इगिपज्जत्तवितिचपणरापजतं, एइंदिपजत्तं सुरणिरयगईहिं संजुत्त'। पजत्तगवितिचपमणुसदेवगदिसंजुदाणि, दोण्णि, पुणो। सुरगइजुद, मगइजुदं बंधट्ठाणाणि णामस्स वीसंइगिचउवीसं तत्तो इगितीसओत्ति एयधियं। उदयट्ठाणा एवं

२१ २४ २५
णवअट्ठय होंति णामस्से। चदुगदिया एइंदी विसेसणुदेवणि-

२६ २७
रयएइंदी। इगिवितिचपसामण्णा विसेसमुरणारगेइंदी। सामण्ण-

२८–२९ ३०
सयलवियलविसेसमणुस्ससुरणारयादोण्हं। सयलवियलसामण्णा

पुरुष पुरुष

३१ १—८

सजोगपंचक्खवियलया सामी तिदुइगिणउदीणउदी अउचउदो

अयोगी

अहियसीदि सीदीय। उणासीदुदुकरि सत्तरिदसय णवसत्ता। सव्वंतित्थोहारूमऊणं सुरणीरयदुचारिदुगे। उव्वेलेदेहदे च उतेरे जोगिस्स दसणवयं। मिच्छत्तं अविरमणं कसायजोगाय आसवाहोंति। पणवारस पणुवीसं पण्णरसा होंति तब्भेया पणवण्णा पण्णासातिदाल छादाल सत्ततीसाय चदुवीसा बावीसामपुव्वकरणोत्ति थूलेसोलसपहुदी एगूणं जाव होदि दस ठाणं। सुहुमादिसुदसणवयं णवयं जोगिम्मि सत्तेव। दस अट्ठारस दसयं सत्तर णवसोलसच दोण्हंपि। अट्ठय चोद्दस, पणयंसत्ततिये, दुगेगमेगमदो चउगइ भव्वो सण्णी पुण्णो गब्भज विसुद्ध सागारो। पढमुवसमं स गिण्हदि पंचमवरलद्धि चरिमम्हि। खयउवसमियविसोही देसणयाउग्गकरणलद्धीए। चत्तारिवि सामण्णा करणं सम्मत्त चारित्ते। कम्ममलप-डलसत्ती पडिसमयमणंतगुणविहीणकमा। होदूणुदीर-दिजदातदा खओव समलद्धीहु। आदिमलद्धिभवो जो भावो जीवस्स सादपहुदीणं। सत्थाणं पयडीणं बंधणजोगोविसुद्धलद्धीसो छद्दव्वणवपयत्थोपदेस परयरिपहुदिलाहो जो। देसिदपदत्थ धारण लाहोवा तदियलद्धीहु। अंतो कोडाकोडी विट्ठाणेठिदिरसाण जं करण। पाउग्गलद्धिणामा भव्वाभव्वेसु सामण्णा।

१–४ ५ ६ ७ ८–९

आंउपडि णिरयदुगे सुहुमतियं सुहुमदोण्णिपत्तेयं। बादर-

१० – १४
जुददोण्णिपदे अपुण्णजुदबितिचसण्णि सण्णीसु। अड्ढअपुण्ण-
१५–२२
जुदेसुविपुण्णजुदेसुनेसु तुरियपदे। एइंदियआदावं थावरणामं
२३ २४ २५
च मिलिदव्वम्। तिरिगदुगुज्जोवोविय णीचे अपसत्थगमणदुम-
२६ २७ २८ २९
गतिये। हुंडासंपत्ते विजयणओसएवामरवीलीए। खुज्जद्धणाराए
३० ३१ ३२ ३३
इत्थीवेदेय सादिणाराए। णग्गोभवज्जणाराए मणुजोरालदुगवज्जे।
३४
अथिरअसुहजस अरदी सोय असन्दे य होंति
चोतीसा। बंधोसरणट्ठाणा भव्वाभव्वेसु सामण्णा। जागदी
अरहंताणं णिट्ठिट्ठाणा जागदी। जागदी वीदमोहाणं
सामेभवदु सस्सदा भिक्खंचर वस रणो योवंजेमेहिमाबह्व जंय
दुक्खं सह जिणणिद्दा मेत्तिं भावेहि सुट्ठु वेरग्गं। णरतिरि-
यग्गं ओघो भवणतिसोहम्मिजुगलए विदियं। तिदियं अट्ठार
समं तेवीसदिमादिदसपदंचरिम। ते चेवचोदस्पदा अट्ठारसमेण
हणिया होंति रयणादि पुढविछक्के सणक्कुमारादिदसकप्पे।
ते तेरसविदियेण य तेवीसहिमेण चावि परिहीणा। आणदक
प्पादुवरिम गेवेज्जतोत्ति ओसरणा। ते चेवेक्कारपदा तदिऊणा
विदियठाण संपत्ता। चउवीसदिमेणणा सत्तमिपुढविम्हि
ओसरणा। दुतिआउतित्थ्यहार च अकणासम्मगणे हीणावा।
मिस्सेणुणा वावियसव्वे पाहिहवे सत्तं। दंसणमोहवा बखा

पडुवगो कम्मभूमिजो मणुसो। तित्थयरपायमूले केवलिसुद केवलीमूले। णिट्ठवगो तदाणे विमाणभोगावणीसु धम्मेय। किदकरणिज्जो चदुसुविदीसु उप्पज्जदे जम्हा आवलिय अणायारे[1]
२ ३ ४ ५ ६ ७ ८ ९ १०
चक्खिदिय सोद घाण जिब्भाए। मण वयण काय पासे अवाय
११ १२ १३ १४ १५ १६ १७
ईहा सुदु स्सारेन। केवलदंसणणाणे कसाय सुक्केकये पुधतेय
१८ १९ २० २१ २२ २३
पडिवादुवासामेंतय खवेंतए संपराये य। माणद्धा कोहद्धा मायद्धा
२४ २५ २६
तह यचेव लोहद्धा। खुद्भवगहणं पुण किट्टीकरणं च वोद्धव्वा।
२७ २८ २९ ३० ३१
संकामण ओवट्टण उवसंतकसाय खीणमोहद्धा। उवसामेंतयअद्धा खवेंत[31] अद्धा य वोद्धव्वा। णिव्वाघादेणेदा होंति जहण्णावो आणुपुव्वीए। एत्तो अणाणुपुव्वी उक्कस्सा होंति भजियव्वा। चक्खू सुदं पुधत्तं माणो वाओ तहेव उवसंते। उवसामेतयअद्धा दुगुणा सेसाहु सविसेसा। चदुरेकदुवण पंच छत्तिगठाणाणि अप्पमत्तंता। तिसु उवसमगे संतेत्ति य तिय तिय दोणिण गच्छंन्ति। सासणमत्तवज्जं अपमतत्तं समल्लियइ मिच्छो। मिच्छन्तं विदिसगुणे [illegible] स्संपढमं चउत्थं च। अविरदसम्मोदेसो पमत्तपरिहीणमप्पमतंतं। छट्ठामोणि पमत्तो छट्ठगुणं अप्पमत्तोदु होंति खवा इगि समये वोहिबुद्धाय पुरिसवेदाय। उक्कस्सेणट्ठुत्तरसयप्पमा सग्गदो य चुदा। पत्तेयबुद्धितित्थपरत्थिणहसम

मणोहिणाण जुदा। दसवीसछक्क दसवीसट्ठावीसं अट्ठाकमसो। जेट्ठावरबहुमज्झिमओगाहणगादुचारि अट्ठेय । जुगवं हवन्ति खवगा उवसमगा अद्धमेदेसि।

१४ समाधिमरण भाषा।

पं० सूरजचन्द जी रचित नरेन्द्र छंद

बंदौं श्रीअरहंत परमगुरु, जो सबको सुखदाई। इस जगमें दुख जो मैं भुगते, सो तुम जानो राई। अब मैं अरज करूं प्रभु तुमसे, करसमाधि उर माहीं। अंतसमयमें यह वर मांगूं सो दीजै जगराई।१। भवभवमैं तनधार नये मैं, भव भव शुभ सङ्ग पायो। भव भवमें नृपरिद्धि लई मैं, माता पिता सुत थायो भव भवमें तन पुरुषतनों धर, नारी हू तन लीनों। भवभवमें मैं भयो नपुंसक, आतमगुण नहिं चीनो।२। भवभव मैं सुरपद-वीपाई, ताके सुख अति भोगे। भवभव मैं गति नरकतनी धर, दुख पाये विधि योगे।। भव भवमैं तिर्यंच योनिधर, पायो दुख अति भारी। भवभवमैं साधर्मीजनको, सङ्ग मिल्यो हितकारी।३। भवभवमें जिनपूजन कीनि, दान सुपात्रहिं दीनो। भवभवमें मैं समवसरणमैं, देख्यो जिनगुण भीनों। एती वस्तु मिली भव भव मैं सम्यकगुण नहिं पायो जिनगुण भीनो। एती

वस्तु मिली भव भवमें मैं सम्यकगुण नहिं पायो। ना समाधियुत मरण कियो मैं तातैं जग भरमायो।४। काल अनादि भयो जग भ्रमते, सदा कुमरणहिं कीनों। एकबारहूं सम्यक्युत मैं, निज आतम नहिं चीनो। जो निजपरको ज्ञान होय तो, मरण समय दुख कांई। देह विनासी मैं निजभासी, जोतिस्वरूप सदाई।५। विषयकषायनके वश होकर देह आपनो जान्यो। कर मिथ्यासर धान हियेविच, आतम नाहिं पिछन्यो। यों कलेश पियधार मरणकर, चारों गति भरमायो। सम्यग्दर्शन-ज्ञान-चरन ये, हिरदेमें नाहिं लायो।६। अब या अरज करूं प्रभु सुनिये, मरण समय यह मांगों। रोगजनित पीड़ा मत होवो, अरु कषाय मत जागो। ये मुझ मरणसमय दुखदाता, इन हरसाता कीजै, जो समाधियुतमरण होय मुझ, अरु मिथ्यागद छीजै।७। यह तन सात कुधातमई है,देखतही घिन आवै। चर्मलपेटी ऊपर सोहै, भीतर विष्टा पावै ॥ अतिदुर्गंध अपावनसों यह, मूरख प्रीति बढावें। देह विनासी, जियअविनासी नित्यस्वरूप कहावै।८। यह तन जीर्ण कुटीसम आतम,यातैं प्रीति न कीजै। नूतन महल मिलै जब भाई, तब यामैं क्या छीजै। मृत्युहोनसे हानि कौन है, याको भय मत लावो। समतासे जो देह तजोगे तो शुभतन तुम पावो।९। मृत्यु मित्र उपकारी तेरो, इस अवसरके माहीं। जीरनतनसे देत नयो यह, या सम साहू नाहीं। या सेती इस मृत्युसमयपर, उत्सव अति ही कीजै। क्लेश भाव को त्याग सयाने समताभाव धरीजै।१०। जो तुम पूरव पुण्य

किये हैं, तिनको फल सुखदाई। मृत्युमित्र बिन कौन दिखावै, स्वर्गसंपदा भाई॥ रागरोषको छोड सयाने, सात व्यसन दुखदाई। अंतसमयमें समता धारो, परमव पंथ सहाई।११। कर्म महादुठ वैरी मेरो, तासेती दुख पावै। तन पिंजरमें बंध कियो मोहि, यासों कौन छुड़ावै॥ भूख तृषा दुख आदि अनेकन, इस ही तनमें गाढै। मृत्युराज अब आय दया कर, तनपिंजरसों काढै।१२। नाना वस्त्राभूषण मैंने, इस तनको पहराये। गंधसुगंधित अतर लगाये, षटरस असन कराये॥ रात दिना मैं दास होयकर, सेव करी तनकेरी। सो तन मेरे काम न आयो, भूल रह्यो निधि मेरी।१३। मृत्युरायको शरन पाय तन, नूतन ऐसो पाऊं। जामें सम्यक रतन तीन लहि आठों कर्म खपाऊं॥ देखो तन सम और कृतघ्नी, नाहिं सु या जग माहीं। मृत्युसमयमें ये ही परिजन, सब ही हैं दुखदाई।१४। यह सब मोह बढावनहारे, जियको दुर्गतिदाता। इनसे ममत निवारो जियरा जो चाहो सुख साता॥ मृत्यु कल्पद्रुम पाय सयाने, मांगो इच्छा जेती। समता धरकर मृत्यु करो तो पावो संपति तेती।१५। चौआराधन सहित प्राण तज, तौ ये पदवी पावो। हरि प्रतिहरि चक्री तीर्थेश्वर, स्वर्गमुकतिमें जावो। मृत्युकल्पद्रुम सम नहिं दाता, तीनों लोक मझारे। ताको पाय कलेश करो मत, जन्म जवाहर हारे।१६। इस तनमें क्या राचै जियरा, दिन दिन जीरन होहै। तेजकांति बल नित्य घटत है, या सम अथिर सु को है। पांचों इंद्री शिथिल भई अब, स्वांस शुद्ध नहिं

आवै। तापर भी ममता नहि छोडै, समता उर नहिं लावै।१७। मृत्युराज उपकारी जियको, तनसों तोहि छुडावै। नातर या तनबंदीग्रहमें, परयो परयो बिललावै। पुदगलके परमाणु मिलकें, पिंडरूप तन भासी। याही मूरत मैं अमूरती, ज्ञानजोति गुणखासी।१८। रोगशोक आदिक जो वेदन, ते सब पुदगललारें। मैं तो चेतन व्याधि विना नित, हैं सो भाव हमारे॥ या तनसों इस क्षेत्र संबंधी, कारण आन बन्यो है। खानपान दे याको पोष्यो, अब सम भाव ठन्यो है।१९। मिथ्यादर्शन आत्मज्ञान बिन, यह तन अपनो जान्यो। इंद्रीभोग गिने सुख मैंने, आपो नाहिं पिछान्यो॥ तन विनशनतैं नाश जानि निज, यह अयान दुखदाई। कुटुम आदिको अपनो जान्यो, भूल अनादी छाई।२०। अब निज भेद जथारथ समझ्यो, मैं हूं ज्योतिस्वरूपी। उपजै विनसै सो यह पुदगल जान्यो याको रूपी॥ इष्टऽनिष्ट जेते सुख दुख हैं,सो सब पुदगल लागै। मैं जब अपनो रूप विचारों, तब वे सब दुख भागैं।२१। विन समता तनऽनंत धरे मैं, तिनमें ये दुख पायो। शस्त्रघाततैं ऽनन्त बार मर नाना योनि भ्रमायो॥ बार अनंतहि अग्नि माहिं जर, मूवो सुमति न लायो। सिंह व्याघ्र अहिऽनन्त बार मुझ, नाना दुःख दिखायो।२२। विन समाधि ये दुःख लहे मैं, अब उर समता आई। मृत्युराजको भय नहिं मानो,देवै तन सुखदाई॥ यातैं जब लग मृत्यु न आवै, तब लग जप तप कीजै। जपतपविन इस जगके माहीं, कोई भी ना सीजै।२३। स्वर्गसंपदा

तपसों पाव, तपसौ कर्म नसावै। तपही सों शिवकामिनिपति है, यासों तप चित लावै॥ अब मैं जानी समता विन मुझ कोऊ नाहि सहाई। मात पित सुत बांधव तिरिया ये सब हैं दुखदाई।२४। मृत्यु समयमें मोह करें ये तातें आरत हो है। आरततैं गति नीची पावे, यों लख मोह तज्यो है॥ और परिग्रह जेते जग मैं तिनसों प्रीत न कीजे। परभव मैं ये संग न चालैं, नाहक आरत कीजे।२५। जे जे वस्तु लखत हैं ते पर, तिनसों नेह निवारो। परगति मैं ये साथ न चालै, ऐसो भाव विचारो॥ जो परभव मैं संग चलै तुझ, तिनसों प्रीत सु कीजै। पंच पाप तज समता धारो, दान चार विध दीजै।२६। दशलक्षणमय धर्म धरो उर, अनुकंपा उर लावो। षोडशकारण नित्य विचारो, द्वादश भावन भावो॥ चारौं परवी प्रोषध कीजे, अशन रातको त्यागो। समता धर दुरभाव निवारो, संयमसों अनुरागो।२७। अंत समयमें यह शुभ भावहि, होवैं आनि सहाई। स्वर्गमोक्षफल तोहि दिखावैं, ऋद्धि देहिं अधिकाई। खोटे भाव सकल जिय त्यागो, उरमैं समता लाकै। जासेती गतिचार दूरकर, बसहु मोक्षपुर जाकै।२८। मनथिरता करकै तुम चिंतो, चौ आराधन भाई। येही तोकों सुख की दाता, और हितू कोउ नाहीं॥ आगैं बहु मुनिराज भये हैं, तिन गहि थिरता भारी। बहु उपसर्ग सहे शुभ पावन, आराधन उरधारी।२९। तिनमें कछुइक नाम कहूं मैं, सो सुन जिय चित लाकै। भावसहित अनुमोदे तासों,

दुर्गति होय न ताके ॥ अरु समता निज उरमें आवैं; भाव अधीरज जावै । यों निश दिन जो उन मुनिवरको, ध्यान हिये बिच लावै ।३०। धन्य धन्य सुकुमाल महामुनि, कैसे धीरज धारी । एक श्यालनी जुगबच्चाजुत पांव भख्यो दुखकारी ॥ यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी। तो तुमरे जिय कौन दुःख है ? मृत्यु महोत्सव भारी ।३१। धन्य धन्य जु सुकौशल स्वामी, व्याघ्रीने तन खायो । तौ भी श्रीमुनि नेक डिगे नहिं, आतम सों हित लायो ॥ यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी। तौ तुमरे० ।३२। देखो गजमुनिके शिर ऊपर, विप्र अगिनि बहु बारी। शीश जलै जिम लकड़ी तिनको, तौ भी नाहिं चिंगारी ॥ यह उपसर्ग सह्यो धर थिरता, आराधव चित धारी । तौ तुमरे० ।३३। सनतकुमार मुनीके तनमैं, कुष्ट वेदना व्यापी । छिन्न भिन्न तन तासों हूवो, तब चिंत्यो गुण आपी ॥ यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी । तौ तुमरे० ॥३४॥ श्रेणिकसुत गंगामैं डूब्यो, तब जिननाम चितारयो । धर सलेखना परिग्रह छोड्यो, शुद्ध भाव उर धारयो ॥ यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी । तौ तुमरे० ॥३५। समतभद्र मुनिवरके तनमैं, क्षुधावेदना आई । तौ दुखमें मुनि नेक न डिगियो, चिंत्यौ निज गुण भाई । यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी, तौ तुमरे० ।३६। ललितघटादिक तीस दोय मुनि कौशांबीतट जानो । नदीमैं मुनि बहकर

मूवे, सो दुख उन नहिं माने ॥ यह उपसर्ग सह्यो धर थिरता आराधन चितधारी । तौ तुमरे० ।३७। धर्मघोष मुनि चंपानगरी, बाह्य ध्यान धर ठाढ़े । एक मास की कर मर्यादा, तृषा दुःख सह गाढो ॥ यह उपसर्ग सह्यो धर थिरता आराधन चितधारी । तौ तुमरे० ।३८। श्रीदत्त मुनिको पूर्वजन्मको, वैरी देव सु आके । विक्रिय कर दुख शीततनो सो, सह्यो साध मन लाके ॥ यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी । तौ तुमरे० ।३९। वृषभसेन मुनि उष्णशिलापर, ध्यान धरयो मनलाई । सूर्यघाम अरु उष्ण पवनकी, वेदन सहि अधिकाई ॥ यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी । तौ तुमरे० ।४०। अभयघोष-मुनि काकंदीपुर, महावेदना पाई । वैरी चंडने सब तन छेद्यो, दुख दीनो अधिकाई ॥ यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी । तौ तुमरे० ।४१। विद्युतचरने बहु दुख पायो, तौ भी धीर न त्यागी । शुभभावनसों प्राण तजे निज, धन्य और बड़भागी ॥ यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी । तौ तुमरे० ।४२। पुत्रचिलाती नामा मुनिको, वैरीने तन घाता । मोटे मोटे कीट पड़े तन, तापर निज गुण राता ॥ यह उपसर्ग सह्यौ धर थिरता आराधन चितधारी । तौ तुमरे० ॥४३॥ दंडकनामा मुनिकी देही, बाणन कर अरि भेदी । तापर नेक डिगे नहिं वे मुनि, कर्म महारिपु छेदी ॥ यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी । तौ तुमरे० ।४४। अभिनंदन मुनि

आदि पांचसौ, घानो पेलिजु मारे। तौ भी श्रीमुनि समताधारी पूरबकर्म विचारे ॥ यह उपसर्ग सह्यो धर थिरता, आराधन चितधारी। तौ तुमरे० ॥४५॥ चाणक्यमुनि गौघरके माहीं, मूद अगिनि परजाल्यो। श्रीगुरु उर समभाव धारकै अपनो रूप सम्हाल्यो ॥ यह उपसर्ग सहो धर थिरता आराधन चितधारी। तौ तुमरे० ॥४६॥ सप्तशतक मुनिवर दुख पायो, हथनापुरमैं जानो। बलि ब्राह्मणकृत घोर उपद्रव, सो मुनिवर नहिं मानो ॥ यह उपसर्ग सह्यो धर थिरता आराधन चितधारी। तौ तुमरे० ॥४७॥ लोहमयी आभूषण गढके, ताते कर पहराये। पांचों पांडव मुनिके तनमैं, तौ भी नाहिं चिगाये ॥ यह उपसर्ग सह्यो धर थिरता आराधन चितधारी। तौ तुमरे० ॥४८॥ और अनेक भये इस जगमैं, समता रस के स्वादी। वे ही हमको हों सुखदाता, हर हैं टेव प्रमादी ॥ सम्यकदर्शन ज्ञान चरन तप ये आरासनचारी। ये ही मोकों सुखकी दाता, इन्हें सदा उर धारों ॥४९॥ यों समाधि उर माहीं लावो, अपनो हित जो चाहो। तज ममता अरु आठों मदको, जोति स्वरूपी ध्यावो ॥ जो कोई नित करत पयानो, ग्रामांतरके काजै। सो भी शकुन विचारै नीके, शुभके कारण साजै ॥५०॥ मात पितादिक सर्व कुटुम सब, नीके शकुन बनावै। हलदी धनिया पुंगी अक्षत, दूब दही फल लावै ॥ एक ग्राम जानेके कारण, करैं शुभाशुभ सारे। जब परगति को करत पयानो, तब नहिं सोचौ प्यारे ॥५१॥ सर्व कुटुम जब रोवन लागै, तोहि

रुलावैं सारे। ये अपशकुन करैं सुन तोकों तू यों क्यों न विचारै ॥ अब परगतिको चालत बिरियां धर्मध्यान उर आनो। चारों आराधन आराधो मोहतनो दुख हानो ॥५२॥ होय निःशल्य तजो सब दुविधा, आतमराम सु ध्यावो। जब परगतिको करहु पयानो परम तत्त्व उर लावो ॥ मोह जालको काट पियारे, अपनो रूप विचारो। मृत्युमित्र उपकारी तेरो, यों उर निश्चय धारो ॥५३॥

दोहा—मृत्युमहोत्सव पाठको, पढ़ो सुनो बुधिवान्।
सरधा धर नित सुख लहो, सूरचन्द शिवथान ॥५४॥
पंच उभय नव एक नभ, संवत सो सुखदाय।
आश्विन श्यामा सप्तमी, कह्यो पाठ मन लाय ॥५५॥

भक्तामरस्तोत्रम्।

भक्तामरप्रणतमौलिमणिप्रभाणामुद्योतकं दलितपापतमोवितानम्। सम्यक् प्रणम्य जिनपादयुगं युगादावालंबनं भवजले पततां जनानां ॥१॥ यः संस्तुतः सकलवाङ्मयतत्त्वबोधादुद्भूतबुद्धिपटुभिः सुरलोकनाथैः। स्तोत्रैर्जगत्त्रितयचित्तहरैरुदारैः स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥२॥ बुद्ध्या विनापि विबुधार्चितपादपीठ स्तोतुं समुद्यतमतिर्विगतत्रपोऽहं। बालं विहाय जलसंस्थितमिंदुबिंबमन्यः क इच्छति जनः सहसा गृहीतुं ॥३॥ वक्तुं गुणान्गुणसमुद्रशशांककांतान् कस्ते क्षमः सुरगुरुप्रतिमोपि बुद्ध्या। कल्पांतकालपवनोद्धतनक्रचक्रं, को वा तरीतुमलमंबु-

निधिं भुज्याभ्यां ॥४॥ सोऽहं तथापि तव भक्तिवशान्मुनीश कर्तुं स्तवं विगतशक्तिरपि प्रवृत्तः। प्रीत्यात्मवीर्यमविचार्य मृगो-मृगेंद्रं नाभ्येति किं निजशिशोः परिपालनार्थम् ॥५॥ अल्पश्रुतं श्रुतवतां परिहासधाम त्वद्भक्तिरेव मुखरीकुरुते बलान्माम्। यत्कोकिलः किल मधौ मधुरं विरौति तच्चाम्रचारुकलिकानिकरै-कहेतु ॥६॥ त्वत्संस्तवेन भवसंततिसन्निबद्धं पापं क्षणात्क्षय-मुपैति शरीरभाजाम्। आक्रांतलोकमलिनीलमशेषमाशु सूर्यां-शुभिन्नमिव शार्वरमंधकारम् ॥७॥ मत्वेति नाथ तव संस्तवनं मयेदमारभ्यते तनुधियापि तव प्रभावात्। चेतो हरिष्यति सतां नलिनीदलेषु मुक्ताफलद्युतिमुपैति ननूदबिंदुः ॥८॥ आस्तां तव स्तवनमस्तसमस्तदोषं त्वत्संकथापि जगतां दुरितानि हन्ति। दूरे सहस्रकिरणः कुरुते प्रभैव पद्माकरेषु जलजानि विकास-भांजि ॥९॥ नात्यद्भुतं भुवनभूषणभूतनाथ भूतैर्गुणैर्भुवि भवंतमभिष्टुवन्तः। तुल्या भवंति भवतो ननु तेन किं वा, भूत्या-श्रितं य इह नात्मसमं करोति ॥१०॥ दृष्ट्वा भवंतमनिमेष-विलोकनीयं नान्यत्र तोषमुपयाति जनस्य चक्षुः। पीत्वा पयः शशिकरद्युतिदुग्धसिन्धोः क्षारं जलं जलनिधेरसितुं क इच्छेत् ॥११॥ यैः शांतरागरुचिभिः परमाणुभिस्त्वं निर्मापित-स्त्रिभुवनैकललामभूत। तावंत एव खलु तेऽप्यणवः पृथिव्यां यत्ते समानमपरं न हि रूपमस्ति ॥१२॥ वक्त्रं क्व ते सुरनरो-रगनेत्रहारि, निःशेषनिर्जितजगत्त्रितयोपमानम्। बिम्बं कलङ्क-मलिनं क्व निशाकरस्य यद्वासरे भवति पाण्डुपलाशकल्पम् ॥१३॥

सम्पूर्णमण्डलशशाङ्ककलाकलापशुभ्रा गुणास्त्रिभुवनं तव लंघयन्ति। ये संश्रितास्त्रिजगदीश्वरनाथमेकं कस्तान्निवारयति संचरतो यथेष्टम् ॥१४। चित्रं किमत्र यदि ते त्रिदशाङ्गनाभिर्नीतं मनागपि मनो न विकारमार्गम्। कल्पान्तकालमरुता चलिताचलेन किं मन्दराद्रिशिखरं चलितं कदाचित् ॥१५॥ निर्धूमवर्तिरपवर्जिततैलपूरः कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि। गम्यो न जातु मरुतां चलिताचलानां दीपोऽपरस्त्वमसि नाथ जगत्प्रकाशः ॥१६॥ नास्तं कदाचिदुपयासि न राहुगम्यः स्पष्टीकरोषि सहसा युगपज्जगन्ति। नाम्भोधरोदरनिरुद्धमहाप्रभावः सुर्यातिशायिमहिमासि मुनीन्द्र लोके ॥१७॥ नित्योदयं दलितमोहमहान्धकारं गम्यं न राहुवदनस्य न वारिदानाम्। विभ्राजते तव मुखाब्जमनल्पकान्ति विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥१८॥ किं शर्वरीषु शशिनान्हि विवस्वता वा युष्मन्मुखेन्दुदलितेषु तमःसुनाथ। निष्पन्नशालिवनशालिनि जीवलोके कार्यं कियज्जलधरैर्जलभारनम्रैः ॥१९॥ ज्ञानं यथा त्वयि विभाति कृतावकाशं नैवं तथा हरिहरादिषु नायकेषु। तेजो महामणिषु याति यथा महत्त्वं नैवं तु काचशकले किरणाकुलेऽपि ॥२०॥ मन्ये वरं हरिहरादय एव दृष्टा दृष्टेषु येषु हृदयं त्वयि तोषमेति। किं वीक्षितेन भवता भुवि येन नान्यः कश्चिन्मनो हरति नाथ भवान्तरेऽपि ॥२१॥ स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्नान्या सुतं त्वदुपमं जननी प्रसूता। सर्वा दिशो दधति भानि सहस्ररश्मिं प्राच्येव दिग्जनयति

स्फुरदंशुजालम् ।२२। त्वामामनन्ति मुनयः परमं पुमांसमा-
दित्यवर्णममलं तमसः परस्तात् । त्वामेव सम्यगुपलभ्य जयन्ति
मृत्युं नान्यः शिवः शिवपदस्य मुनींद्र पंथाः ।२३। त्वामव्ययं
विभुमचिन्त्यमसंख्यमाद्यं ब्रह्माणमीश्वरमनन्तमनङ्गकेतुम् ।
योगीश्वरं विदितयोगमनेकमेकं ज्ञानस्वरूपममलं प्रवदन्ति
सन्तः ।२४। बुद्धस्त्वमेव विबुधार्चितबुद्धिबोधात्त्वं शङ्करोऽसि
भुवनत्रयशङ्करत्वात् । धातासि धीर शिवमार्गविधेर्विधानाद्व्यक्तं
त्वमेव भगवन्पुरुषोत्तमोऽसि ।२५। तुभ्यं नमस्त्रिभुवनार्तिहराय
नाथ तुभ्यं नमः क्षितितलामलभूषणाय । तुभ्यं नमस्त्रिजगतः
परमेश्वराय तुभ्यं नमो जिन भवोदधिशोषणाय ।२६। को
विस्मयोऽत्र यदि नाम गुणैरशेषैस्त्वं संश्रितो निरवकाश-
तया मुनीश । दोषैरुपात्तविबुधाश्रयजातगर्वैः स्वप्नान्तरेऽपि
न कदाचिदपीक्षितोऽसि ।२७। उच्चैरशोकतरुसंश्रितमुन्मयूख-
माभाति रूपममलं भवतो नितान्तम् । स्पष्टोल्लसत्किरणमस्ततमो
वितानं बिम्बं रवेरिव पयोधरपार्श्ववर्ति ।२८। सिंहासने
मणिमयूखशिखाविचित्रे विभ्राजते तव वपु कनकावदातम् ।
बिम्बं वियद्विलसदंशुलतावितानं तुङ्गोदयाद्रिशिरसीव सहस्र-
रश्मे ।२९। कुन्दावदातचलचामरचारुशोभं विभ्राजते तव वपुः
कलधौतकान्तम् । उद्यच्छशाङ्कशुचिनिर्झरवारिधारमुच्चैस्तटं सुर-
गिरेरिव शातकौम्भम् ।३०। छत्रत्रयं तव विभाति शशाङ्क-
कान्तमुच्चैः स्थितं स्थगितभानुकरप्रतापम् । मुक्ताफलप्रकरजाल-
विवृद्धशोभं प्रख्यापयत्त्रिजगतः परमेश्वरत्वम् ।३१।

गम्भीरताररवपूरितदिग्विभागस्त्रैलोक्यलोकशुभसङ्गमभूतिदक्षः ।
सद्धर्मराजजयघोषणघोषकः सन् खे दुन्दुभिर्ध्वनति ते यशसः
प्रवादी ।३२। मन्दारसुन्दरनमेरुसुपारिजातसन्तानकादिकुसुमो-
त्करवृष्टिरुद्धा । गन्धोदबिन्दुशुभमन्दमरुत्प्रपाता दिव्या दिवः
पतति ते वचसां ततिर्वा ।३३। शुम्भत्प्रभावलयभूरिविभा
विभोस्ते लोकत्रये द्युतिमतां द्युतिमाक्षिपन्ती । प्रोद्यद्दिवाकर-
निरन्तरभूरिसंख्या दीप्त्या जयत्यपि निशामपि सोम-
सौम्याम् ।३४। स्वर्गापवर्गगममार्गविमार्गणेष्टः सद्धर्मतत्त्व-
कथनैकपटुस्त्रिलोक्याः दिव्यध्वनिर्भवति ते विशदार्थसर्वभाषा-
स्वभावपरिणामगुणप्रयोज्यः ।३५। उन्निद्रहेमनवपङ्कजपुञ्जकान्ती
पर्युल्लसन्नखमयूखशिखाभिरामौ । पादौ पदानि तव यत्र जिनेंद्र
धत्तः पद्मानि तत्र विबुधाः परिकल्पयन्ति ।३६। इत्थं यथा
तव विभूतिरभूज्जिनेंद्र । धर्मोपदेशनविधौ न तथा परस्य ।
यादृक्प्रभा दिनकृतः प्रहतान्धकारा तादृक्कुतो ग्रहगणस्य विका-
सिनोऽपि ।३७। श्च्योतन्मदाविलविलोलकपोलमूलमत्तभ्रम-
द्भ्रमरनादविवृद्धकोपम् । ऐरावताभमिभमुद्धतमापतन्तं दृष्ट्वा भयं
भवति नो भवदाश्रितानाम् ।३८। भिन्नेभकुम्भगलदुज्ज्वल-
शोणिताक्तमुक्ताफलप्रकरभूषितभूमिभागः । बद्धक्रमः क्रमगतं
हरिणाधिपोऽपि नाक्रामति क्रमयुगाचलसंश्रितं ते ।३९।
कल्पान्तकालपवनोद्धतवह्निकल्पं दावानलं ज्वलितमुज्ज्वलमुत्स्फु-
लिङ्गम् । विश्वं जिघत्सुमिव सम्मुखमापतन्तं त्वन्नामकीर्तनजलं
शमयत्यशेषम् ।४०। रक्तेक्षणं समदकोकिलकण्ठनीलं क्रोधोद्धतं

फणिनमुत्फणमापतन्तम् । आक्रामति क्रमयुगेन निरस्तशङ्कस्त्व-न्नामनागदमनी हृदि यस्य पुंसः ॥४१॥ वल्गत्तुरंगगजगर्जित-भीमनादमाजौ बलं बलवतामपि भूपतीनाम् । उद्यद्दिवाकरमयूख-शिखापविद्धं त्वत्कीर्तनात्तम इवाशु भिदामुपैति ॥४२॥ कुन्ताग्रभिन्नगजशोणितवारिवाहवेगावतारतरणातुरयोधभीमे । युद्धे जयं विजितदुर्जयजेयपक्षास्त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ।४३। अम्भोनिधौ क्षुभितभीषणनक्रचक्रपाठीनपीठभय-दोल्बणवाडवाग्नौ । रङ्गत्तरङ्गशिखरस्थितयानपात्रास्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ।४४। उद्भूतभीषणजलोदरभारभुग्नाः शोच्यां दशामुपगताश्च्युतजीविताशाः । त्वत्पादपङ्कजरजोमृत-दिग्धदेहा मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ।४५। आपाद-कण्ठमुरुशृङ्खलवेष्टिताङ्गा गाढं बृहन्निगडकोटिनिघृष्टजङ्घाः । त्वन्नाममन्त्रमनिशं मनुजाः स्मरन्तः सद्यः स्वयं विगतबन्धभया भवन्ति ।४६। मत्तद्विपेन्द्रमृगराजदवानलाहिसंग्रामवारिधि-महोदरबन्धनोत्थम् । तस्याशु नाशमुपयाति भयं भियेव यस्ता-वकं स्तवमिमं मतिमानधीते ।४७। स्तोत्रस्रजं तव जिनेन्द्र गुणैर्निबद्धां भक्त्या मया विविधवर्णविचित्रपुष्पाम् । धत्ते जनो य इह कण्ठगतामजस्रं तं मानतुङ्गमवशा समुपैति लक्ष्मीः ।४८।

॥ इति श्रीमान् तुङ्गाचार्यविरचितं भक्तामरस्तोत्रम् ॥

—०—

श्रीसिद्धसेनदिवाकरप्रणीतं

कल्याणमन्दिरस्तोत्रम्।

कल्याणमन्दिरमुदारमवद्यभेदि भीताभयप्रदमनिन्दितमंघ्रिपद्मम् । संसारसागरनिमज्जदशेषजन्तुपोतायमानमभिनम्य जिनेश्वरस्य ।१। यस्य स्वयं सुरगुरुर्गरिमाम्बुराशेः स्तोत्रं सुविस्तृतमतिर्न विभुर्विधातुम् । तीर्थेश्वरस्य कमठस्मयधूमकेतोस्तस्याहमेष किल संस्तवनं करिष्ये ।२। (युग्मम्) सामान्यतोऽपि तव वर्णयितुं स्वरूपमस्मादृशाः कथमधीश भवन्त्यधीशाः। धृष्टोऽपि कौशिकशिशुर्यदि वा दिवान्धो रूपं प्ररूपयति किं किल घर्मरश्मेः ।३। मोहक्षयादनुभवन्नपि नाथ मर्यो नूनं गुणान्गणयितुं न तव क्षमेत । कल्पान्तवान्तपयसः प्रकटोऽपि यस्मान्मीयेतकेन जलधेर्ननु रत्नराशिः ॥४॥ अभ्युद्यतोऽस्मि तव नाथ जडाशयोऽपि कर्तुं स्तवं लसदसंख्यगुणाकरस्य। बालोऽपि किं न निजबाहुयुगं वितत्य विस्तीर्णतां कथयति स्वधियाम्बुराशेः ॥५॥ ये योगिनामपि न यान्ति गुणास्तवेश वक्तुं कथं भवति तेषु ममावकाशः । जाता तदेवमसमीक्षितकारितेयं जल्पन्ति वा निजगिरा ननु पक्षिणोऽपि ॥६॥ आस्तामचिन्त्यमहिमा जिन संस्तवस्ते नामापि पाति भवतो भवतो जगन्ति । तीव्रातपोपहतपान्थजनान्निदाघे प्रीणाति पद्म-

सरसः सरसोऽनिलोऽपि ॥७॥ हृद्वर्तिनि त्वयि विभो शिथिलीभवन्ति जन्तोः क्षणेन निबिडा अपि कर्मबन्धाः। सद्यो भुजङ्गममया इव मध्यभागमभ्यागते वनशिखण्डिनि चन्दनस्य ॥८॥ मुच्यन्त एव मनुजाः सहसा जिनेन्द्र रौद्रैरुपद्रवशतैस्त्वयि वीक्षितेऽपि। गोस्वामिनि स्फुरिततेजसि दृष्टमात्रे चौरैरिवाशु पशवः प्रपलायमानैः ॥९॥ त्वं तारको जिन कथं भविनां त एव त्वामुद्वहन्ति हृदयेन यदुत्तरन्तः। यद्वा दृतिस्तरति यज्जलमेष नूनमन्तर्गतस्य मरुतः स किलानुभावः ॥१०॥ यस्मिन्हरप्रभृतयोऽपि हतप्रभावाः सोऽपि त्वया रतिपतिः क्षपितः क्षणेन। विध्यपिता हुतभुजः पयसाथ येन पीतं न किं तदपि दुर्धरवाडवेन ॥११॥ स्वामिन्ननल्पगरिमाणमपि प्रपन्नास्त्वां जन्तवः कथमहो हृदये दधानाः। जन्मोदधिं लघु तरन्त्यतिलाघवेन चिन्त्यो न हन्त महतां यदि वा प्रभावः ॥१२॥ क्रोधस्त्वया यदि विभो प्रथमं निरस्तो ध्वस्तस्तदा वद कथं किल कर्मचौराः। प्लोषत्यमुत्र यदि वा शिशिरापि लोके नीलद्रुमाणि विपिनानि न किं हिमानी ॥१३॥ त्वां योगिनो जिन सदा परमात्मरूपमन्वेषयन्ति हृदयाम्बुजकोषदेशे पूतस्य निर्मलरुचेर्यदि वा किमन्यदक्षस्य सम्भवपदं ननु कर्णिकायाः ॥१४॥ ध्यानाज्जिनेश भवतो भविनः क्षणेन देहं विहाय परमात्मदशां व्रजन्ति। तीव्रानलादुपलभावमपास्य लोके चामीकरत्वमचिरादिव धातुभेदाः ॥१५॥ अन्तः सदैव जिन यस्य विभाव्यसे त्वं भव्यैः कथं तदपि नाशयसे शरीरम्। एतत्स्वरूपमथ मध्य-

विवर्तिनो यद्विग्रहं प्रशमयन्ति महानुभावाः ॥१६॥ आत्मा मनोषिभिरयं त्वदभेदबुद्ध्या ध्यातौ जिनेन्द्र भवतीह भवत्प्रभावः। पानीयमप्यमृतमित्यनुचिन्त्यमान किं नाम नो विषविकारमपाकरोति ॥१७॥ त्वामेव वीततमसं परवादिनोऽपि नूनं विभो हरिहरादिधिया प्रपन्नाः। किं काचकामलिभिरीश सितोऽपि शङ्खो नो गृह्यते विविधवर्णविपर्ययेण ॥१८॥ धर्मोपदेशसमये सविधानुभावादास्तां जनो भवति ते तरुरप्यशोकः। अभ्युद्गते दिनपतौ समहीरुहोऽपि किं वा विबोधमुपयाति न जीवलोकः ॥१९॥ चित्रं विभो कथमवाङ्मुखवृन्तमेव विष्वक्पतत्यविरला सुरपुष्पवृष्टिः। त्वद्गोचरे सुमनसां यदि वा मुनीश गच्छन्ति नूनमध एव हि बन्धनानि ॥२०॥ स्थाने गभीरहृदयोदधिसम्भवायाः पीयूषतां तव गिरः समुदीरयन्ति। पीत्वा यतः परमसंमदसङ्गभाजो भव्या व्रजन्ति तरसाप्यजरामरत्वम् ॥२१॥ स्वामिन्सुदूरमवनम्य समुत्पतन्तो मन्ये वदन्ति शुचयः सुरचामरौघाः। येऽस्मै नतिं विदधते मुनिपुङ्गवाय ते नूनमूर्ध्वगतयः खलु शुद्धभावाः ॥२२॥ श्यामं गभीरगिरमुज्ज्वलहेमरत्नसिंहासनस्थमिह भव्यशिखण्डिनस्त्वाम्। आलोकयन्ति रभसेन नदन्तमुच्चैश्चामीकराद्रिशिरसीवनवाम्बुवाहम् ॥२३॥ उद्गच्छता तव शितिद्युतिमण्डलेन लुप्तच्छदच्छविरशोकतरुर्बभूव। सांनिध्यतोऽपि यदि वा तव वीतराग! नीरागतां व्रजति को न सचेतनोऽपि ॥२४॥ भो भोः प्रमादमवधूय भजध्वमेनमागत्य निर्वृतिपुरीं प्रतिसार्थवाहम्। एतन्निवेदयति देव जगत्त्रयाय मन्ये नदन्नभिनभः सुरदुन्दुभिस्ते

॥२५॥ उद्द्योतितेषु भवता भुवनेषु नाथ ताराान्वितो विधुरयं विहताान्धकारः। मुक्ताकलापकलितोरुसितातपत्रव्याजात्त्रिधा धृत-तनुर्ध्रुवमभ्युपेतः ॥२६॥ स्वेन प्रपूरितजगत्त्रयपिण्डितेन कान्तिप्रतापयशसामिव सञ्चयेन। माणिक्यहेमरजतप्रविनिर्मितेन सालत्रयेण भगवन्नभितो विभासि ॥२७॥ दिव्यस्रजो जिन नमत्त्रिदशाधिपानामुत्सृज्य रत्नरचितानपि मौलिबन्धान्। पादौ श्रयन्ति भवतो यदि वा परत्र त्वत्सङ्गमे सुमनसो न रमन्त एव ॥२८॥ त्वं नाथ जन्मजलधेर्विपराङ्मुखोऽपि यत्तारयस्यसुमतो निजपृष्ठलग्नान्। युक्तं हि पार्थिवनिपस्य सतस्तवैव चित्रं विभो यदसि कर्मविपाकशून्यः ॥२९॥ विश्वेश्वरोऽपि जनपालक दुर्गतस्त्वं किंवाक्षरप्रकृतिरप्यलिपिस्त्वमीश। अज्ञानवत्यपि सदैव कथंचिदेव ज्ञानं त्वयि स्फुरति विश्वविकासहेतु ॥३०॥ प्राग्भारसम्भृतनभांसि रजांसि रोषादुत्थापितानि कमठेन शठेन यानि। छायापि तैस्तव न नाथ हता हताशो ग्रस्तस्त्वमीभि-रयमेव परं दुरात्मा ॥३१॥ यद्गर्जदूर्जितघनौघमदभ्रभीम-भ्रश्यत्तडिन्मुसलमांसलघोरधारम्। दैत्येन मुक्तमथ दुस्तरवारि दध्रे तेनैव तस्य जिन दुस्तरवारिकृत्यम् ॥३२॥ ध्वस्तोर्ध्वकेश-विकृताकृति मर्त्यमुण्डप्रालम्बभृद्भयदवक्त्रविनिर्यदग्निः। प्रेतव्रजः प्रतिभवन्तमपीरितो यः सोऽस्याभवत्प्रतिभवं भवदुःखहेतुः ॥३३॥ धन्यास्त एव भुवनाधिप ये त्रिसन्ध्यमाराधयन्ति विधिवद्विधु-तान्यकृत्याः। भक्त्योल्लसत्पुलकपक्ष्मलदेहदेशाः पादद्वयं तव विभो भुवि जन्मभाजः ॥३४॥ अस्मिन्नपारभववारिनिधौ मुनीश

मन्ये नमे श्रवणगोचरतां गतोऽसि । आकर्णिते तु तव गोत्र-पवित्रमन्त्रे किं वा विपद्विषधरी सविधं समेति ॥ ३५ ॥ जन्मांतरेऽपि तव पादयुगं न देव मन्ये मया महितमीहितदानदक्षम् । तेनेह जन्मनि मुनीश ! पराभवानां जातो निकेतनमहं मथिताशयानम् ॥ ३६ ॥ नूनं न मोहतिमिरावृतलोचनेन पूर्वं विभो सकृदपि प्रविलोकितोऽसि । मर्माविधो विधुरयन्ति हि मामनर्थाः प्रोद्यत्प्रबन्धगतयः कथमन्यथैते ॥ ३७ ॥ आकर्णितोऽपि महितोऽपि निरीक्षितोऽपि नूनं न चेतसि मया विधृतोऽसि भक्त्या । जातोऽस्मि तेन जनबान्धवदुःखपात्रं यस्मात्क्रियाः प्रतिफलन्ति न भावशून्याः ॥ ३८ ॥ त्वं नाथ दुःखिजनवत्सल हे शरण्य कारुण्यपुण्यवसते वशिनां वरेण्य । भक्त्या नते मयि महेश दयां विधाय दुःखांकुरोद्दलनतत्परतां विधेहि ॥ ३९॥ निःसंख्यसारशरणं शरणं शरण्यमासाद्य सादितरिपुप्रथितावदानम् । त्वत्पादपङ्कजमपि प्रणिधानवन्ध्यो वन्ध्योऽस्मि तद्भुवनपावन हा हतोऽस्मि ॥ ४० ॥ देवेन्द्रवन्द्य विदिताखिलवस्तुसारसंसारतारक विभो भुवनाधिनाथ । त्रायस्व देव करुणाहृद मां पुनीहि सीदन्तमद्य भयदव्यसनाम्बुराशेः ॥ ४१ ॥ यद्यस्ति नाथ भवदंघ्रिसरोरुहाणां भक्तेः फलं किमपि सन्ततसञ्चितायाः । तन्मे त्वदेकशरणस्य शरण्य भूयाः स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि ॥४२॥ इत्थं समाहितधियो विधिवज्जिनेन्द्र सान्द्रोल्लसत्पुलककञ्चुकिताङ्गभागाः । त्वद्बिम्बनिर्मलमुखाम्बुजबद्धलक्ष्या ये संस्तवं तव विभो रचयन्ति भव्याः ॥ ४३ ॥ जननयनकुमुद-

चन्द्र प्रभास्वराः स्वर्गसम्पदो भुक्त्वा । ते विगलितमलनिचया अचिरान्मोक्षं प्रपद्यन्ते ॥ ४४ ॥

। इति सिद्धसेनदिवाकरप्रणीतं कल्याणमन्दिरस्तोत्रम् ॥

श्रीवादिराजप्रणीतम्

१७ एकीभावस्तोत्रम् ।

एकीभावं गत इव मया यः स्वयं कर्मबन्धो घोरं दुःखं भव भवगतो दुर्निवारः करोति । तस्याप्यस्य त्वयि जिनवरे भक्तिरुन्मुक्तये चेज्जेतुं शक्यो भवति न तया कोऽपरस्तापहेतुः ॥१॥ ज्योतीरूपं दुरितनिवहध्वान्तविध्वंसहेतुं त्वामेवाहुर्जिनवर चिरं तत्त्वविद्याभियुक्ताः । चेतोवासे भवसि च मम स्फारमुद्भासमानस्तस्मिन्नंहः कथमिव तमो वस्तुतो वस्तुमीष्टे ॥२॥ आनन्दाश्रुस्नपितवदनं गद्‌गदं चाभिजल्पन्यश्चायेत त्वयि दृढमनाः स्तोत्रमन्त्रैर्भवंतम् । तस्याभ्यस्तादपि च सुचिरं देहवल्मीकमध्यान्निष्कास्यन्ते विविधविषमव्याधयः काद्रवेयाः ॥३॥ प्रागेवेह त्रिदिवभवनादेष्यता भव्यपुण्यात्पृथ्वीचक्रं कनकमयतां देव निन्ये त्वयेदम् । ध्यानद्वारं मम रुचिकरं स्वान्तगेहं प्रविष्टस्तत्किं चित्रं जिन वपुरिदं यत्सुवर्णीं करोषि ॥४॥ लोकस्यैकस्त्वमसि भगवन्निर्निमित्तेन बन्धुस्त्वय्येवासौ सकलविषया शक्तिरप्रत्यनीका । भक्तिस्फीतां चिरमधिवसन्मामिकां चित्तशय्यां मय्युत्पन्नं कथमिव

ततः क्लेशयूथं सहेयाः ॥ ५ ॥ जन्माटव्यां कथमपि मया देव दीर्घं भ्रमित्वा प्राप्तैवेयं तव नयकथा स्फारपीयूषवापी। तस्या मध्ये हिमकरहिमव्यूहशीते नितान्तं निर्मग्नं मां न जहति कथं दुःखदावोपतापाः ॥ ६ ॥ पादन्यासादपि च पुनतो यात्रया ते त्रिलोकीं हेमाभासो भवति सुरभिः श्रीनिवासश्च पद्मः। सर्वाङ्गेण स्पृशति भगवंस्त्वय्यशेषं मनो मे श्रेयः किंतत्स्वयमहरहर्यन्न मामभ्युपैति ॥ ७ ॥ पश्यन्तं त्वद्वचनममृतं भक्तिपात्र्या पिबन्तं कर्मारण्यात्पुरुषमसमानन्दधाम प्रविष्टम्। त्वां दुर्वारस्मरमदहरं त्वत्प्रसादैकभूमिं क्रूराकाराः कथमिव रुजाकण्टका निर्लुठन्ति ॥ ८ ॥ पाषाणात्मा तदितरसमः केवलं रत्नमूर्तिर्मानस्तम्भो भवति च परस्तादृशो रत्नवर्गः। दृष्टिप्राप्तो हरति स कथं मानरोगं नराणां प्रत्यासत्तिर्यदि न भवतस्तस्य तच्छक्तिहेतुः॥९॥ हृद्यः प्राप्ता मरुदपि भवन्मूर्तिशैलोपवाही सद्यः पुंसां निरवधिरुजाधूलिबन्धं धुनोति। ध्यानाहूतो हृदयकमलं यस्य तु त्वं प्रविष्टस्तस्याशक्यः क इह भुवने देव लोकोपकारः ॥ १० ॥ जानासि त्वं मम भवभवे यच्च यादृक्च दुःखं जातं यस्य स्मरणमपि मे शस्त्रवन्निष्पिनष्टि। त्वं सर्वेशः सकृप इति च त्वामुपेतोऽस्मि भक्त्या यत्कर्तव्यं तदिह विषये देव एव प्रमाणम् ॥११॥ प्रापद्दैवं तव नुतिपदैर्जीवकेनोपदिष्टैः पापाचारी मरणसमये सारमेयोऽपि सौख्यम्। कः संदेहो यदुपलभते वासवश्रीप्रभुत्वं जल्पञ्जाप्यैर्मणिभिरमलैस्त्वन्नमस्कारचक्रं ॥१२॥ शुद्धे ज्ञाने शुचिनि चरिते सत्यपि त्वय्यनीचा भक्तिर्नो चेद-

नवविसुखावञ्चिका कुञ्चिकेयम् । शक्योद्घाटं भवति हि कथं मुक्तिकामस्य पुंसो मुक्तिद्वारं परिदृढमहामोहमुद्राकवाटम् ॥१३॥ प्रच्छन्नः खल्वयमघमयैरन्धकारैः समन्तात्पन्था मुक्तेः स्थपुटितपदः क्लेशगर्तैरगाधैः । तत्कस्तेन व्रजति सुखतो देव तत्त्वावभासी यद्यग्रेऽग्रे न भवति भवद् भारतीरत्नदीपः ॥१४॥ आत्मज्योतिर्निधिरनवधिर्द्रष्टुरानन्दहेतुः कर्मक्षोणीपटलपिहितो योऽनवाप्यः परेषाम् । हस्ते कुर्वन्त्यनतिचिरतस्तं भवद्भक्तिभाजः स्तोत्रैर्बन्धप्रकृतिपुरुषोद्दामधात्रीखनित्रैः ॥ १५ ॥ प्रत्युपन्नानय हिमगिरेरायता चामृताब्धेर्यदिव त्वत्पदकमलयोः सङ्गता भक्तिगङ्गा । चेतस्तस्यां मम रुचिवशादाप्लुतं क्षालितांहः कल्माषं यद्भवति किमियं देव संदेहभूमिः ॥ १६ ॥ प्रादुर्भूतस्थिरपदसुखत्वामनुध्यायतो मे त्वय्येवाहं स इति मतिरुत्पद्यते निर्विकल्पा । मिथ्यैवेयं तदपि तनुते तृप्तिमभ्रेषरूपां दोषात्मानोऽप्यभिमतफलास्त्वत्प्रसादाद्भवन्ति ॥१७॥ मिथ्यावादमलमपनुदन्सप्तभङ्गीतरङ्गैर्वागम्भोधिर्भुवनमखिलं देव पर्येति यस्ते । तस्यावृत्तिं सपदि विबुधाश्चेतसैवाचलेन व्यातन्वन्तः सुचिरममृतासेवया तृप्नुवन्ति ॥१८॥ आहार्येभ्यः स्पृहयति परं यः स्वभावादहृद्यशस्त्रग्राही भवति सततं वैरिणा यश्च शक्यः । सर्वाङ्गेषु त्वमसि सुभगस्त्वं न शक्यः परेषां तत्किं भूषावसनकुसुमैः किं च शस्त्रैरुदस्त्रैः ॥१९॥इन्द्रः सेवां तव सुकुरुतां किं तया श्लाघनं ते तस्यैवेयं भवलयकरी श्लाघ्यतामातनोति । त्वं निस्तारी जननजलधेः सिद्धिकान्तापतिस्त्वं त्वं लोकानां प्रभुरिति तवश्लाघ्यते

स्तोत्रमित्थम् ॥ २० ॥ शुचिवर्चामणरसदृशी न त्वमन्येन तुल्य स्तुत्युद्गाराः कथमिव ततस्त्वय्यमी न क्रमन्ते । मैवं भूवंस्तदपि भगवन्भक्तिपीयूषपुष्टास्ते भव्यानामभिमतफलाः पारिजाता भवन्ति॥२१। कोपावेशो न तव न तव क्वापि देव प्रसादो व्याप्तं चेतस्तव हि परमोपेक्षयैवानपेक्षम् । आज्ञावश्यं तदपि भुवनं संनिधिर्वैरहारी क्वैवंभूतं भुवनतिलक ! प्राभवं त्वत्परेषु ॥ २२ ॥ देव स्तोतुं त्रिदिवगणिकामण्डलीगीतकीर्तिं तोतूर्ति त्वां सकल-विषयज्ञानमूर्तिं जनो यः। तस्य क्षेमं न पदमटतो जातु जाहूर्ति पन्थास्तत्त्वग्रन्थस्मरणविषये नैष मोमूर्ति मर्त्यः ॥२३॥ चित्ते कुर्वन्निरवधिसुखज्ञानदृग्वीर्यरूपं देव त्वां यः समयनियमादादरेण स्तवीति । श्रेयोमार्गं स खलु सुकृती तावता पूरयित्वा कल्या-णानां भवति विषयः पञ्चधापञ्चितानाम् ॥ २४ ॥ भक्तिप्रह्व-महेन्द्रपूजितपदत्वत्कीर्तने न क्षमाः सूक्ष्मज्ञानदृशोऽपि संयमभृतः के हन्तमन्दा वयम् । अस्माभिः स्तवनच्छलेन तु परस्त्वय्यादरस्त-न्यते स्वात्माधीनसुखैषिणां स खलु न कल्याणकल्पद्रुमः ॥२५॥ वादिराजमनुशाब्दिकलोको वादिराजमनु तार्किकसिंहः । वादि-राजमनु काव्यकृतस्ते वादिराजमनु भव्यसहायः ॥ २६ ॥

॥ इति श्रीवादिराजकृतमेकीभावस्तोत्रम् ॥

—•—

अथ श्रीधनञ्जयकविप्रणीतम्

१८–विषापहारस्तोत्रम् ।

स्वात्मस्थितः सर्वगतः समस्तव्यापारवेदी विनिवृत्तसङ्गः । प्रवृद्धकालोऽप्यजरो वरेण्यः पायादपायात्पुरुषः पुराणः ॥ १ ॥ परैरचिन्त्यं युगभारमेकः स्तोतुं वहन्योगिभिरप्यशक्यः । स्तुत्योऽद्य मेऽसौ वृषभो न भानोः किमप्रवेशे विशति प्रदीपः॥२॥ तत्याज शक्रः शकनाभिमानं नाहं त्यजामि स्तवनानुबन्धम् । स्वल्पेन बोधेन ततोऽधिकार्थं वातायनेनेव निरूपयामि ॥ ३ ॥ त्वं विश्वदृश्वा सकलैरदृश्यो विद्वानशेषं निखिलैरवेद्यः । वक्तुं कियान्कीदृश इत्यशक्यः स्तुतिस्ततोऽशक्तिकथा तवास्तु ॥४॥ व्यापीडितं बालमिवात्मदोषैरुल्लाघतां लोकमवापिपस्त्वम् । हिताहितान्वेषणमान्द्यभाजः सर्वस्य जन्तोरसि बालवैद्यः ॥५॥ दाता न हर्ता दिवसं विवस्वानद्यश्व इत्यच्युतदर्शिताशः । सव्याजमेवं गमयत्यशक्तः क्षणेन दत्सेऽभिमतं नताय ॥६॥ उपैति भक्त्या सुमुखः सुखानि त्वयि स्वभावाद्विमुखश्च दुःखम् । सदावदातद्युतिरेकरूपस्तयोस्त्वमादर्श इवावभासि ॥७॥ अगाधताऽब्धेः स यतः पयोधिर्मेरोश्च तुङ्गा प्रकृतिः स यत्र । द्यावापृथिव्योः पृथुता तथैव व्याप त्वदीया भुवनान्तराणि ॥ ८ ॥ तवानवस्था परमार्थतत्त्वं त्वया न गीतः पुनरागमश्च । दृष्टं विहाय त्वमदृष्ट-

मैत्रीविरुद्धवृत्तोऽपि समंजसस्त्वम् ॥ ६ ॥ स्मरः सुदग्धो भव-तैव तस्मिन्नुद्धूलितात्मा यदि नाम शम्भुः । अशेत वृन्दो-पहतोऽपि विष्णुः किं गृह्यते येन भवानजागः ॥ १० ॥ स नीरजा स्यादपरोऽघवान्वा तद्दोषकीर्त्यैव न ते गुणित्वम् । स्वतोऽम्बुराशेर्महिमा न देव स्तोकापवादेन जलाशयस्य ॥ ११ ॥ कर्मस्थितिं जन्तुरनेकभूमिं नयत्यमुं सा च परस्परस्य । त्वं नेतृभावं हि तयोर्भवाब्धौ जिनेन्द्र नौनाविकयोरिवाख्यः ॥ १२ ॥ सुखाय दुःखानि गुणाय दोषान्धर्माय पापानि समाचरन्ति । तैलाय बालाः सिकतासमूहं निपीडयन्ति स्फुटमत्वदीयाः ॥ १३ ॥ विषापहारं मणिमौषधानि मन्त्रं समुद्दिश्य रसायनं च । भ्राम्य-न्त्यहो न त्वमिति स्मरन्ति पर्यायनामानि तवैव तानि ॥१४॥ चित्ते न किंचित्कृतवानसि त्वं देवः कृतश्चेतसि येन सर्वम् । हस्ते कृतं तेन जगद्विचित्रं सुखेन जीवत्यपि चित्तबाह्यः ॥१५॥ त्रिकालतत्त्वं त्वमवैस्त्रिलोकीस्वामीति संख्यानियतेरमीषाम् । बोधाधिपत्यं प्रति नाभविष्यंस्तेऽन्येऽपि चेद्व्याप्स्यदमूनपीदम् ॥१६॥ नाकस्य पत्युः परिकर्म रम्यं नागम्यरूपस्य तवोपकारि । तस्यैव हेतुः स्वसुखस्य भानोरुद्बिभ्रतश्छत्रमिवादरेण ॥ १७ ॥ क्वोपेक्षकस्त्वं क्व सुखोपदेशः स चेत् किमिच्छाप्रतिकूलवादः । क्वासौ क्व वा सर्वजगत्प्रियत्वं तन्नो यथातथ्यमवेविजं ते ॥१८॥ तुङ्गात्फलं यत्तदकिञ्चनाच्च प्राप्यं समृद्धान्न धनेश्वरादेः । निरम्भसोऽप्युच्चतमादिवाद्रेर्नैकापि निर्याति धुनी पयोधेः ॥१९॥ त्रैलोक्यसेवानियमाय दण्डं दध्रे यदिन्द्रो विनयेन तस्य ।

वत्प्रातिहार्यं भवतः कुतस्त्यं तत्कर्मयोगाद्यदि वा तवास्तु ॥२०॥
भियम परं पश्यति साधु निःस्वः श्रीमान्न कश्चित्कृपणं त्वदन्यः।
यथा प्रकाशस्थितमन्धकारस्थायीक्षतेऽसौ न तथा तमःस्थम् ॥२१॥
स्ववृद्धिनिःश्वासनिमेषभाजि प्रत्यक्षमात्मानुभवेऽपि मूढः। किं
चाखिलज्ञेयविवर्तिबोधस्वरूपमध्यक्षमवैति लोकः ॥२२॥ तस्या-
त्मजस्तस्य पितेति देव त्वां येऽवगायन्ति कुलं प्रकाश्य।
तेऽद्यापि नन्वाश्मनमित्यवश्यं पाणौ कृतं हेमपुनस्त्यजन्ति॥२३॥
दत्तस्त्रिलोक्यां पटहोऽभिभूताः सुरासुरास्तस्य महान्स लाभः।
मोहस्य मोहस्त्वयि को विरोद्धुमूलस्य नाशो बलवद्विरोधः॥२४॥
मार्गस्त्वयैको ददृशे विमुक्तेश्चतुर्गतीनां गहनं परेण। सर्वं मया
दृष्टमिति स्मयेन त्वं मा कदाचिद्भुजमालुलोके ॥२५॥ स्वर्भा-
नुरर्कस्य हविर्भुजोऽम्भः कल्पान्तवातोऽम्बुनिधेर्विघातः। संसार-
भोगस्य वियोगभावो विपक्षपूर्वाभ्युदयास्त्वदन्ये ॥२६॥
अजानतस्त्वां नमतः फलं यत्तज्जानतोऽन्यं न तु देवतेति।
हरिन्मणिं काचधिया दधानस्तं तस्य बुद्ध्या वहतो न रिक्तः॥२७॥
प्रशस्तवाचश्चतुराः कषायैर्दग्धस्य देवव्यवहारमाहुः। गतस्य
दीपस्य हि नन्दितत्वं दृष्टं कपालस्य च मङ्गलत्वम् ॥२८॥
नानार्थमेकार्थमदस्त्वदुक्तं हितं वचस्ते निशमय्य वक्तुः।
निर्दोषतां के न विभावयन्ति ज्वरेण मुक्तः सुगमः स्वरेण ॥२९॥
न क्वापि वाञ्छा ववृते च वाक्ते काले क्वचित्कोऽपि तथा नियोगः।
न पूरयाम्यम्बुधिमित्युदंशुः स्वयं हि शीतद्युतिरभ्युदेति ॥३०॥
गुणा गभीराः परमाः प्रसन्ना बहुप्रकारा बहवस्तवेति। दृष्टोऽय-

मन्तः स्तवने न तेषां गुणो गुणानां किमतः परोऽस्ति ॥ ३१ ॥ स्तुत्या परं नाभिमतं हि भक्त्या स्मृत्या प्रणत्या च ततो भजामि । स्मरामि देवं प्रणमामि नित्यं केनाप्युपायेन फलं हि साध्यम् ॥ ३२ ॥ ततस्त्रिलोकीनगराधिदेवं नित्यं परं ज्योतिरनन्तशक्तिम् । अपुण्यपापं परपुण्यहेतुं नमाम्यहं वन्द्यमवन्दितारम् ॥ ३३ ॥ अशब्दमस्पर्शमरूपगन्धं त्वां नीरसं तद्विषयावबोधम् । सर्वस्य मातारममेयमन्यैर्जिनेन्द्रमस्मार्यमनुस्मरामि ॥ ३४॥ अगाधमन्यैर्मनसाऽप्यलङ्घ्यं निष्किंचनं प्रार्थितमर्थवद्भिः । विश्वस्य पारं तमदृष्टपारं पतिं जिनानां शरणं व्रजामि ॥ ३५ ॥ त्रैलोक्यदीक्षागुरवे नमस्ते यो वर्धमानोऽपि निजोन्नतोऽभूत् । प्राग्गण्डशैलः पुनरद्रिकल्पः पश्चान्न मेरुः कुलपर्वतोऽभूत् ॥३६॥ स्वयं प्रकाशस्य दिवा निशा वा न बाध्यता यस्य न बाधकत्वम् । न लाघवं गौरवमेकरूपं वन्दे विभुं कालकलामतीतम् ॥ ३७ ॥ इति स्तुतिं देव विधाय दैन्याद्वरं न याचे त्वमुपेक्षकोऽसि । छायातरुं संश्रयतः स्वतः स्यात्कश्छायया याचितयात्मलाभः ॥ ३८ ॥ अथास्ति दित्सा यदि वोपरोधस्त्वय्येव सक्तां दिश भक्तिबुद्धिम् । करिष्यते देव तथा कृपां मे को वात्मपोष्ये सुमुखो न सूरिः ॥ ३९ ॥ वितरति विहिता यथाकथंचिज्जिन विनताय मनीषितानि भक्तिः । त्वयि नुतिविषया पुनर्विशेषाद्दिशति सुखानि यशो धनं जयं च ॥ ४० ॥

॥ इति श्रीधनंजयकृतं विषापहारस्तोत्रम् ॥

—•—

श्रीभूपालकविप्रणीता

१६-जिनचतुर्विंशतिका

श्रीलीलायतनं महीकुलगृहं कीर्तिप्रमोदास्पदं वाग्देवीरतिकेतनं जयरमाक्रीडानिधानं महत्। सः स्यात्सर्वमहोत्सवैकभवनं यः प्रार्थितार्थप्रदं प्रातः पश्यति कल्पपादपदलच्छायं जिनाङ्घ्रिद्वयम् ॥१॥ शान्तं वपुः श्रवणहारि वचश्चरित्रं सर्वोपकारि तव देव ततः श्रुतज्ञाः। संसारमारवमहत्स्थलरुद्रसान्द्रच्छायामहीरुह भवन्तमुपाश्रयन्ते ॥ २ ॥ स्वामिन्नद्य विनिर्गतोऽस्मि जननीगर्भान्धकूपोदरादद्योद्घाटितदृष्टिरस्मि फलवज्जन्मास्मि चाद्य स्फुटम्। त्वामद्राक्षमहं यदक्षयपदानन्दाय लोकत्रयीनेत्रेन्दीवरकाननेन्दुममृतस्यन्दिप्रभाचन्द्रिकम् ॥ ३ ॥ निःशेषात्रदशेन्द्रशेखरशिखारत्नप्रदीपावली- सान्द्रीभूतमृगेन्द्रविष्टरतटीमाणिक्यदीपावलिः। क्वेयं श्रीः क्व च निःस्पृहत्वमिदमित्यूहातिगस्त्वादृशः सर्वज्ञानदृशश्चरित्रमहिमा लोकेश लोकोत्तरः ॥ ४ ॥ राज्यं शासनकारिनाकपति यत्त्यक्तं तृणावज्ञया, हेलानिर्दलितत्रिलोकमहिमा यन्मोहमल्लो जितः। लोकालोकमपि स्वबोधमुकुरस्यान्तः कृतं यत्त्वया, सैषाऽऽश्चर्यपरम्परा जिनवर क्वान्यत्र संभाव्यते ॥५ दानं ज्ञानधनाय दत्तमसकृत्पात्राय सद्वृत्तये चीर्णान्युग्रतपांसि तेन सुचिरं पूजाश्च बह्व्यः कृताः। शीलानां निचयः सहामलगुणैः सर्वः समासादितो दृष्टस्त्वं जिन येन दृष्टिसुभगः श्रद्धा-

परेण चणम् ॥ ६ ॥ प्रज्ञापारमितः स एव भगवान्पारं स एव श्रुतस्कन्धाब्धेर्गुणरत्नभूषण इति श्लाघ्यः स एव ध्रुवम् । नीयन्ते जिन येन कर्णहृदयालंकारतां त्वद्गुणाः संसाराहिविषापहारमणयस्त्रैलोक्यचूडामणेः ॥ ७ ॥ जयति दिविजवृन्दान्दोलितैरिन्दुरोचिर्निचयरुचिभिरुच्चैश्चामरैर्वीज्यमानः । जिनपतिरनुरज्यन्मुक्तिसाम्राज्यलक्ष्मीयुवतिनवकटाक्षक्षेपलीलां दधानैः ॥ ८ ॥ देवःश्वेतातपत्रत्रयचमरिरुहाशोकभाश्चक्रभाषापुष्पौघासारसिंहासनसुरपटहैरष्टभिः प्रातिहार्यैः । साश्चर्यैर्भ्राजमानः सुरमनुजसभाम्भोजिनीभानुमाली पायान्नः पादपीठीकृतसकलजगत्पालमौलिर्जिनेन्द्रः ॥९॥ नृत्यत्स्वर्दन्तिदन्ताम्बुरुहवननटन्नाकनारीनिकायः सद्यस्त्रैलोक्ययात्रोत्सवकरनिनदातोद्यमाद्यन्निलिम्पः हस्ताम्भोजातलीलाविनिहितसुमनोदामरम्यामरस्त्रीकाम्यः कल्याणपूजाविधिषु विजयते देव देवागमस्ते ॥१०॥ चक्षुष्मानहमेव देव भुवने नेत्रामृतस्यन्दिनं त्वद्वक्त्रेन्दुमतिप्रसादसुभगैस्तेजोभिरुद्भासितम् । तेनालोकयता मयाऽनतिचिराच्चक्षुः कृतार्थीकृतं द्रष्टव्यावधिवीक्षणव्यतिकरव्याजृम्भमाणोत्सवम् ॥११॥ कन्तोः सकान्तमपि मल्लमवैति कश्चिन्मुग्धो मुकुन्दमरविन्दजमिन्दुमौलिम् । मोघीकृतत्रिदशयोषिदपाङ्गपातस्तस्य त्वमेव विजयी जिनराजमल्लः ॥१२॥ किसलयितमनल्पं त्वद्विलोकाभिलाषात्कुसुमितमतिसान्द्रं त्वत्समीपप्रयाणात् । मम फलितममन्दं त्वन्मुखेन्दोरिदानीं नयनपथमवाप्ताद्देव पुण्यद्रुमेण ॥१३॥ त्रिभुवनवनपुष्प्यत्पुष्पकोदण्डदर्पप्रसरदवनवाम्भोमुक्तिसक्तिप्रवृत्तिः । स जयति जिनराजव्रातजीमूतसङ्घः शतमखशिखिनृत्यारम्भनिर्बन्धबन्धुः ॥ १४ ॥

भूपालः स्वर्गपालप्रमुखनरसुरश्रेणिनेत्रालिमाला लीलाचैत्यस्य चैत्यालयमखिलजगत्कौमुदीन्दोर्जिनस्य । उत्तंसीभूतसेवाञ्जलिपुटनलिनीकुड्मलास्त्रिः परीत्य श्रीपादच्छाययापस्थितभवदवथुः संश्रितोऽस्मीव मुक्तिम् ॥१५॥ देव त्वदङ्घ्रिनखमण्डलदर्पणोऽस्मिन्नर्घ्ये निसर्गरुचिरे चिरदृष्टवक्त्रः । श्रीकीर्तिकान्तिधृतिसङ्गमकारणानि भव्यो न कानि लभते शुभमङ्गलानि ॥ १६ ॥ जयति सुरनरेन्द्रश्रीसुधानिर्झरिण्याः कुलधरणिधरोऽयं जैनचैत्याभिरामः । प्रविपुलफलधर्मानोकहाग्रप्रवालप्रसरशिखरशुम्भत्केतनः श्रीनिकेतः ॥१७॥ विनमदमरकान्ताकुन्तलाक्रान्तकान्तिस्फुरितनखमयूखद्योतिताशान्तरालः । दिविजमनुजराजव्रातपूज्यक्रमाब्जो जयति विजितकर्मारातिजालो जिनेन्द्रः ॥१८॥ सुप्तोत्थितेन सुमुखेन सुमङ्गलाय द्रष्टव्यमस्ति यदि मङ्गलमेव वस्तु । अन्येन किं तदिह नाथ तवैव वक्त्रं त्रैलोक्यमङ्गलनिकेतनमीक्षणीयम् ॥ १९ ॥ त्वं धर्मोदयतापसाश्रमशुकस्त्वं काव्यबन्धक्रमक्रीडानन्दनकोकिलस्त्वमुचितः श्रीमल्लिकाषट्पदः । त्वं पुन्नागकथारविन्दसरसीहंसस्त्वमुत्तंसकैः कैर्भूपाल न धार्यसे गुणमणिस्रङ्मालिभिर्मौलिभिः ॥२०॥ शिवसुखमजरश्रीसङ्गमं चाभिलष्य स्वमभिनियमयन्ति क्लेशपाशेन केचित् ॥ वयमिह तु वचस्ते भूपतेर्भावयन्तस्तदुभयमपि शश्वल्लीलया निर्विशामः॥२१॥ देवेन्द्रास्तव मज्जनानि विदधुर्देवांगना मंगलान्यापेठुः शरदिन्दुनिर्मलयशो गन्धर्वदेवा जगुः । शेषाश्चापि यथानियोगमखिलाः सेवां सुराश्चक्रिरे तत्किं देव वयं विदध्म इति नश्चित्तं तु दोलायते

॥२२॥ देव त्वज्जननाभिषेकसमये रोमाञ्चसत्कञ्चुकैर्देवेन्द्रैर्यदनर्ति नर्तनविधौ लब्धप्रभावैः स्फुटम् । किंचान्यत्सुरसुन्दरीकुचतटप्रान्तावनद्धोत्तमप्रेङ्खद्वल्लकिनादझंकृतमहो तत्केन संवर्ण्यते ॥२३॥ देव त्वत्प्रतिबिम्बमम्बुजदलस्मेरेक्षणं पश्यतां यत्रास्माकमहो महोत्सवरसो दृष्टेरियान्वर्तते । साक्षात्तत्रभवन्तमीक्षितवतां कल्याणकाले तदा देवानामनिमेषलोचनतया वृत्तः स किं वर्ण्यते ॥ २४ ॥ दृष्टं धाम रसायनस्य महतां दृष्टं निधीनां पदं दृष्टं सिद्धरसस्य सद्म सदनं दृष्टं च चिन्तामणेः । किं दृष्टैरथवानुषङ्गिकफलैरेभिर्मयाद्य ध्रुवं दृष्टं मुक्तिविवाहमङ्गलगृहं दृष्टे जिनश्रीगृहे ॥२५॥ दृष्टस्त्वं जिनराजचन्द्र विकसद्भूपेन्द्रनेत्रोत्पलैः स्नातं त्वन्नुतिचन्द्रिकाम्भसि भवद्विद्वच्चकोरोत्सवे । नीतश्चाद्य निदाघजः क्लमभरः शान्तिं मया गम्यते देव त्वद्गतचेतसैव भवतो भूयात्पुनर्दर्शनम् ॥२६॥

॥ इति श्रीभूपालकविप्रणीता जिनचतुर्विंशतिका ॥

—•—

निर्वाणकाण्ड (गाथा)

अट्ठावयम्मि उसहो, चम्पाए वासुपुज्जजिणणाहो ।
उज्जंते णेमिजिणो, पावाए णिव्वुदो महावीरो ॥१॥
वीसं तु जिणवरिंदा अमरासुर-वंदिदा धुदकिलेसा ।
सम्मेदे गिरिसिहरे, णिव्वाणगया णमो तेसिं ॥ २॥
वरदत्तो य वरंगो, सायरदत्तो य तारवरणयरे ।

आहुट्ठयकोडीयो, णिव्वाण गया णमो तेसिं ॥ ३ ॥
णेमिस्सामि पज्जुण्णो, संबुकुमारो तहेव अणिरुद्धो।
बाहत्तरिकोडीओ, उज्जंते सत्तसया सिद्धा ॥ ४ ॥
रामसुआ वण्णि जणा, लाडणरिंदाण पञ्चकोडीओ।
पावागिरिवरसिहरे, णिव्वाण गया णमो तेसिं ॥५॥
पंडुसुआ तिण्णिजणा, दविडणरिंदाण अट्ठकोडीओ।
सत्तुञ्जय गिरिसिहरे णिव्वाण गया णमो तेसिं ॥६॥
संते जे बलभद्दा, जदुवणरिंदाण अट्ठकोडीओ।
गजपंथं गिरिसिहरे, णिव्वाण गया णमो तेसिं ॥७॥
रामहणूसुग्गीओ, गवयगवक्खो य णीलपहणीलो।
णवणवदीकोडीओ, तुङ्गीगिरिणिव्वुदे वंदे ॥ ८ ॥
णंगाणंगकुमारा, कोडीपञ्चद्धमुणिवरा सहिया।
सवणागिरिवरसिहरे, णिव्वाण गया णमो तेसिं ॥९॥
दहमुहरायस्स सुआ, कोडोपञ्चद्धमुणिवरा सहिया।
रेवाउहयतडग्गे णिव्वाणगया णमो तेसिं ॥१०॥
रेवाणइये तीरे पच्छिमभायम्मि सिद्धवरकूटे।
दो चक्की दहकप्पे, आहुट्ठयकोडिणिव्वुदे वंदे ॥११॥
वडवाणीवरणयरे, दक्खिणभायम्मि चूलगिरिसिहरे।
इन्दजीदकुंभयणे, णिव्वाण गया णमो तेसिं ॥ १२॥
पावागिरिवरणयरे, सुवण्णभद्दाइमुणिवरा चउरो।
चलणाणईतडग्गे, णिव्वाण गया णमो तेसिं ॥१३॥
फलहोडीवरगामे, पच्छिमभायम्मि दोणगिरिसिहरे।

गुरुदत्ताइ मुणिंदा, णिव्वाण गया णमो तेसिं ॥१४॥
णायकुमारमुणिंदा, वालि महावालि चेव अज्झेया ।
अट्ठावयगिरिसिहरे, णिव्वाण गया णमो तेसिं ॥१५॥
अच्चलपुरवरणयरे, ईसाणे भायमेढगिरिसिहरे ।
आहुट्ठयकोडीओ, णिव्वाण गया णमो तेसिं ॥ १६॥
वंसत्थलम्मिणयरे, पच्छिममायम्मिकुन्थगिरिसिहरे ।
कुलदेसभूषणमुणी, णिव्वाण गया णमो तेसिं ॥१७॥
जसहररायस्स सुआ, पंचसयाइं कलिंगदेसम्मि ।
कोडिसिला कोडिमुणी, णिव्वाण गया णमो तेसिं ॥१८॥
पासस्स समवसरणे, गुरुवरदत्त पचरिसिपमुहा ।
रेसिंदीगिरिसिहरे, णिव्वाण गया णमो तेसिं ॥ १९ ॥
जे जिणु जित्थु तत्था, जे दु गया णिव्वुदिं परमं ।
ते वंदामि य णिच्चं, तियरणसुद्धो णमंसामि ॥ २० ॥
सेसाणं तु रिसीणं, णिव्वाणं जम्मि जम्मि ठाणम्मि ।
ते हं वंदे सव्वे, दुक्खक्खयकारणट्ठाए ॥ २१ ॥
पासं तह अहिणंदण, णायद्दहि मङ्गलाउरे वंदे ।
अस्सारम्मे पट्टणि, मुणिसुव्वओ तहेव वंदामि ॥ १ ॥
बाहुबलि तह-वंदमि, पोदनपुर हत्थिनापुरे वंदे ।
संतीकुन्थुव अरिहो, वाराणसिए सुपास पासं च ॥ २ ॥
माहुरए अहिछित्ते, वीरं पासं तहेव वंदामि ।
जंबुमुणिंदो वंदे, णिव्वुइपत्तोवि जंबुवणगहणे ॥ ३ ॥
पञ्चकल्लाणठाणइं, जाणि वि संजादमच्चलोयम्मि ।
मणवयणकायसुद्धो, सव्वे सिरसा णमंसामि ॥ ४ ॥

अग्गलदेवं वंदमि, वरणयरे णिवडकुण्डली वंदे ।
पासं सिरिपुरि वंदमि, होला गिरिसंखदेवम्मि ॥ ५ ॥
गोम्मटदेवं वंदमि पंचसयं धणुहउच्चं तं ।
देवा कुणंति वुट्ठी, केसरकुसुमाण तस्स उवरिम्मि ॥ ६
णिव्वाणठाण जाणिवि, अइसयठाणाणि अइसये सहिया ।
संजादमिच्च लोए, सव्वे सिरसा णमंसामि ॥ ७ ॥
जो जण पठइ तियालं, णिव्वुइकंडंपि भावसुद्धीए ।
भुंजदि णरसुरसुक्खं, पच्छा सोलहइ णिव्वाणं ॥ ८ ॥

२२ वीतरागस्तोत्रम् ।

शान्तं शिवं शिवपदस्य परं निदानं, सर्वज्ञमीशममलं जित-मोहमानम् । संसारनीरनिधिमन्थनमंदरागं, पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥१॥ अव्यक्तमुक्तिपदपङ्कजराजहंसं, विश्वावतं-समभरैर्विहितप्रशंसम् । कंदर्पभूमिरुहभंजनमत्तनागं, पश्यन्ति० ॥ २ ॥ संसारनीरनिधितारणयानपात्रं, ज्ञानैकपात्रमतिगात्र-मनोज्ञगात्रम् । दुर्वारमारघनपातनवातरागं, पश्यन्ति० ॥ ३ ॥ दान्तं नितान्तमतिकान्तमनन्तरूपं योगीश्वरं किमपि संविदितस्व-रूपम् । संसारमारवपथाद्भुतनिर्मरागं, पश्यन्ति० ॥४॥ दुष्कर्म-भीतजनताशरणं सुरेन्द्रैः निःशेषदोषरहितं महितं महेन्द्रैः । तीर्थङ्करं भविकदापितमुक्तिभागं, पश्यन्ति० ॥ ५ ॥ कल्याणव-ल्लिनवपल्लवनाम्बुवाहं त्रैलोक्यलोकनयनैकसुधाप्रवाहम् । सिद्ध्यङ्गनावरविलासनिबद्धरागं, पश्यन्ति० ॥६॥ लोकावलोक

नकलातिशयप्रकाशं, ध्यालोककीर्तिवरनिर्जितकम्बुहास्यं । वाणी-तरङ्गनवरङ्गलसत्तडागं, पश्यन्ति० ॥ ७ ॥ कल्याणकीर्तिरचि तालयकल्पवृक्षं, ध्यानानले दलितपद्मसुपात्तदक्षम् । नित्यं क्षमा-भरधुरन्धरशेषनाग, पश्यन्ति० ॥८॥ श्रीजैनसूरिविनतक्रमपद्मसेनं, हेलाविनिर्दलितमोहनरेन्द्रसेनम् । लीलाविलङ्घितमहाम्बुधि-मध्यभागं, पश्यंति पुण्यरहिता न हि वीतरागम् ॥ ९ ॥

---

२३ परमानन्दस्तोत्रम्

परमानन्दसंयुक्तं निर्विकारं निरामयम् । ध्यानहीना न पश्यंति निजदेहे व्यवस्थितम् ।१। अनन्तसुखसम्पन्नं ज्ञानामृतपयो-धरम् । अनन्तवीर्यसम्पन्नं दर्शनं परमात्मनः ॥ २ ॥ निर्विकारं निराबाधं सर्वसंगविवर्जितम् । परमानंदसम्पन्नं शुद्धचैतन्यलक्षणम् ॥ ३ ॥ उत्तमा स्वात्मचिन्ता स्यान्मोहचिन्ता च मध्यमा । अधमा कामचिन्ता स्यात्परचिन्ताधमाधमा ॥४॥ निर्विकारसमुत्पन्नं ज्ञानमेव सुधारसम् । विवेकमंजुलिं कृत्वा तत्पिबन्ति मनीषिणः ॥ ५ ॥ सदानन्दमयं जीवं यो जानाति स पण्डितः । स सेवते निजात्मानं परमानन्दकारणम् ॥ ६ ॥ नलिन्यां च यथा नीरं भिन्नं तिष्ठति सर्वदा । अयमात्मा स्वभावेन देहे तिष्ठति निर्मलः ॥७॥ द्रव्यकर्ममलैर्मुक्तं भावकर्मविवर्जितम् । नोकर्मरहितं विद्धि निश्चयेन चिदात्मनः ॥८॥ आनन्दं ब्रह्मणो रूपं निजदेहे व्यवस्थितम् । ध्यानहीना न पश्यन्ति निजदेहे व्यवस्थि-

तम् ॥९॥ तद्ध्यानं क्रियते भव्यैर्मनो येन विलीयते । तत्क्षणं दृश्यते शुद्धं चिच्चमत्कारलक्षणम् ॥१०॥ ये ध्यानशीला मुनयः प्रधानास्ते दुःखहीना नियमाद्भवन्ति । संप्राप्य शीघ्रं परमात्मतत्त्वं व्रजन्ति मोक्षं क्षणमेकमेव ॥ ११ ॥ आनन्दरूपं परमात्मतत्त्वं, समस्तसंकल्पविकल्पमुक्तम् । स्वभावलीना निवसन्ति नित्यं जानाति योगी स्वयमेव तत्त्वम् ॥ १२ ॥ चिदानंदमयं शुद्धं निराकारं निरामयम् । अनन्तसुखसम्पन्नं सर्वसङ्गविवर्जितम् ॥ १३ ॥ लोकमात्रप्रमाणोऽयं निश्चयेन हि संशयः । व्यवहारे तनूमात्रः कथितः परमेश्वरः ॥ १४ ॥ यत्क्षणं दृश्यते शुद्धं, तत्क्षणं गतविभ्रमः । स्वस्थचित्तः स्थिरीभूत्वा निर्विकल्प समाधिना ॥ १५ ॥ स एव परमं ब्रह्म स एव जिनपुङ्गवः । स एव परमं तत्त्वं स एव परमो गुरुः ॥ १६ ॥ स एव परमं ज्योतिः स एव परमं तपः । स एव परमं ध्यानं स एव परमो गुरुः ॥१७॥ स एव सर्वकल्याणं स एव सुखभाजनम् । स एव शुचिनिर्वाणं स एव परमः शिवः ॥ १८ ॥ स एव सुखदायकः । स एव परचैतन्यं स एव गुणसागरः ॥ १९ ॥ परमाह्लादसंपन्नं रागद्वेषविवर्जितम् । अर्हन्तं देहमध्ये तु यो जानाति स पण्डितः ॥२०॥ आकाररहितं शुद्धं स्वस्वरूपव्यवस्थितम् । सिद्धमष्टगुणोपेतं निर्विकारं निरञ्जनम् ॥ २१ ॥ तत्सदृशं निजात्मानं प्रकाशाय महीयसे । सहजानन्दचैतन्यं यो जानाति स पण्डितः ॥२२॥ पाषाणेषु यथा हेम दुग्धमध्ये यथा घृतम् । तिलमध्ये यथा तैलम्

देहमध्ये तथा शिवः ॥२३॥ काष्ठमध्ये यथा वह्निः शक्तिरूपेण तिष्ठति । अयमात्मा शरीरेषु यो जानाति स पण्डितः ॥२४॥

श्रीमद्भट्टाकलंकदेवविरचितम्

२४ स्वरूपसम्बोधनम्

मुक्तामुक्तैकरूपो यः कर्मभिः संविदादिना । अक्षयं परमात्मानं ज्ञानमूर्तिं नमामि तम् ॥ १ ॥ सोऽस्त्यात्मा सोपयोगोऽयं क्रमाद्धेतुफलावहः यो ग्राह्योऽग्राह्यनाद्यन्तः स्थित्युत्पत्तिव्ययात्मकः ॥ २ ॥ प्रमेयत्वादिभिर्धर्मैरचिदात्मा चिदात्मकः । ज्ञानदर्शनतस्तस्माच्चेतनाचेतनात्मकः ॥ ३ ॥ ज्ञानाद्भिन्नो न चाभिन्नो भिन्नाभिन्न कथंचन । ज्ञानं पूर्वापरीभूतं सोऽयमात्मेति कीर्तितः ॥४॥ स्वदेहप्रमितश्चायं देहमात्रोऽपि नैव सः । ततः सर्वगतश्चायं विश्वव्यापी न सर्वथा ॥ ५ ॥ नानाज्ञानस्वभावत्वादेकोऽनेकोऽपि नैव सः । चेतनैकस्वभावत्वादेकानेकात्मको भवेत् ॥ ६ ॥ नावक्तव्यः स्वरूपाद्यैर्निर्वाच्यः परभावतः । तस्मान्नैकान्ततो वाच्यो नैववाचामगोचरः ॥७॥ स स्याद्विधिनिषेधात्मा स्वधर्मपरधर्मयोः। समूर्तिर्बोधधर्मत्वादमूर्तिश्च विपर्ययात् ॥८॥ इत्याद्यनेकधर्मत्वं बन्धमोक्षौ तयोः फलम् । आत्मा स्वीकुरुते तत्तत्कारणैः स्वयमेव तु ॥ ९ ॥ कर्ता यः कर्मणां भोक्ता तत्फलानां स एव तु । बहिरन्तरुपायाभ्यां तेषां मुक्तत्वमेव हि ॥१०॥ सदृष्टिज्ञानचारित्र-मुपायः स्वात्मलब्धये । तत्त्वे याथात्म्य संस्थित्यमात्मनो दर्शनं

मतम् ॥ ११ ॥ यथावद्वस्तुनिर्णीतिः सम्यग्ज्ञानं प्रदीपवत् । तत्स्वार्थव्यवसायात्म कथंचित्प्रमितेः पृथक् ॥१२॥ दर्शनज्ञान-चारित्रेषूत्तरोत्तरमाविशु । स्थिरमालम्बनं यद्वा माध्यस्थ्यं सुख-दुःखयोः ॥ १३ ॥ ज्ञाता द्रष्टाहमेकोऽहं सुखे दुःखे न चापरः । इतीदं भावनादाढ्यं चारित्रमथवाऽपरम् ॥१४॥ तदेतन्मूलहेतोः स्यात्कारणं सहकारकम् । तद्वाह्यं देशकालादि तपश्च बहिरङ्ग-कम् ॥ १५ ॥ इतीदं सर्वमालोच्य सौस्थ्ये दौस्थ्ये च शक्तितः । आत्मानं भावयेन्नित्यं रागद्वेषविवर्जितम् ॥ १६ । कषायै-रञ्जितं चेतस्तत्त्वं नैवावगाहते । नीलीरक्तेऽम्बरे रागो दुराधेयो हि कौङ्कुमः ॥१७॥ ततस्त्वं दोषनिर्मुक्त्यै निर्मोहो भव सर्वतः। उदासीनत्वमालम्ब्य तत्त्वचिन्तापरो भव ॥ १८ ॥ हेयोपादेयत-त्त्वस्य स्थिति विज्ञायहेयतः । निरालम्बो भवान्यस्मादुपेये साव-लम्बनः ॥ १९ ॥ स्वं परं चेति वस्तुत्वं वस्तुरूपेण भावय । उपेक्षाभावनोत्कर्षपर्यन्ते शिवमाप्नुहि ॥२०॥ मोक्षेऽपि यस्य नाकांक्षा स मोक्षमधिगच्छति । इत्युक्तत्वाद्धितान्वेषी कांक्षा न क्वापि योजयेत् ॥ २१ ॥ सापि च स्वात्मनिष्ठत्वात्सुलभा यदि चिन्त्यते । आत्माधीने सुखे तात यत्नं किं न करिष्यसि ॥ २२ ॥ स्वं परं विद्धि तत्रापि व्यामोहं छिन्धि किन्त्विमम् अनाकुलस्वसंवेद्ये स्वरूपे तिष्ठ केवले ॥२३॥ स्वः स्वंस्वेन स्थितं स्वस्मै स्वस्मात्स्वस्याविनश्वरे । स्वस्मिन् ध्यात्वा लभेत्स्वोत्थमानंदममृतं परम् ॥२४॥ इति स्वतत्त्वं परिभाव्य वाङ्मयं य एतदाख्याति शृणोति चादरात् । करोति तस्मै पर-

मार्थसम्पदं स्वरूपसंबोधनपञ्चविंशतिः॥ २५ ॥

—०—

श्री अमितगतिसूरिविरचिता
२५ द्वात्रिंशतिका।

सत्त्वेषु मैत्रीं गुणिषु प्रमोदं क्लिष्टेषु जीवेषु कृपापरत्वम्। माध्यस्थ्यभावं विपरीतवृत्तौ सदा ममात्मा विदधातु देव ॥१॥ शरीरतः कर्तुमनन्तशक्तिं विभिन्नमात्मानमपास्तदोषम्। जिनेन्द्र! कोषादिव खड्गयष्टिं तव प्रसादेन ममास्तु शक्तिः ॥ २ ॥ दुःखे सुखे वैरिणि बन्धुवर्गे योगे वियोगे भुवने वने वा। निराकृताशेषममत्वबुद्धेः समं मनो मेऽस्तु सदापि नाथ ॥ ३ ॥ मुनीश! लीनाविव कीलिताविव स्थिरौ निशाताविव बिंबिताविव। पादौ त्वदीयौ मम तिष्ठतां सदा तमोधुनानौ हृदि दीपकाविव ॥ ४ ॥ एकेन्द्रियाद्या यदि देव देहिनः प्रमादतः संचरता इतस्ततः। क्षता विभिन्ना मिलिता निपीडिता, तदस्तु मिथ्या दुरनुष्ठितं तदा ॥५॥ विमुक्तिमार्गप्रतिकूलवर्तिना मया कषायाक्षवशेन दुर्धिया, चारित्रशुद्धेर्यदकारि लोपनं तदस्तु मिथ्या मम दुष्कृतंप्रभो ॥६॥ विनिन्दनालोचनगर्हणैरहं मनोवचःकायकषायनिर्मितम्। निहन्मि पापं भवदुःखकारणं भिषग्विषं मन्त्रगुणैरिवाखिलम् ॥ ७ ॥ अतिक्रमं यद्विमतेर्व्यतिक्रमं जिनातिचारं सुचरित्रकर्मणः। व्यधामना-

चारमपि प्रमादतः प्रतिक्रमं तस्य करोमि शुद्धये ॥ ८ ॥
क्षतिं मनःशुद्धिविधेरतिक्रमं व्यतिक्रमं शीलवृते-
र्विलङ्घनम्। प्रभोऽतिचारं विषयेषु वर्तनं वदन्त्यनाचारमिहातिसक्तताम्॥९॥यदर्थमात्रापदवाक्यहीनं मया प्रमादाद्यदि किञ्चनोक्तम्। तन्मे क्षमित्वा विदधातु देवी सरस्वती केवलबोधलब्धिम्
॥१०॥बोधिः समाधिःपरिणामशुद्धिःस्वात्मोपलब्धिः शिवसौख्यसिद्धिः। चिन्तामणिं चिन्तितवस्तुदाने त्वां वंद्यमानस्य ममास्तु
देवि॥११॥यः स्मर्यते सर्वमुनीन्द्रवृन्दैर्यः स्तूयते सर्वनरामरेन्द्रैः।
यो गीयते वेदपुराणशास्त्रैः स देवदेवो हृदये ममास्ताम् ॥१२॥
यो दर्शनज्ञानसुखस्वभावः समस्तसंसारविकारबाह्यः। समाधिगम्यः परमात्मसंज्ञः स देवदेवो हृदये ममास्ताम् ॥ १३ ॥
निषूदते यो भवदुःखजालं निरीक्षते यो जगदन्तरालं योऽन्तर्गतो
योगिनिरीक्षणीयः स देवदेवो हृदये ममास्ताम् ॥१४॥ विमुक्तिमार्गप्रतिपादको यो यो जन्ममृत्युव्यसनाद्यतीतः। त्रिलोकलोकी
विकलोऽकलङ्कः स देवदेवो हृदये ममास्ताम् ॥१५॥ क्रोडीकृताशेषशरीरिवर्गा रागादयो यस्य न सन्ति दोषाः। निरिन्द्रियो
ज्ञानमयोऽनपायः स देवदेवो हृदये ममास्ताम् ॥१६॥ यो
व्यापको विश्वजनीनवृत्तेः सिद्धो विबुद्धो धुतकर्मबन्धः। ध्यातो
धुनीते सकलं विकारं स देवदेवो हृदये ममास्ताम् ॥ १७ ॥ न
स्पृश्यते कर्मकलङ्कदोषैर्यो ध्वान्तसंघैरिव तिग्मरश्मिः निरञ्जनं
नित्यमनेकमेकं तं देवमाप्तं शरणं प्रपद्ये ॥ १८ ॥ विभासते यत्र
मरीचिमाली न विद्यमाने भुवनावभासि। स्वात्मस्थितं बोधमय-

प्रकाशं तं देवमाप्तं शरणं प्रपद्ये ॥ १६ ॥ विलोक्यमाने सति
यत्र विश्वं विलोक्यते स्पष्टमिदं विविक्तम् । शुद्धं शिवं शान्तमना-
द्यनन्तं तं देवमाप्तं शरणं प्रपद्ये ॥२०॥ येन क्षता मन्मथमान-
मूर्च्छा विषादनिद्राभयशोकचिन्ता । क्षतोऽनलेनेव तरुप्रपञ्चस्तं
देवमाप्तं शरणं प्रपद्ये ॥२१॥ न संस्तरोऽश्मा न तृणं न मेदिनी
विधानतो नो फलको विनिर्मितः । यतो निरस्ताक्षकषायविद्विषः
सुधीभिरात्मैव सुनिर्मलो मतः ॥ २२ ॥ न संस्तरो भद्रसमाधि-
साधनं न लोकपूजा न च संघमेलनम् । यतस्ततोऽध्यात्मरतो
भवानिशं विमुच्य सर्वामपि बाह्यवासनाम् ॥२३॥ न सन्ति
बाह्या मम केचनार्था भवामि तेषां न कदाचनाहम् । इत्थं विनि-
श्चित्य विमुच्य बाह्यं स्वस्थः सदा त्वं भव भद्र मुक्त्यै ॥२४॥
आत्मानमात्मन्यवलोकमानस्त्वं दर्शनज्ञानमयो विशुद्धः । एकाग्र-
चित्तः खलु यत्र तत्र स्थितोपि साधुर्लभते समाधिम् ॥ २५ ॥
एकः सदा शाश्वतिको ममात्मा विनिर्मलः साधिगमस्वभावः ।
बहिर्भवाः सन्त्यपरे समस्ता न शाश्वताः कर्मभवाः स्वकीयाः
॥२६॥ यस्यास्ति नैक्यं वपुषापि सार्द्धं तस्यास्ति किं पुत्रकलत्र-
मित्रैः । पृथक्कृते चर्मणि रोमकूपाः कुतो हि तिष्ठन्ति शरीरमध्ये
॥ २७ ॥ संयोगतो दुःखमनेकभेदं यतोऽश्नुते जन्मवने शरीरी
ततस्त्रिधासौ परिवर्जनीयो यियासुना निर्वृतिमात्मनीनाम् ॥२८॥
सर्वं निराकृत्य विकल्पजालं संसारकान्तारनिपातहेतुम् । विविक्त-
मात्मानमवेक्षमाणो निलीयसे त्वं परमात्मतत्त्वे ॥ २९ ॥ स्वयं
कृतं कर्म यदात्मना पुरा फलं तदीयं लभते शुभाशुभम् । परेण

दत्तं यदि लभ्यते स्फुटं स्वयं कृतं कर्म निरर्थकं तदा ॥ ३० ॥ निजार्जितं कर्म विहाय देहिनो न कोपि कस्यापि ददाति किंचन । विचारयन्नेव मनन्यमानसः परो ददातीति विमुंच शेमुषीम् ॥३१ यैः परमात्माऽमितगतिवन्द्यः सर्वविविक्तो भृशमनवद्यः । शश्वदधीतो मनसि लभन्ते मुक्तिनिकेतं विभववरं ते ॥ ३२ ॥ इति द्वात्रिंशतिवृत्तैः परमात्मानमीक्षते । योऽनन्यगतचेतस्को यात्यसौ पदमव्ययम् ॥३३॥

—•—

२६ अकलङ्कस्तोत्रम्

(शार्दूलविक्रीडितछंदः)

त्रैलोक्यं सकलं त्रिकालविषयं सालोकमालोकितं । साक्षाद्येन यथा स्वयं करतले रेखात्रयं सांगुलि ॥ रागद्वेषभयामयान्तकजरालोलत्वलोभादयो । नालं यत्पदलंघनाय स महादेवो मया वंद्यते ॥ १ ॥ दग्धं येन पुरत्रयं शरभुवा तीव्रार्चिषा वह्निना । यो वा नृत्यति मत्तवत्पितृवने यस्यात्मजो वा गुहः । सोऽयं किं मम शङ्करो भयतृषारोषार्तिमोहक्षयं । कृत्वा यः स तु सर्ववित्तनुभृतां क्षेमंकरः शङ्करः ॥२॥ यत्नाद्येन विदारितं कररुहैर्दैत्येन्द्रवक्षःस्थलं सारथ्येन धनंजयस्य समरे योऽमारयत्कौरवान् ॥ नासौ विष्णुरनेककालविषयं यज्ज्ञानमव्याहतं । विश्वं व्याप्य विजृम्भते स तु महाविष्णुः सदेष्टो मम ॥ ३ ॥ उर्वश्यामुदपादि रागबहुलं चेतो यदीयं पुनः । पात्रीदण्डकमंडलुप्रभृतयो यदरा-

कृतार्थस्थितिम् ॥ आविर्भावयितुं भवंति स कथं ब्रह्मा भवेन्मादृशां। क्षुत्तृष्णाश्रमरागरोगरहितो ब्रह्मा कृतार्थोऽस्तु नः ॥४॥ यो जग्ध्वा पिशितं समत्स्यकवलं जीवं च शून्यं वदन्। कर्ता कर्मफलं न भुक्त इति यो वक्ता स बुद्धः कथम् ॥ यज्ज्ञानं क्षणवर्ति वस्तु सकलं ज्ञातुं न शक्तं सदा यो जानन्युगपज्जगत्त्रयमिदं साक्षात्स बुद्धो मम ॥ ५ ॥

ईशः किं छिन्नलिंगो यदि विगतभयः शूलपाणिः कथं स्यात्। नाथः किं भैक्ष्यचारी यतिरिति स कथं सांगनः सात्मजश्च ॥ आर्द्राजः किन्त्वजन्मा सकलविदिति किं वेत्ति नात्मान्तरायं। संक्षेपात्सम्यगुक्तं पशुपतिमपशुः कोऽत्र धीमानुपास्ते ॥ ६ ॥ ब्रह्मा चर्माक्षसूत्री सुरयुवतिरसावेशविभ्रान्तचेताः। शम्भुः खट्वाङ्गधारी गिरिपतितनयापाङ्गलीलानुविद्धः ॥ विष्णुश्चक्राधिपः सन्दुहितरमगमद्गोपनाथस्य मोहात्। दर्हन्विध्वस्तरागो जितसकलभयः कोऽयमेष्वाप्तनाथः ॥७॥ एको नृत्यति विप्रसार्य ककुभां चक्रे सहस्रं भुजा-। नेकः शेषभुजंगभोगशयने व्यादाय निद्रायते ॥ द्रष्टुं चारुतिलोत्तमामुखमगादेकश्चतुर्वक्त्रता। मेते मुक्तिपथं वदंति विदुषामित्येतदत्यद्भुतम् ॥ ८ ॥ यो विश्वं वेदवेद्यं जननजलनिधेर्भङ्गिनः पारदृश्वा। पौर्वापर्याविरुद्धं वचनमनुपमं निष्कलंकं यदीयम्॥ तं वंदे साधुवन्द्यं सकलगुणनिधिं ध्वस्तदोषद्विषं तं बुद्धं वा वर्द्धमानं शतदलनिलयं केशवं वा शिवं वा ॥ ९ ॥ माया नास्ति जटा कपाल मुकुटं चन्द्रो न मूर्धावली। खट्वाङ्गं न च वासुकिर्न च धनुः शूलं न चोग्रं मुखं ॥ कामो यस्य न कामिनी

न च हृषो गीतं न नृत्यं पुनः सोऽस्मान्पातु निरञ्जनो जिनपतिः सर्वत्र सूक्ष्मः शिवः ॥ १० ॥ नो ब्रह्मांकितभूतलं न च हरेः शम्भोर्न मुद्रांकितं । नो चन्द्रार्ककरांकितं सुरपतेर्वज्रांकितं नैव च ॥ षड्वक्त्रांकितबौद्धदेवहुतभुग्यक्षोरगैर्नाङ्कितं । नग्नं पश्यत वादिनो जगदिदं जैनेन्द्रमुद्रांकितम् ॥ ११ ॥ मौंजीदंडकमंडलुप्रभृतयो नो लाञ्छनं ब्रह्मणो । रुद्रस्यापि जटाकपालमुकुटं कौपीनखट्वांगनाः ॥ विष्णोश्चक्रगदादिशङ्खमतुलं बुद्धस्य रक्ताम्बरं । नग्नं पश्यत वादिनो जगदिदं जैनेन्द्रमुद्रांकितम् ॥१२॥ नाहंकारवशीकृतेन मनसा न द्वेषिणा केवलं । नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्यबुद्ध्या मया ॥ राज्ञः श्रीहिमशीतलस्य सदसि प्रायो विदग्धात्मनो । बौद्धौघान्सकलान् विजित्य स घटः पादेन विस्फालितः ॥१३॥ खट्वांगं नैव हस्ते न च हृदि रचिता लम्बते मुंडमाला। भस्मांगं नैव शूलं न च गिरिदुहिता नैव हस्ते कपालं । चन्द्रार्धं नैव मूर्धन्यपि वृषगमनं नैव कंठे फणीन्द्रः। तं वन्दे त्यक्तदोषं भवभयमथनं चेश्वरं देवदेवं ॥ १४ ॥ किं वाद्यो भगवानमेयमहिमा देवोऽकलंकः कलौ । काले यो जनतासुधर्मनिहितो देवोऽकलंको जिनः ॥ यस्य स्फारविवेकमुद्रलहरीजाले प्रमेयाकुला । निर्मग्ना तनुतेतरां भगवती तारा शिरःकम्पनम् ॥ १५ ॥ सा तारा खलु देवता भगवतीमन्यापि मन्यामहे । षण्मासावधिजाड्यसांख्यभगवद्भट्टाकलंकप्रभोः । वाक्कल्लोलपरम्पराभिरमते नूनं मनोमज्जनम्। व्यापारं सहतेस्म विस्मितमतिः सन्ताडितेतस्ततः ॥ १६ ॥

२७-मृत्युमहोत्सव

उपसर्गे दुर्भिक्षे जरसि रुजायां च निःप्रतीकारे । धर्माय तनुविमोचनमाहुः सल्लेखनामार्याः ॥१॥ अन्तःक्रियाधिकरणं तपःफलं सकलदर्शिनः स्तुवते । तस्माद्यावद्विभवं समाधिमरणे प्रयतितव्यं ॥२॥ स्नेहं वैरं संगं परिग्रहं चापहाय शुद्धमनाः । स्वजनं परिजनमपि च क्षान्त्वा क्षमयेत्प्रियैर्वचनैः ॥३॥ आलोच्य सर्वमेनः कृतकारितमनुमतं च निर्व्याजम् । आरोपयेन्महाव्रतमामरणस्थायि निःशेषम् ॥ ४ ॥ शोक भयमवसादं क्लेशं कालुष्यमरतिमपि हित्वा, सत्त्वोत्साहमुदीर्य च मनः प्रसाद्यं श्रुतैरमृतैः ॥५॥ आहारं परिहाप्य च क्रमशः स्निग्धं विवर्द्धयेत् पानम् । स्निग्धं च हापयित्वा खरपानं पूरयेत्क्रमशः ॥ ६ ॥ खरपानहापनामपि कृत्वा कृत्वोपवासमपि शक्त्या । पंचनमस्कारमनास्तनुं त्यजेत् सर्वयत्नेन ॥ ७ ॥

मृत्युमार्गे प्रवृत्तस्य वीतरागो ददातु मे समाधिबोधपाथेयं यावन्मुक्तिपुरी पुरः ॥८॥ कृमिजालशताकीर्णे जर्जरे देहपञ्जरे, भज्यमाने न भेतव्यं यतस्त्वं ज्ञानविग्रहः ॥ ९ ॥ ज्ञानिन् भयं भवेत्कस्मात्प्राप्ते मृत्युमहोत्सवे । स्वरूपस्थः पुरं याति देही देहान्तरस्थितिम् ॥१०॥ सुदत्तं प्राप्यते यस्माद् दृश्यते पूर्वसत्तमैः । भुज्यते स्वर्भवं सौख्यं मृत्युभीतिः कुतः सताम् ॥११॥ आगर्भाद् दुःखसंतप्तः प्रक्षिप्तो देहपञ्जरे । नात्मा विमुच्यतेऽन्येन मृत्युभूमिपतिं विना ॥१२॥ सर्वदुःखप्रदं पिण्डं दूरीकृत्यात्मदर्शिभिः । मृत्युमित्रप्रसादेन प्राप्यते सुखसम्पदा ॥ १३ ॥ मृत्युकल्पद्रुमे

प्राप्ते येनात्मार्थो न साधितः · निमग्नो जन्मजम्वाले स पश्चात्किं करिष्यति ॥ १४ ॥ जीर्णं देहादिकं सर्वं नूतनं जायते यतः । स मृत्युः किं न मोदाय सतां सातोत्थितिर्यथा ॥ १५॥ सुखं दुःखं सदा वेत्ति देहस्थश्च स्वयं व्रजेत् । मृत्युभीतिस्तदा कस्य जायते परमार्थतः ॥ १६ ॥ संसारासक्तचित्तानां मृत्युर्भीत्यै भवेन्नृणाम् । मोदायते पुनः सोऽपि ज्ञानवैराग्यवासिनाम् ॥ १७ ॥ पुराधीशो यदा याति सुकृतस्य बुभुत्सया । तदासौ वार्यते केन प्रपञ्चैः पाञ्चभौतिकैः ॥ १८ ॥ मृत्युकाले सतां दुःखं यद्भवेद्व्याधि-सम्भवम् । देहमोहविनाशाय मन्ये शिवसुखाय च ॥ १९ ॥ ज्ञानिनोऽमृतसंगाय मृत्युस्तापकरोऽपि सन् । आमकुम्भस्य लोकेऽस्मिन् भवेत्पाकविधिर्यथा ॥ २० ॥ यत्फलं प्राप्यते सद्भिर्व्रतायासविडम्बनात् । तत्फलं सुखसाध्यं स्यान्मृत्युकाले समाधिना। ।२१।अनार्तः शांतिमान्मर्त्यो न तिर्यग् नापि नारकः । धर्मध्यानी पुरो मर्त्योऽनशनी त्वमरेश्वरः ॥२२॥ तप्तस्य तपसश्चापि पालितस्य व्रतस्य च । पठितस्य श्रुतस्यापि फलं मृत्युः समाधिना ॥२३ अतिपरिचितेष्ववज्ञा नवे भवेत्प्रीतिरिति हि जनवादः । चिरतर-शरीरनाशे नवतरलाभे च किं भीरुः ॥ २४ ॥ स्वर्गादेत्य पवित्र-निर्मलकुले संस्मर्यमाणा जनैः । दत्वा भक्तिविधायिनां बहुविधं वांछानुरूपं धनम् ॥ भुक्त्वा भोगमहर्निशं परकृतं स्थित्वा क्षणं मण्डले पात्रावेशविसर्जनामिव मृतिं सन्तो लभन्ते स्वतः ॥२५॥

—•—

२८ प्रश्नोत्तररत्नमालिका

प्रणिपत्य वर्द्धमानं प्रश्नोत्तररत्नमालिकां वक्ष्ये। नागनरामरवन्द्यं देवं देवाधिपं वीरम् ॥१॥ कः खलु नालंक्रियते दृष्टादृष्टार्थसाधनपटीयान्। कण्ठस्थितया विमलप्रश्नोत्तररत्नमालिकया ॥२॥ भगवन् किमुपादेयं? गुरुवचनं हेयमपि च किमकार्यम्। को गुरुरधिगततत्त्वः सत्त्वहिताभ्युद्यतः सततम् ॥३॥ त्वरितं किं कर्तव्यम् विदुषा संसारसंततिच्छेदः। किं मोक्षतरोर्बीजं सम्यग्ज्ञानं क्रियासहितम् ॥ ४ ॥ कि पथ्यदनं धर्मः कः शुचिरिह यस्य मानसं शुद्धम्। कः पण्डितो विवेकी किं विषमवधीरिता गुरवः ॥५॥ किं संसारे सारं बहुशोऽपि विचिन्त्यमानमिदमेव। मनुजेषु दृष्टतत्त्वं स्वपरहितायोद्यतं जन्म ॥६॥ मदिरेव मोहजनकः कः स्नेहः के च दस्यवो विषयाः। का भववल्ली तृष्णा को वैरी नन्वनुद्योगः ॥७॥ कस्माद्भयमिह मरणादन्धादपि को विशिष्यते रागी। कः शूरो यो ललनालोचनबाणैर्न च व्यथितः ॥८ पातुं कर्णाञ्जलिभिः किममृतमिव बुध्यते सदुपदेशः। किं गुरुताया मूलं यदेतदप्रार्थनं नाम ॥९॥ कि गहनं स्त्रीचरितं कश्चतुरो यो न खण्डितस्तेन, किं दारिद्र्यमसंतोष एव किं लाघवं याच्या ॥१०॥ किं जीवितमनवद्यं किं जाड्यं पाटवेऽप्यनभ्यासः को जागर्ति विवेकी का निद्रा मूढता जन्तोः ॥११॥ नलिनीदलगतजललवतरलं किं यौवनं धनमथायुः। के शशधरकरनिकरानुकारिणः सज्जना एव ॥१२॥ को नरकः परवशता किं सौख्यं सर्व-

मंगविरतिर्या । किं सत्यं भूतहितं किं प्रेयः प्राणिनामसवः ॥१३
किं दानमनाकांक्षं किं मित्रं यन्निवर्तयति पापात् । कोऽलंकारः
शीलं किं वाचां मण्डनं सत्यम् ॥१४॥ किमनर्थफलं मानसम-
संगतं का सुखावहा मैत्री । सर्वव्यसनविनाशे को दक्षः सर्वथा
त्यागः ॥१५॥ कोऽन्धो योऽकार्यरतः को बधिरः यः शृणोति न
हितानि । को मूको यः काले प्रियाणि वक्तुं न जानाति ॥१६॥
किं मरणं मूर्खत्वं किं चानर्घ्यं यदवसरे दत्तम् । आमरणात्किं
शल्यं प्रच्छन्नं यत्कृतमकार्यम् ॥१७॥ कुत्र विधेयो यत्नो विद्या-
भ्यासे सदौषधे दाने । अवधीरणा क्व कार्या खलपरयोषित्परधनेषु
॥१८॥ काहर्निशमनुचिन्त्या संसारासारता न च प्रमदा । का
प्रेयसी विधेया करुणा दाक्षिण्यमपि मैत्री ॥१९॥ कण्ठगतैरप्य-
सुभिः कस्यात्मा नो समर्प्यते जातु । मूर्खस्य विषादस्य च
गर्वस्य तथा कृतघ्नस्य ॥२०॥ कः पूज्यः सद्वृत्तः कमधनमाच-
क्षते चलितवृत्तम् । केन जितं जगदेतत् सत्यतितिक्षावता पुंसा
॥२१॥ कस्मै नमः सुरैरपि सुतरां क्रियते दयाप्रधानाय । कस्मा-
दुद्विजितव्यं संसारारण्यतः सुधिया ॥२२॥ कस्य वशे प्राणि-
गणसत्यप्रियभाषिणो विनीतस्य । क्व स्थातव्यं न्याय्ये पथि
दृष्टादृष्टलाभाय ॥२३॥ विद्युद्विलसितचपलं किं दुर्जनसंगतं
युवतयश्च । कुलशीलनिष्प्रकम्पाः के कलिकालेऽपि सत्पुरुषाः ॥२४
किमशोच्यं कार्पण्यं सति विभवे किं प्रशस्यमौदार्यं । तनुतर-
वित्तस्य तथा प्रभविष्णोर्यत्सहिष्णुत्वम् ॥२५॥ चिन्तामणिरिव
दुर्लभमिह किं ननु कथयामि चतुर्भद्रम् । किं तद्वदन्ति भूयो

विधूततमसो विशेषेण ॥२६॥ दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम्। त्यागसहितं च वित्तं दुर्लभमेतच्चतुर्भद्रम् ॥२७॥ इति कण्ठगता विमला प्रश्नोत्तररत्नमालिका येषां। ते मुक्ताभरणा अपि विभान्ति विद्वत्समाजेषु ॥२८॥ विवेकात्त्यक्त-राज्येन राज्ञेयं रत्नमालिका। रचिताऽमोघवर्षेण सुधियां सद्-लंकृतिः ॥२९॥

अध्यात्मयोगिपूज्यश्रीमनोहरवर्णिप्रणीता सहजानन्द गीता

२६ 'सहजानन्दगीता'

रागाभावः स्वयं स्वाप्तावाप्तस्वो हि स्वभाववत्।
स्वे स्वं परं नमस्कृत्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥१॥
यादृक् सिद्धात्मनो रूपं तादृग्रूपं निजात्मनः।
भ्रान्त्या क्लिष्टस्तु लोकेऽद्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥२॥
विश्वतो भिन्न एकोऽपि कर्ता योगोपयोगयोः।
रागद्वेषविघाताऽऽसम् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३॥
न करोमि न चाकार्षम्, न करिष्यामि किंच।
विकल्पेनैव त्रस्तोऽतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४॥
स्वरागवेदनाविद्धश्चेष्टे स्वस्थैव शान्तये।
नोपकुर्वे च नो शान्तिः स्यां स्वस्मै स्वे सुखी स्वयम् ॥५॥
याति नेतो न चायाति आतुश्चित्किञ्चिदन्यतः।
खिन्नो हीनाधिकंमन्यः स्यां स्वस्मै स्वे सुखी स्वयम् ॥६॥

स्वातन्त्र्यं वस्तुनो रूपं तत्र कः किं करिष्यति ?
हानिर्मे हि विकल्पेषु स्यां स्वस्मै स्वे सुखी स्वयम् ॥७॥
ज्ञाता द्रष्टाहमेकोऽस्मि निर्विकारो निरञ्जनः ।
नित्यः सत्यः समाधिस्थः स्यां स्वस्मै स्वे सुखी स्वयम् ॥८॥
अमरोऽहमजन्माहं निःशरीरो निरामयः ।
निर्ममो नैर्जगत्योऽहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥९॥
नोपद्रवो न मे द्वन्द्वो निर्विकल्पोऽपरिग्रहः ।
दृश्यः कैवल्यदृष्ट्याऽहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥१०॥
निर्वंशश्चेतनावंशो निर्गृहश्चेतनागृहः ।
चेतनान्यन्न मे किञ्चित्स्यां स्वस्मै स्वे सुखी स्वयम् ॥११॥
निर्मित्रश्चेतनामित्रो निर्गुरुश्चेतनागुरुः ।
चेतनान्यन्न मे किंचित् स्यां स्वस्मै स्वे सुखी स्वयम् ॥१२॥
निर्वित्तश्चेतनावित्तो निष्कलश्चेतनाकलः ।
चेतनान्यन्न मे किंचित् स्यां स्वस्मै स्वे सुखी स्वयम् ॥१३॥
निष्कीर्तिश्चेतनाकीर्तिर्निष्कृतिश्चेतनाकृतिः ।
चेतनान्यन्न मे किंचित् स्यां स्वस्मै स्वे सुखी स्वयम् ॥१४॥
जीविताशा प्रतिष्ठाशा विषयाशा जनैषणा ।
आभिभ्र्यो विनष्टोऽहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥१५॥

१—किसी किसी श्लोकमें तीसरे चरणके बाद अतः,च, सम्प्रति आदि शब्दों का यथायोग्य अध्याहार करना चाहिये अथवा तीसरे चरण के बाद अध्यात्मरीतीसे विश्राम लेकर चौथा चरण पढ़ना चाहिये।

भवेऽप्यस्मिन् मुहुर्नाना दुःखं प्राप्तं क्व रक्षकः ?
को भूतः कस्य भूतोहं ? स्यां स्वस्मै स्वे सुखी स्वयम् ॥ १६ ॥
दुस्त्याज्या चेद्रतिस्त्यक्ता मृतत्यक्तकुटुम्बिनाम् ।
स्वातन्त्र्यं स्यानि किं स्वस्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥१७॥
ज्ञात्वा रागफलं दुःखं जीवानां अनवामिह
रागं मुञ्चानि नो मुक्त्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥१८॥
द्रष्टारं स्वयमात्मानं पश्य पश्य न चेतरम् ।
तिष्ठानि निर्विशेषं चेत् स्यां स्वस्मै स्वे सुखी स्वयम् ॥१६॥
अहङ्कारादिना दुष्टः कर्ता भोक्ता भवेन्न मे ।
ममत्वाहंत्वभावेऽपि स्यां स्वस्मै स्वे सुखी स्वयम् ॥२०॥
वांछन् गृह्णन् त्यजन् हर्षन् शोचन् कुप्यंश्च वर्तते ।
यत्रास्ते तत्स्वसाम्राज्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥२१॥
यदाऽज्ञता तदासीन्मे प्रीतिर्भोगे स्वविभ्रमात् ।
दीनत्वज्ञोपि यावानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥ २२॥
ज्ञातृत्वं मयि सर्वेषु स्वायत्तं साम्यसंयुतम् ।
कस्य कः ? ज्ञातृतां दृष्ट्वा, स्यां स्वस्मैस्वे सुखी स्वयम् ॥२३॥
यत्रैव भासते विश्वं सोहं विश्वं न साकृतिः ।
ज्ञाता दृष्टा स्वतन्त्रोऽहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥२४॥
स्वभिन्ने न हितं किंचिदहं तोऽहं हिते क्षमः ।
हं ताश्रिता मुधा बुद्धिः स्यां स्वस्मै स्वे सुखी स्वयम् ॥२५॥
सहजानन्दभावः क्व क्व मे रागादिवैरिणः ?
सहजानन्दसम्पन्नः स्यां स्वस्मै स्वे सुखी स्वयम् ॥२६॥

प्रयत्नो वाञ्छया तस्माद्वातो यन्त्रं प्रवर्तते ।
स्वे तान्यारोप्य किं दुःखी ? स्यां स्वस्मै स्वे सुखी स्वयम् ॥२७॥
पङ्गोर्दृष्टिर्यथान्धे न तथा स्वस्यैव नो तनोः ।
दर्शनं मात्रमस्म्यस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥ २८ ॥
यस्मिन् ज्ञानमये यत्ने मत्तपाषाणवत्क्रमात् ।
विकल्पा नापि तत्रान्ते स्यां स्वस्मै स्वे सुखी स्वयम् ॥२९॥
आत्मजागरणं यत्र चाभावे लोकजागृतिः ।
अहं स ज्ञानमात्रोऽस्मि स्यां स्वस्मै स्वे सुखी स्वयम् ॥३०॥
अहं सर्वं जन्ममृत्यादि सुखं दुःखं नयाम्यहम् ।
मुक्तौ नेता गुरुस्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३१॥
देहे बुद्ध्या वपुः स्वस्य बुद्ध्या स्वः प्राप्स्यते मया ।
ज्ञानमात्रमतिर्मेऽस्तु स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३२ ॥
महान् स्वभ्रान्तिजः क्लेशो भ्रान्तिनाशेन नंक्ष्यति ।
याथात्म्यं श्रद्दधे तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३३ ॥
देहे स्वबोधता दुःखं सुखं स्वे स्वस्य चेतनम् ।
सुखं स्वायत्तमेवातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥३४॥
तिर्यङ्नारकदेवानां देहे तिष्ठन् पृथक् तथा ।
नृदेहेऽपि नरो नाहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३५ ॥
अन्योऽन्यत्वेन दुःखं स्वः स्वत्वेन सुखपूरितः ।
यते स्वदृष्टितः स्वार्थे स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३६ ॥
आत्मलाभस्पृहैका मे तदन्यत्रास्तु मा गतिः ।
नश्यत्वन्तर्जगच्चादः स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३७॥

यत्र चित्तस्य न क्षोभः स्वे वैकान्ते वसाम्यहम् ।
जनव्यूहे हितं किं मे स्यां स्वस्मै स्वे सुखी स्वयम् ॥३८॥
हितैषी हितयन्ताऽस्मि हितज्ञाऽस्मादहं गुरुः ।
अस्यैव साक्षितायां शं स्यां स्वस्मै स्वे सुखी स्वयम् ॥३९॥
ज्ञानं स्वमेव जानाति तदा स्वस्वामिता कुतः ?
अहमद्वैतबुद्धिः सन् स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ४० ॥
ज्ञप्तिमात्रदशायां न दुःखं स्यात्कर्मनिर्जरा ।
सैषोऽहं ज्ञप्तिमात्रोऽतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४१॥
यदुपासे तदाप्तिः स्यादतःशुद्धात्मतां भजे ।
शुद्धाप्तिः शान्तिसम्प्राप्तिः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४२॥
संयम्याक्षाणि मुक्त्वा च कल्पनां मोहसंभवाम् ।
अन्तरात्मस्थितः शान्तः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४३॥
भावनाप्रभवः क्लेशो भावनातः शिवं सुखम् ।
भावयेऽतः शिवं स्व शं स्यां स्वस्मै स्वे सुखी स्वयम् ॥४४॥
सारे देहिषु सर्वेषु व्यक्ताव्यक्ते बुधाज्ञयोः ।
ज्ञानमात्रे चिरं तिष्ठन् स्यां स्वस्मै स्वे सुखी स्वयम् ॥४५॥
सद्दृष्ज्ञानचारित्रैकत्वं मुक्तिरदः सुखम् ।
तच्च ज्ञानमयं तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥४६॥
तत्त्वतो ज्ञानमात्रोऽहं क्व विकल्पावकाशता ?
ततोऽहं निर्विकल्पः सन् स्यां स्वस्मै स्वे सुखी स्वयम् ॥४७॥
स्वैकत्वस्य रुचिस्तस्माद् भव्यता निश्चयेन मे ।
अभव्यभावे कथं मृशः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४८॥

अद्वैतानुभवः सिद्धिर्द्वैतबुद्धिरसिद्धता ।
सिद्धेरन्यश्च पन्था न स्यां स्वस्मै स्वे सुखी स्वयम् ॥४६॥
स्वैकत्वं मंगलं लोके उत्तमं शरणं महत् ।
रक्षादुर्गं तदेवास्ति स्यां स्वस्मै स्वे सुखी स्वयम् ॥५०॥
स्वैकत्वमौषधं सर्वक्लेशनाशनदक्षकम् ।
चिन्ता-खिन्नस्तदेवाम्भिन् स्यां स्वस्मै स्वे सुखी स्वयम् ॥५१॥
ज्ञायकत्वे विकारः क्व रागादेः सन्निधावपि ।
सोऽहं ज्ञायकमात्रोऽस्मि स्यां स्वस्मै स्वे सुखी स्वयम् ॥५२॥
दुःखी किं ? विवशः किं ? मेऽत्रैव न्यायो विधिर्जगत् ।
सुष्टागाोऽप्ययं तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ५३ ।
ज्ञानपिण्डोऽन्यभिन्नोऽहं निर्विकारी स्वभावतः ।
स्वतन्त्रः सहजानन्दः स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ५४ ॥
निजचेष्टाफलं ह्यन्ये दृष्टिः संसार उच्यते ।
विज्ञाय तत्त्वतस्तत्त्वं स्यां स्वस्मै स्वे सुखी स्वयम् ॥५५॥
अनन्तज्ञानसौख्यादि गुणपिण्डोऽपि तृष्णया ।
भ्रमामि दीनवत्कस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥५६॥
ज्योतिर्मयो महानात्मा वञ्चितोऽबुधैरहम् ।
सम्बन्धमात्ररम्योऽस्तु स्यां स्वस्मै स्वे सुखी स्वयम् ॥५७॥
पूर्णदृग्ज्ञानसत्सौख्यी सिद्धात्मा देशतोऽप्यहम् ।
पूर्णश्च भवितुं शक्यः स्यां स्वस्मै स्वे सुखी स्वयम् ॥५८॥
निर्द्धूयाज्ञानजान्धं स्वं दृष्ट्वा ध्यानाग्निना विधिम् ।
दहानि निष्कलङ्कः सन्स्यां स्वस्मै स्वे सुखी स्वयम् ॥५६॥

रागादि पीडयेत्तावच्चाविष्टो ज्ञानसागरे ।
अतो ज्ञानेऽवगाह्याहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥६०॥
स्वभावः सिद्धनैते तु पर्यायाः कर्मविक्रमाः ।
तत स्वविक्रम कुर्या स्यां स्वस्मै स्वे सुखी स्वयम् ॥६१॥

समाप्तोऽयम् प्रथमोऽध्यायः ।

यः संयोगजया दृष्ट्या भाति संयोगजः किल ।
तौ नाहं मे न तौ हित्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥१॥
नाहमन्यत्र नान्यस्य न नष्टो न बहिर्गतः ।
किन्तु ज्ञायकभावोऽहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥२॥
विषवद्विषयांस्त्यक्त्वा पृथक्कृत्य वपुर्धिया ।
स्वात्मनामेव पश्यानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥३॥
न मे वर्णो न मे जातिर्न मे देशो न विग्रहः ।
नैषामहं त्वहं त्वेकः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४॥
कल्पना यत्र भासन्ते सोऽहं नास्थिरकल्पनाः
श्रद्धामृतं पिबानीदं स्यां स्वस्मै स्वे सुखी स्वयम् ॥५॥
भिन्नदर्शी भवेद्भिन्नः संकरैषी च संकरः ।
तत्त्वतः सर्वतः प्रत्यक् स्यां स्वस्मै स्वे सुखी स्वयम् ॥६॥
न मे लोको न चाज्ञातोऽनष्टो नष्टे विकल्पिते ।
तदित्थं ज्ञानमात्रोऽहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ७ ॥
देहे स्थित्वापि न स्पृष्टो नानाकारो निराकृतिः ।
जानन् सर्वं न सर्वोऽहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥८॥

विभक्तं कत्वबोधस्य न स्पर्शः पुण्यपापयोः ।
नैव वस्तुस्थितिर्मेऽस्तु स्यां स्वस्मै स्वे सुखी स्वयम् ॥९॥
नानामतानि तत्त्वेषु विवादे न प्रयोजनम् ।
मुक्त्वाऽन्यत् स्वं तु पश्येयं स्यां स्वस्मै स्वे सुखी स्वयम् ॥१०॥
ईर्षादिवासनाजन्यमौपाधिकविनश्वरम् ।
तद्भिन्नं प्रपश्येयं स्यां स्वस्मै स्वे सुखी स्वयम् ॥११॥
वासनान्ते न संसारः संसारस्याग एष हि ।
स्वदृष्टया वासनान्तोऽतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१२॥
कामे बोधरिपावर्थेऽनर्थे तन्मूलधर्मके ।
त्यक्त्वादरं स्वमर्चेयं स्यां स्वस्मै स्वे सुखी स्वयम् ॥१३॥
सुखारिदुर्गतिर्दैन्यं पापं तद्धेतुकं ततः ।
दूरं वसानि पापेभ्यः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१४॥
कार्यहेतुर्न चान्यन्मे भाति विश्वं स्वसत्तया ।
ज्ञानं सुखं परस्मान्न स्यां स्वस्मै स्वे सुखी स्वयम् ॥१५॥
जीवो दृश्यो न यो दृश्योऽजीवो वा कोऽपि मे न हि ।
कस्मै सीदानि नश्यानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥१६॥
परः कोऽपि हितो मे नो यो हितोऽहं न मूर्तिकः ।
चिन्तने कस्य नश्यानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥१७॥
यावत्प्रवर्तनं लोके तत्सेवामज्ञताफलम् ।
निवृत्तिविज्ञानसाम्राज्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥१८॥
कर्मकर्त्रादिकल्पाः स्युर्देहादिष्वनुबन्धिनः ।
पूर्यते तैर्न कश्चिन मे स्यां स्वस्मै स्वे सुखी स्वयम् ॥१९॥

इच्छा बन्धो न मे हानिर्ज्ञानमात्रस्य दर्शिनः ।
पूर्यते ज्ञानमात्रेण स्यां स्वस्मै स्वे सुखी स्वयम् ॥२०॥
नाना चेष्टे न मे लाभश्चेन्न चेष्टे न मे क्षतिः ।
ज्ञानमात्रैव चेष्टा मे स्यां स्वस्मै स्वे सुखी स्वयम् ॥२१॥
तत्त्वज्ञो जायते मूको लुब्धैस्त्यक्तमिदं छलात् ।
शान्तिस्तु तत्त्वतस्तत्त्वे स्यां स्वस्मै स्वे सुखी स्वयम् ॥२२॥
तत्त्वज्ञ आलसो भूतो लुब्धैस्त्यक्तमिदं छलात् ।
नैष्कर्म्य एव शान्तिस्तु स्यां स्वस्मै स्वे सुखी स्वयम् ॥२३॥
मनो मे न स्वभावोऽहं मनः कार्यं न तत्फलम् ।
औपाधिकमसत्त्वेऽतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥२४॥
यत्रैव भाति रागादि सोऽहं रागादिनैव हि ।
रागादौ निर्ममस्तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥२५॥
अन्यथानुपपत्तेः स्याद्रागादेः कर्म कर्तृ हि ।
तत्कर्म व्याहतिर्ज्ञप्तौ स्यां स्वस्मै स्वे सुखी स्वयम् ॥२६॥
जागृतिः शयनं पानमत्तिर्वाग्दर्शनं श्रुतिः ।
ज्ञप्तिक्रियस्य किं कृत्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥२७॥
सङ्कल्पेऽजनि संसारो ज्ञाने नश्यति कल्पितः ।
निर्विकल्पे रतो भूत्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥२८॥
परायत्ताः परार्थाः स्वायत्तं ज्ञानस्य वेदनम् ।
पराप्तये न धावानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥२९॥
राज्ये क्लेशः श्वर्गं मत्तो भिक्षावृत्तौ तु तत्त्वतः
तत्त्वं हि नोमयत्रास्ति स्यां स्वस्मै स्वे सुखी स्वयम् ॥३०॥

परस्थितेः परं स्थानं परामावो हि स्वास्थितेः ।
तत्त्वंतु नोभयत्रास्ति स्यां स्वस्मै स्वे सुखी स्वयम् ॥३१॥
अनैाचे वाङ्मनःकर्म चैकाग्र्यवसरो वने ।
तत्वं तु नोभयत्रास्तिः स्यां स्वस्मै स्वे सुखी स्वयम् ॥३२॥
ज्ञानदृष्टौ क्व मोक्षाख्या क्वार्थः काम क्व धर्मकः ।
सहजानन्ददृष्टिः सन् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३३॥
किं कुर्यां क्व रमै चित्तमस्थिरं चाहितं जगत्
ज्ञानमात्रे रतो भूत्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥३४॥
कर्तृत्वं न स्वभावो मे क्रिया एता उपाधिजः ।
वातवन्क्षुब्धपर्णस्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥३५॥
वृत्तिदृष्टौ तपो व्यर्थं निवृत्तौ न क्षतिः कुत ।
ज्ञप्तिरेव निवृत्तिश्च स्यां स्वस्मै स्वे सुखी स्वयम् ॥३६॥
परे दृष्टे न पृष्टे स्व पृष्टे स्व न विकल्पना ।
अविकल्पेन सन्तापः स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३७ ॥
मयि सौख्यं मया मे मत् ज्ञप्तिभिन्नं न साधनम् ।
आग्रहखानि कथं वृत्तौ स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३८॥
नाहं देहो न जातिर्मे न स्थानं न च रक्षकः ।
गुप्तं ज्ञानं प्रपश्यामि स्यां स्वस्मै स्वे सुखी स्वयम् ॥३९॥
क्वान्योऽहं क्व च चिन्ता क्व क्वैक प्रम्यं क्व शुभाशुभम् ।
इमे स्वस्माच्च्युतेस्तर्काः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४०॥
को दूरे कश्च सामीप्ये को बाह्ये को मयि स्थितः ।
ज्ञानमात्रमहं यस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ४१ ॥

सञ्चितं कर्म चेदस्तु तेन स्पृष्टोऽपि नोऽद्वयम् ।
अद्वैतोऽहमयँ तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥४२॥
ग्रामे वने निवासो मे विकल्पाऽनात्मदर्शिनः ।
स्वे ज्ञाने ज्ञस्य वासोऽतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४३॥
यातायाताणुपुञ्जोऽयं देहोऽहं तु स्थिर परः ।
मे प्रवेशो न कस्मिंश्चित् स्यां स्वस्मै स्वे सुखी स्वयम् ॥४४॥
व्यवहारे परावस्था निश्चये ज्ञानमात्रता ।
ज्ञानमात्रे परा शान्तिः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४५॥
रागादिवर्णतः प्रत्यग्ज्ञाते प्राप्स्यामि शं शिवम् ।
विकल्पो विघ्नकृद्यातु स्यां स्वस्मै स्वे सुखी स्वयम् ॥४६॥
देशो देहश्च भिन्नात्मा विकारस्तस्ययोगतः ।
सर्वे भिन्नाः स्वतस्तमात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥४७॥
नाकारो न विकल्पो न द्वैविध्यं न विपर्ययः ।
स्वःस्व एव शिवस्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥४८॥
कष्टे प्राणानुपेक्षन्ते ज्ञानं रक्षन्ति योगिनः ।
ज्ञानं ज्ञाय प्रियं तत्स्वे स्यां स्वस्मै स्वे सुखी स्वयम् ॥४९॥
ज्ञानमस्तीति कर्तृत्वं भोक्तृत्वं च ततोऽन्यके ।
त्रिकालेऽपि न तत्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥५०॥
दृश्यं न दर्शकस्तस्मान्मे संयोगजे दशे ।
किन्तु ज्ञायकभावोऽहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥५१॥
यदा देहोऽपि नैवाहं नृरूप्यादेस्तर्हि का कथा ।
ज्ञानमेवास्ति देहो मे स्यां स्वस्मै स्वे सुखी स्वयम् ॥५२॥

यत्र वासो रतिस्तत्र तत्रैकत्वं ततो निजे ।
उषित्वा ज्ञानदृष्ट्याहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥५३॥
यज्ज्ञानेन जगन्मन्ये तत्र मे किं तदादृतिः ।
स्वादृतिः सा स्ववृत्तिर्हि स्यां स्वस्मै स्वे सुखी स्वयम् ॥५४॥
कः कस्य कीदृशः क्वेति देहमप्यविशेषयन् ।
सहजानन्दसम्पन्नः स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ५५ ॥

समाप्तोऽयं द्वितीयोऽध्यायः

नश्वरे चेन्द्रियाधीने सुखे सारो न विद्यते ।
का रतिस्तत्र विज्ञस्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥ १ ॥
यतोऽन्ते क्लेशदाः सर्वे सम्बन्धा, विपदास्पदाः ।
ततः संगं परित्यज्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥ २ ॥
यौवनं जरया व्याप्तं शरीरं व्याधिमंदिरम् ।
समृत्यु जन्म कः सारः ? स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३ ॥
येषां योगो वियोगो हि नियमेन भविष्यति ।
तेभ्यो नु किं मुधाऽखिन्दम् स्यां स्वस्मै स्वे सुखी स्वयम् ॥४॥
फेनपुञ्जेऽपि सारः स्यान्न तथापि शरीरके ।
विरज्य देहतस्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥५॥
विषं पीत्वाऽपि जीवेच्चेन्न भुक्त्वा विषयं सुखी ।
विरज्य भोगतस्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥६॥
देही कश्चिन्न यो मृत्युं न प्राप्तस्तर्हि को मम ।
त्राता स्ववृत्तिरेवातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥७॥

बालवृद्धयुवग्रासे यमस्य समता भवेत् ।
साम्यपुञ्जस्य मे किं न स्यां स्वस्मै स्वे सुखी स्वयम् ॥८॥
रागद्वेषौ हि संसारः संसारो दुःखपूर्णिमः ।
संसारतो विरज्यातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥९॥
संसारजो हि पर्यायः संसार उपचारतः ।
त्यक्त्वा तन्मूलसंसारं स्यां स्वस्मै स्वे सुखी स्वयम् ॥१०॥
यन्न रागवशः प्राप योनिदेशकुलं न तत् ।
मुक्त्वा रागमतः स्वस्थः स्यां स्वस्मै स्वे सुखी स्वयम् ॥११॥
कीटो भूपो नृपः कीटो जायते विषमे भवे ।
स्वास्थ्यमेव स्थिरं स्थानं स्यां स्वस्मै स्वे सुखी स्वयम् ॥१२॥
प्राप्ता ये दुर्गतेः क्लेशाः भ्रान्त्या भ्रान्त्वा मयैव ते ।
मुक्त्वा भ्रान्तिमतः कालात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥१३॥
आपत्पूर्णे भवे ह्येको भ्राम्यामि तत्त्वतो निजे ।
उपयोगे ततः स्वस्थः, स्यां स्वस्मै स्वे सुखी स्वयम् ॥१४॥
देहान्तरं भ्रजाम्येको देहमेकस्त्यजाम्यहम् ।
परदृष्टिं हि तत्स्वस्थः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१५॥
वियोगयोगदुःखादौ किंचिन्मित्रं न तत्त्वतः ।
स्वाविष्टः स्वस्य मित्रं स्वः स्यां स्वस्मै स्वे सुखी स्व० ॥१६॥
यदन्येषां कृते चेष्टं, एको भुंक्ते हि तत्फलम् ।
स्वस्मै तत्रापि चेष्टासीत् स्यां स्वस्मै स्वे सुखी स्वयम् ॥१७॥
कारणं सर्वदुःखानां स्वज्ञानाभाव एव हि ।
येनैको वञ्चितस्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥१८॥

असंकृतेर्हि वस्तूनां स्वस्य स्वेनैव बद्धता ।
स्वे ध्रुवे बद्धता नातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१९॥
बन्धैकत्वेऽपि देहादेर्भिन्न एव स्वभावतः ।
परभिन्नात्मवृत्तिः शं स्यां स्वस्मै स्वे सुखी स्वयम् ॥२०॥
देहादेव यदा भिन्नः कथं बन्धुभिरेकता ।
विभक्तस्य सदा सौख्यं स्या स्वस्मै स्वे सुखी स्वयम् ॥२१॥
देहोऽणुव्रजजः स्वात्मातीन्द्रियो ज्ञानविग्रहः ।
स्वात्मन्येव स्थिरस्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥२२॥
यैर्यैर्मम सम्बन्धस्ते स्वरूपात्पृथक् सदा ।
तत्स्वदृष्ट्याऽसुखं तेन स्यां स्वस्मै स्वे सुखी स्वयम् ॥२३॥
पलास्थिरुधिरे देहे स्वबुद्ध्या क्लेशभाग्भवेत् ।
तत्र रागे न को लाभः ? स्यां स्वस्मै स्वे सुखी स्वयम् ॥२४॥
देहो न शुध्यते सिन्धोर्वारिभिः शुध्यते स्वयम् ।
स्वात्मा स्वात्मधिया तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥२५
दुःखाश्रयो हि देहोऽयं देहतो व्यसनानि वै ।
विरज्य देहतस्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥२६॥
निन्द्ये देहेऽप्युषित्वात्मसिद्धिः शक्या वसन्नपि ।
विरज्य देहतस्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥२७॥
मनोवाक्कायिकी चेष्टोच्छातो दुःखं ततस्ततः ।
हत्वेच्छां प्रज्ञया भित्त्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥२८॥
शुभःकषायमान्द्येनाऽशुभस्तीव्रकषायतः ।
अकषायेन शं नित्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥२९॥

मनोवाक्कायवृत्तीनां निवृत्तेरुपदेशनम् ।
स्वस्थित्यै स्वस्थितौ शांतिः स्यां स्वस्मै स्वे सुखी स्व० ॥३०॥
शुद्धोपयोगलब्ध्यैनात्मा स्वयं रच्यते तदा ।
स्वस्मिन् स्वमेव वेद्यस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३१॥
नश्येते निर्ममत्वेन रागद्वेषौ ततः सुखम् ।
निर्ममत्वं विचिन्त्यातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३२॥
मुक्त्वोऽदं कल्पनाजालं मनोऽदो निश्चलं भवेत् ।
न क्लेशो निर्विकल्पः सन् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३३॥
ज्ञानं ज्ञानं न कोपादि तत्तज्ज्ञानं न सुस्फुटम् ।
स्वस्मिन् ज्ञानं स्थिरीभूय स्यां स्वस्मै स्वे सुखी स्वयम् ॥३४॥
तप इच्छानिरोधोऽतः कर्म निर्जीर्यते ततः ।
तपस्तप्त्वा च शुद्धः सन् स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३५॥
अग्नि नाकाञ्चनं यद्वत् तथ्य मानस्तपोऽग्निना ।
शुद्धीभूय लभै स्वास्थ्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥३६॥
विरागपरिणत्या मे जायते कर्मणां क्षयः ।
रागभिन्नमतो विन्दन् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३७॥
बाह्यं तपोऽपि नाशायाशाया यस्मात्तपस्यपि ।
आशानाशाय सेवे स्वं, स्यां स्वस्मै स्वे सुखी स्वयम् ॥३८॥
धर्म उद्धारकस्त्राता पावको बान्धवो गुरुः ।
सोऽहं रागादिकं मुक्त्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥३९॥
धर्मो वेशे न यात्रायां बन्दने न च मन्दिरे ।
धर्मे ज्ञप्तिमये तिष्ठन्, स्यां स्वस्मै स्वे सुखी स्वयम् ॥४०॥

मोहक्षोभौ न यत्र स्तः स धर्मो वीतरागता ।
सा मे परिणतिस्तस्मात्, स्यां स्वस्मै स्वे सुखी स्वयम् ॥४१॥
लोके रिक्तं न तत्स्थानमनन्ता जन्ममृत्यवः ।
नाभूवन् यत्र किं रज्ये स्यां स्वस्मै स्वे सुखी स्वयम् ॥४२॥
लोकं कृतवाञ्च कोपीमं हरिष्वत्यपि नो तथा ।
अमरोऽहमजन्माहं, स्यां स्वस्मै स्वे सुखी स्वयम् ॥४३॥
लोके द्रव्याण्यनेकानि वर्तन्ते किन्तु वै निजे ।
अहन्तां किं पुनः कुर्यां स्यां स्वस्मै स्वे सुखी स्वयम् ॥४४॥
अविपूर्णत्वसज्जातिष्वादिदुर्लभवस्तुनि ।
प्राप्ते लाभो यदि स्वस्थः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४५॥
आत्मयाथात्म्यविज्ञानं दुर्लभादपि दुर्लभम् ।
लभे रमे च तत्रैव स्यां स्वस्मै स्वे सुखी स्वयम् ॥४६॥
यस्य ज्ञायकभावस्य स्वस्थ विचिं विना जगत् ।
ज्ञातं व्यर्थं हि तं ज्ञात्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥४७॥

समाप्तो ऽयं तृतीयो ऽध्यायः ।

ज्ञानं सुखं न चान्यन्न सोहं ज्ञानमहं सुखम् ।
सर्वाशामहितां त्यक्त्वा, स्यां स्वस्मै स्वे सुखी स्वयम् ॥१॥
ज्ञायकोऽजोऽमरोऽहं को जीविताशां करोमि किम् ।
शातन्त्र्यं तत्परित्यागे स्यां स्वस्मै स्वे सुखी स्व० ॥२॥
अदृश्यो ज्ञायकोऽहं कां कीर्तिमिच्छामि काचित् ।
स्वातन्त्र्यं तत्परित्यागे स्यां स्वस्मै स्वे सुखी स्वयम् ॥३॥

ज्ञायकस्याप्यवद्धस्य विषयाशैव बन्धनम् ।
स्वातन्त्र्यं तत्परित्यागे स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ४ ॥
आशात्यागो हि मे बन्धुर्मित्रं त्राता गुरुः पिता ।
तदेव शरणं सत्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ५ ॥
नैराश्येऽपि हि नैराश्यं तस्य का तुलना भुवि ।
अतो नैराश्यमालम्ब्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ६ ॥
वीततृष्णस्य केऽप्यर्थाः क्लेशदाः सुखदा नहि ।
ततोऽर्थाः सन्तु वा नाशाः स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ७ ॥
सतृष्णस्य सदाकुल्यमर्थाः सन्तु न सन्तु वा ।
धीसारं न मनोदिच्छा स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ८ ॥
पूर्णं कस्यापि कृत्यं किं ? चिकीर्ष्येऽद्वन्द्वता कदा ।
न चैत्यक्त्वा हि सर्वाशां स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ६ ॥
प्रवृत्तावेव नानात्वं निवृत्तावेकरूपता ।
शान्तिमार्गे निवृत्तिर्हि स्यां स्वस्मै स्वे सुखी स्वयम् ॥ १० ॥
लोभादघस्ततः क्लेशोऽतस्तृष्णालुः सदाकुलः ।
वीततृष्णः स्वभावो मे स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ११ ॥
तृष्णा बन्धश्च संसारोऽतार्ष्ण्यं मुक्तिः स्वतन्त्रता ।
वीततृष्णः स्वभावो मे स्यां स्वस्मै स्वे सुखी स्वयम् ॥ १२ ॥
ताष्ण्र्येऽताष्ण्र्येऽपि वस्तूनां वियोगो नार्थकृत् ततः ।
वीततृष्णः स्वभावो मे स्यां स्वस्मै सुखी स्वयम् ॥ १३ ॥
पूर्यते पुण्यकामार्थैर्न किंचिन्मे ततो हि तान् ।
त्यक्त्वात्मन्येव तिष्ठेयमस्यां स्वस्मै स्वे सुखी स्वयम् ॥१४॥

भूतो भवेषु सम्पन्नो न तुष्टोऽभूदनर्थता ।
मायाविनीं किमाशासे स्यां स्वस्मै स्वे सुखी स्वयम् ॥१५॥
पुण्यापुण्यफलं दृश्यमदृश्या चिच्चमत्कृति ।
वीततृष्णस्य स्वस्थस्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥१६॥
वर्तते मेद्य किं सम्पज्जन्मजन्मार्जितं यशः ।
दूरमास्तां विपन्मूलं स्यां स्वस्मै स्वे सुखी स्वयम् ॥ १७ ॥
स्वात्मचिन्तापि चिन्तेव चिन्तास्वानन्दबाधिनी ।
सर्वचिन्तां विमुच्यातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१८॥
वित्तं विषयदस्यु क्व मित्रं शत्रुः क्व पाटवम् ।
तन्मूलाशा न मे यस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥१९॥
निर्वाणं भोगवैरस्य बन्धो भोगेषु गृद्धता ।
स्वायत्तमेव निर्वाणं स्यां स्वस्मै स्वे सुखी स्वयम् ॥२०॥
भोगमोक्षैषिणोऽनेके वाञ्छाहीनो हि दुर्लभः ।
स एव सहजानन्दः स्यां स्वस्मै स्वे सुखी स्वयम् ॥२१॥
ज्ञाने रतस्य धर्मार्थकाममोक्षे जनौ भृतौ ।
हेयादेयेऽपि चिन्ता न स्यां स्वस्मै स्वे सुखी स्वयम् ॥२२॥
लाभेऽपि भूतिकीर्तीनां तत्त्यागेन विना न शम् ।
प्रत्याख्यानमये ज्ञाने स्यां स्वस्मै स्वे सुखी स्वयम् ॥२३॥
मुमुक्षुर्वा बुभुक्षुश्चालम्बतां हि शिवाशिवम् ।
इच्छाहीनः स्वविश्रांतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥२४॥
देहादिकं पृथक्कृत्य ज्ञाने तिष्ठामि केवले ।
त्यानि भोगयशोवाञ्छां स्यां स्वस्मै स्वे सुखी स्वयम् ॥२५॥

इदं ज्ञानं न मे ज्ञानं दर्शनं च न दर्शनम् ।
चिन्तयालं न मेऽन्तर्वाक् स्यां स्वस्मै स्वे सुखी स्वयम् ॥२६॥
यशस्वी वैभवी वा स्यां शान्तिस्तत्रापि नो यतः ।
इन्धनं तदशान्त्यग्नेः स्यां स्वस्मै स्वे सुखी स्वयम् ॥ २७ ॥
आर्तकारणमाशैव कमाशा।सेऽत्र को मम ।
दूरमास्तां न मेऽर्थो हि स्यां स्वस्मै स्वे सुखी स्वयम् ॥ २८ ॥
वहिर्वहिर्भ्रमो व्यर्थो ज्ञानतत्वमिदं स्फुटम् ।
इतोऽन्यन्मे सहायं न स्यां स्वस्मै स्वे सुखी स्वयम् ॥ २९ ॥
मूढोऽन्यममृतं मत्वा भ्रमेन्मे त्विह निश्चयः ।
ह्येकत्वममृत तस्मात् स्यां स्वस्म स्वे सुखी स्वयम् ॥ ३० ॥
रागद्वेषपरित्यागे कर्म मे किं करिष्यति ।
त्यागो हि केवलं ज्ञानं स्यां स्वस्मै स्वे सुखी स्वयम् ॥३१॥
रागो यागेऽपि हेयश्चेद्सम्बन्धे पुनर्न किम् ।
अयागे रागता चेद्धा स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३२ ॥
शुद्धात्मान विहायान्यचिन्ता पापोदयस्ततः ।
अन्यचिन्तां पृथक्कृत्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३३ ॥
पराशाजीवितो मूढः स्वातन्त्र्यं मन्यते बुधः ।
शं स्वातन्त्र्यं विना नातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥३४॥
देवभक्तावपि ध्यानं भावः स्वस्यैव वर्तते ।
स्वः स्वस्मै शरणं तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३५॥
किं स्वानुकूलनेऽन्येषां किं स्वस्याप्यानुकूलने ।
शं स्वानुकूलने स्वस्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥३६॥

न हानिः सहजे ज्ञाने किन्त्विदानीं न सा दशा ।
अतश्चिन्तानिरोधेन स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३७ ॥
सुखं हि सर्वसन्यासस्तु कुर्वे सर्वसंग्रहम् ।
दुःखोपायेन किं शं स्यात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३८॥
परसंगरतो बद्धः स्वस्थो मुक्तोऽग्रहो ग्रहः ।
तस्याग्राह्यस्य ग्राह्यस्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३९ ॥
सुखायान्यत्प्रतीत्यैव सुखहत्या मता यतः ।
सुखेनास्मि स्वयं पूर्णः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४०॥
उत्तमस्त्याग आशा न प्रतीक्षा यत्र वर्तते ।
पराद्दष्टर्यां न सा स्वास्थ्ये स्यां स्वस्मै स्वे सुखी स्वयम् ॥४१॥
भोगे योगे न शान्तिस्त्विच्छाहीनो वर्तते हि यः ।
शांन्त्याधारः स एवातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४२॥
कृपां कर्तुं न शक्योऽन्यो मय्यहमेव तत्क्षमः ।
ततोन्याशां परित्यज्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥४३॥
सुखं नैराश्यमेवास्ति दुःखमाशैव केवलम् ।
स्वदृष्टेः काचिदाशा न स्यां स्वस्मै स्वे सुखी स्वयम् ॥४४॥
इन्द्रोऽप्याशान्वितो दुःखी गताशोऽसंगकः सुखी ।
स्वास्थ्यमेव गताशत्वं स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ४५ ॥
आशा गतास्तदा सिद्धिर्नाभिलष्यं यतस्तदा ।
स्ववृत्तिस्तत्पदं तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥४६॥
यावन्मूर्छास्ति कस्मिंश्चित्तावच्छिः शल्लता न हि ।
स्ववृत्तौ नास्ति मूर्छातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४७॥

देहिनां देहभोगानां दुःखं संयोगतस्ततः ।
संयोगं कस्य वाञ्छामि स्यां स्वस्मै स्वे सुखी स्वयम् ॥४८॥

समाप्तोऽयं चतुर्थोऽध्यायः

यदाप्नोति सुखं स्वस्थो न तत्क्लेशं प्रतिष्ठितः ।
स्वास्थ्ये शं न हि रागेऽतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१॥
चिन्तेच्छया ततः क्लेशो गताशः सौख्यसागरः ।
गताश्यं मंगलं स्वास्थ्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥ २ ॥
आकिंचिन्यमवं स्वास्थ्यं स्वास्थ्यँ सुखस्वरूपकम् ।
नकिंचिन्मे न किंचिन्मे स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३ ॥
यदा यत्कृतुं मायात्वायातु चेन मया कृतम् ।
ज्ञप्तिमात्रविधौ शक्तः स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ४ ॥
शास्त्राण्यधीत्य स्वास्थ्यं न सर्वविस्मरणादिना ।
तस्माद्विकल्पनास्त्यक्त्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ५ ॥
ज्ञात्वालसः श्रमं व्यर्थं नेत्रोन्मेषनिमेषयोः ।
स्वस्थः सुखी स एवातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ६ ॥
दिशोदीशोऽपि साक्षाच्चेद् विना स्वास्थ्यान्न मंगलम् ।
सुखदुःखे स्वयं दायी स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ७ ॥
विश्वं सुखांशमूलं न, शं ज्ञानत्यागयोः फलम् ।
स्वस्मै स्वे च तुष्यानि, स्यां स्वस्मै स्वे सुखी स्वयम् ॥८॥
अद्वैते स्वेऽस्तु दृष्टिर्मा, द्वैतेऽद्वैते न सम्भ्रमः ।
विपज्जन्म न मृत्युर्वा, स्यां स्वस्मै स्वे सुखी स्वयम् ॥९॥

यत्र कुत्राप्यवस्थायामस्मि तत्रैव यत्नतः ।
कृत्वा सत्याग्रह शान्तः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१०॥
कश्चित् कालश्च देशः स्यात् पूर्तिर्मे तद्गुणैर्न हि ।
शुद्धवृत्तिर्यतः स्वास्थ्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ११ ॥
मे चैतन्यस्य शास्त्रं क्व ? चर्चा ज्ञानं क्व कल्पना ?
स्वतो बहिर्न धावानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥ १२ ॥
मे चैतन्यस्य भोगः क्व ? तृप्तिस्तृष्णा क्व बन्धनम् ?
क्वाज्ञानं क्व विपत्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥१३॥
दुःखे ज्ञानच्युतिर्न स्यात् कायक्लेशेऽपि स्वस्थितिः ।
उद्देश्यं ज्ञानिनस्तस्मात्, स्यां स्वस्मै स्वे सुखी स्वयम् ॥१४॥
न स्वज्ञप्तिं विना ध्यानं यतः स्वोपासनामयम ।
शुद्धात्मोपासनं तस्मात्, स्यां स्वस्मै स्वे सुखी स्वयम् ॥१५॥
ज्ञप्तिस्त्वस्त्विह सर्वत्र, स्वबुद्धेः स्वस्यदर्शनम् ।
स्वाचरणं ततोऽस्त्वस्मात्, स्यां स्वस्मै स्वे सुखी स्व० ॥१६॥
सुप्रमत्तदशा लोके, भ्रमो हि स्वच्युतौ दशाः ।
सर्वाभ्रमास्ततः स्वस्थः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१७॥
यततामव्रती वृत्ते, न तुष्येत् ये व्रती व्रते ।
ज्ञानस्थित्र्तार्थोऽतः, स्यां स्वस्मै स्वे सुखी स्वयम् ॥१८॥
पुण्यपापे व्रताव्रत्तैर्मोक्षस्तद्द्वयशून्यता ।
ज्ञानमात्रस्ववृत्तिः स, स्यां स्वस्मै स्वे सुखी स्वयम् ॥१९॥
शृण्वतो वदतोऽप्यात्मचर्चा न ज्ञानभावनाम् ।
विना मुक्तिस्ततोऽत्रैव, स्यां स्वस्मै स्वे सुखी स्वयम् ॥२०॥

मनोवाक्कायवृत्तीनां, ग्रहणो संसार एव हि ।
रमै ततः पृथग्ज्ञाने, स्यां स्वस्मै स्वे सुखी स्वयम् ॥२१॥
वदानीच्छानि पृच्छान्यात्मानं ज्ञानमयं शिवम् ।
अत्रैव विहराण्येव, स्यां स्वस्मै स्वे सुखी स्वयम् ॥२२॥
भिन्नं स्वस्य धिया स्वस्माच्च्युतो बध्नाम्यतः परा—
च्युतः शाम्यानि बुद्धया स्वे स्यां स्वस्मै स्वे सुखी०॥२३॥
स्वस्थं स्वं पश्यतो मे न, रागद्वेषौ कुतोऽसुखम् ?
शंकाशल्यं कुतस्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥२४॥
भ्रान्त्या क्षुब्धं मनस्तस्माद्व्यग्रता नान्यतथा भवेत् ।
स्वं पश्यतो न मे हानिः स्यां स्वस्मै स्वे सुखी स्वयम् ॥२५॥
तत्किं यन्मयि मुञ्चानि ? यन्न तत्किं नयानि वै ?
जानन्नेवं हि तिष्ठानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥२६॥
जीवाजीवपृथग्ज्ञानान्निवृत्तिर्जायते परात् ।
तत स्यान्स्थ्यं ततः शान्तिः स्यां स्वस्मै स्वे सुखी स्व० ॥२७॥
स्वस्थस्य सहजानन्दोऽक्षोभतामाः परच्युतेः ।
एकत्वनियतिः स्वास्थ्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥२८॥
संविरयभ्यासशिक्षातः स्वान्यभिन्मोक्षसौख्यवित् ।
स्वस्थितिर्मोक्षसौख्यं हि स्यां स्वस्मै स्वे सुखी स्वयम् ॥२९॥
स्वालक्ष्योऽन्योपकारी चेत्क्लिष्टः परकृतावपि ।
स्वलक्ष्योस्मान्न मुच्येत स्यां स्वस्मै स्वे सुखी स्वयम् ॥३०॥
निर्द्वन्द्वेऽजेमरे शान्तेऽद्वैते ज्ञानिनि निर्ममे ।
स्वस्मिन् स्थित्वा स्थिरो भूत्वा, स्यां स्वस्मै स्वे सुखी० ॥३१॥

ज्ञस्वभावे मयि ज्ञाते सर्वं ज्ञातं स्वभावतः ॥
तत्रा स्थितौ सुखं तस्मात्, स्यां स्वस्मै स्वे सुखी स्वयम् ॥३२॥
कल्पनालोलकल्लोलैस्त्यक्तः शान्तः स्वयं सुखी ।
तत्राश्रयः परो नास्ति स्यां स्वस्मै स्वे सुखी स्वयम् ॥३३॥
इदं सुखमिदं दुःखमज्ञस्यैव हि कल्पना ।
स्वच्युतौ सर्वकः क्लेशः स्यां स्वस्मै स्वे सुखी स्वयम् ॥३४॥
नृत्वं कुलं मतिः सत्त्वं, सत्संगो देशना व्रतम्,
स्वस्थित्यर्थाय सन्त्यस्मात्स्यां स्वस्मै स्वे सुखी स्व० ॥३५॥
रागिणो जन्मने मृत्युर्वीतरागस्य मुक्तये ।
स्वस्थितेर्वीतरागत्वं स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३६ ॥
वर्षाद्यं नूतनं लोके, तत्त्वतस्तत्त्वबोधनम् ।
स्ववृत्तिर्यत्र तत्तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ३७ ॥
स्वयं यत्कर्तुमायाति तत्कृतौ न विपत्क्वचित् ।
अन्यथा क्लेशतातस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३८॥
संयमेन नरो धीरो गम्भीरः शल्यनिर्गतः ।
संयमः स्वस्थितिस्तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥३९॥
यावद्दूरं कषायेभ्यस्तावान् धीरः सुखीबुधः ।
अकषायः स्वेप्रत्यातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४०॥
रागद्वेषोदयस्तस्मिन्नवहं का कृपा कृता ।
स्ववृत्तिः स्वदया तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥४१॥
बंधिका किन्न चेष्टेयम् चेष्टेयं किन्न बंधिका ।
स्थित्वा ह्यचेष्टिते भावे स्यां स्वस्मै स्वे सुखी स्वयम् ॥४२॥

दुखं द्वन्द्वश्च संतापो विपत्तं ष्वान्ययोगतः ।
एकेऽनिष्टं न किंचिद्धि स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ४३ ॥
कषायविषयत्यागे, स्वास्थ्यमन्तर्बहिर्द्वयम ।
तत्त्यागो ज्ञानमात्रं हि स्वां स्वस्मै स्वे सुखी स्वयम् ॥ ४४ ॥
परैःशरणमान्यत्वं नाशोऽशरणमान्यता ।
सुखं स्वः शरणं तस्मात् स्यां स्वस्मै सुखी स्वयम् ॥४५॥
दुःखमूलं स्वधीरन्ये न परेऽर्थाः परे परे ।
स्वच्युतिः सा च स्वस्थोऽतः स्यां स्वस्मै स्वे सुखी स्व० ॥४६॥
स्वलक्ष्यता महादुर्गस्तत्रत्यस्य न बाधनम् ।
तत्र गुप्तो न जेयोऽतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ४७ ॥
स्वलक्ष्यता सुधासिन्धुस्तत्रत्यस्य न तापनम् ।
तत्रानिष्टः सदा शान्तिः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४८॥
पापोदये न हानिर्मे हानिः पापमये निजे ।
पापं परच्युतिस्तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ४६ ॥
पुण्योदये न लाभो मे लाभः पुण्यमये निजे ।
पुण्यं स्ववृत्तिता तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥५०॥
प्राक्तमया चेष्टितं यत्तत्स्वकषायविचेष्टितम् ।
अकषायः स्ववृत्तिः शं स्या स्वस्मै स्वे सुखी स्वयम् ॥५१॥
मनोवाक्कायिकी यावच्चेष्टा तावत्ततोऽसुखम् ।
सुख स्वास्थ्यमनिच्छा तत् स्यां स्वस्मै स्वे सुखी स्वयम् ॥५२॥
भ्रमे नष्टे यथा स्वप्ने तथा भ्रान्तिर्हि सर्वदा ।
निष्क्रियोऽहं यतः स्वस्थः स्यां स्वस्मै स्वे सुखी स्वयम् ॥५३॥

समाप्तोऽयं पञ्चमोऽध्यायः ।

सर्वेऽर्था: सर्वथा भिन्ना: कृत्यं किं तत्र वर्तते ?
ते सर्वे तेषु तिष्ठन्तु स्यां स्वस्मै स्वे सुखी स्वयम् ॥ १ ॥
चेष्टन्ते स्वकषायेण प्राणिनो मे न वाञ्छका: ।
केषु मोदै च शोचै किं स्यां स्वस्मै स्वे सुखी स्वयम ॥ २ ॥
ये दृश्यास्ते न जानन्ति जानन्तो निर्विकल्पका: ।
कं ब्रुवाणि क्व तुष्याणि स्यां स्वस्मै स्वे सुखी स्वयम् ॥३॥
स्तोतार: क्षणिका: सर्वे स्तुत्यं मन्य: क्षणक्षयी ।
तुष्य: कस्तोषक: कश्च स्यां स्वस्मैं स्वे सुखी स्वयम् ॥ ४ ॥
स्तुत्यं वृत्तं क्षणस्थायि क्षणिका वाङमयी स्तुति: ।
न मे वृत्तं न मे वाणी स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ५ ॥
लोकोऽसंख्योऽमित: कालोऽनन्ता: जीवा: कदा कदा ।
स्तोष्यन्ते क्व क्व के केऽत:स्यां स्वस्मै स्वे सुखी स्वयम् ॥६॥
स्वैकत्वेऽनुगता: स्वेभ्य: स्वस्य कुर्वन्ति ते क्रियाम् ।
भ्रान्त्या विमुह्य किं स्यानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ७ ॥
पुण्यं पापं सुखं दु:खं चेष्टा वाणी च कल्पना ।
विडम्बना: परात्सन्ति स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ८ ॥
सम्पदा विपदा भूयाज्ज्ञानमात्रोऽस्मि ते न मे ।
कुतस्तुष्याणि रुष्याणि स्यां स्वस्मै स्वे सुखी स्वयम् ॥९॥
अयशो वा यशो भूयाज्ज्ञानमात्रोऽस्मि ते न मे
कुतस्तुष्याणि रुष्याणि स्यां स्वस्मै स्वे सुखी स्वयम् ॥ १० ॥
जीवनं मरणं भूयाज्ज्ञानमात्रोऽस्मि ते न मे ,
कुतस्तुष्याणि रुष्याणि स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ११ ॥

मायास्था मयि दृष्टाः स्युः, दृष्टा मे ज्ञस्य का क्षतिः ?
कुर्वस्तुष्याणि रुष्याणि स्यां स्वस्मै स्वे सुखी स्वयम् ॥१२॥
ज्ञानी ज्ञानरतोऽज्ञानो मायास्थः परलोचकः।
मायास्थवाचि को रोषः, स्यां स्वस्मै स्वे सुखी स्वयम् ॥१३॥
ये स्तुवन्ति च निन्दन्ति, ते दृश्यं न तु मामिमम्।
प्रशंसा निन्दा न गुप्तस्य स्यां स्वस्मै स्वे सुखी स्व० ॥१४॥
प्रशंसया न मे लाभो निन्दया का च मे क्षतिः ?
स्वं हन्म्येव विकल्पेन स्यां स्वस्मै स्वे सुखी स्व० ॥ १५ ॥
ज्ञानमात्रमहं तस्माज्ज्ञानादन्यत्करोमि किम् ?
किं त्यजानीह गृह्णीयाम् स्यां स्वस्मै स्वे सुखी स्व० ॥१६॥
संसारवाहिमूढेनासाम्यमभ्रान्तवेदिनः।
अलिप्तो हि सदा शान्तः स्यां स्वस्मै सुखी स्व० ॥१७॥
रागद्वेषौ हि संसारो भ्रमात्तत्रापयोजनात्।
शुद्धं शांतं विजानीयां स्यां स्वस्मै स्वे सुखी स्व० ॥ १८ ॥
अन्तर्बाह्यं जगत्सर्वं नश्वरं तत्र किं हितम् ?
कर्त्तव्यमितरद्व्यर्थं स्यां स्वस्मै स्वे सुखी स्वयम् ॥१९॥
स्वतन्त्रोऽहं परास्तेषां तंत्रो योगवियोगोः।
कथं हृष्याणि खिन्दानि स्यां स्वस्मै स्वे सुखी स्व० २० ॥
ज्ञानेन ज्ञानमात्रोऽहं मन्वाम्यन्यगुणानपि।
साक्षात्कर्तुः कुतः क्षोभः स्यां स्वस्मै स्वे सुखी स्वयम् ॥२१॥
ज्ञानस्य चेष्टयाऽचेष्टोऽचेष्टीभूतः कृतो स्वयम्।
अचेष्टनं द्वयो सारः स्यां स्वस्मै सुखी स्वयम्। २२ ॥

ध्यानैस्तुतौ च यात्रायां मनोवाक्काय खेदनम् ।
निर्विकल्पे कुतः खेदः ? स्यां स्वस्मै स्वे सुखी स्वयम् ॥२३॥
विरक्तो विषयद्वेषी रक्तोऽस्ति विषयस्पृहः ।
साक्षी रक्तो विरक्तो न स्यां स्वस्मै स्वे सुखी स्वयम् ॥२४॥
सुखं दुःखं स्तुतिं निन्दां कस्य कर्त्तुं हि कः क्षमः ?
किं श्रमं स्वच्युतेः कुर्याम् ? स्यां स्वस्मै स्वे सुखी स्वयम् ॥२५॥
सुखे दुःखे च को भेदो ? द्वयोराकुल्यवेदनम् ।
शान्ते ज्ञे स्वे रतो भूत्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥२६॥
नृस्त्र्यो रूपे कुरूपे वा को भेदोऽशुचिता समा ।
आकुल्यकारणं तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥२७॥
सम्पद्विपत्सु को भेदः ? क्षोभः जाड्यकरीषु वै ।
शांते ज्ञे स्वे रतो भूत्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥२८॥
सेवासेवे समे चेष्टे कषायस्याघपुण्ययोः ।
फले ज्ञप्तिस्तु तत्त्वं मे स्यां स्वस्मै स्वे सुखी स्वयम् ॥२९॥
सर्वेऽनन्तगुणोपेता न स्तुतौ पूर्णवर्णनम् ।
किं कं कथं स्तुत्यां तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥३०॥
प्रयोजनं न मे मत्तोऽन्यत्तत्सिद्धिर्न वान्यतः ।
किं कं कथं स्तुत्यां तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३१॥
तेषामौपाधिका भावा आसन् ये सन्ति निर्मलाः ।
किं कं कथं च निन्दानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥३२॥
नैर्मल्यं नान्यनिन्दातो, मालिन्यं शम्यमेव च ।
कि कं कथं च निन्दानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥३३॥

प्रशंसकेन दत्तं किं ? चोभं कृत्वा पलायितः ।
किं हितं तेन किं रोचै स्यां स्वस्मै स्वे सुखी स्वयम् ॥३४॥
निन्दकेन हृतं किं मे ? दोषमुक्त्वा स्थिरीकृतः ।
का क्षितिस्तेन किं रोचै स्यां स्वस्मै स्वे सुखी स्वयम् ॥३५॥
ज्ञप्तिक्रियस्य मे वृत्तौ निवृत्तौ चाग्रहः कुतः ?
यत्कर्तुमपि चायातु स्यां स्वस्मै स्वे सुखी स्वयम् ॥३६॥
मानाऽमानतां मोहे पर्यायस्य न चान्यथा ।
तद्विविक्तस्य न क्षोभः स्यां स्वस्मै स्वे सुखी स्वयम् ॥३७॥
परान् शिक्षे परैः शिष्ये मोहचेष्टैव नान्यतः ।
गुणोद्यन्येऽपि कल्पोऽतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥३८॥
स्वद्रव्यक्षेत्रभावानामाप्तौ भवति शुद्धता ।
नान्यभावविकल्पोऽस्तु स्यां स्वस्मै स्वे सुखी स्वयम् ॥३९॥
कर्म कर्महिताय स्याच्चेदहं स्वहित य हि ।
हितं नैर्मल्यभावोऽतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४०॥
ज्ञानी शत्रुः कुतो मित्रमज्ञः कस्य सुहृद्रिपुः ।
स्वपरस्थः सुहृच्छत्रुः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४१॥
स्वेकत्वस्याप्त्युपायो मे साम्यं नान्यत्कदापि हि ।
साम्यघातः परे बुद्धेः स्यां स्वस्मै स्वे सुखी स्वयम् ॥४२॥
साम्यं विशुद्धविज्ञाने साम्यं विवर्जितम् ।
साम्यं स्वास्थ्यं सुखागारः स्यां स्वस्मै स्वे सुखी स्व० ॥४३॥

मुनीन्द्रैरपि पूज्यं तत्साम्यं सर्वोत्तमं पदम् ।
साम्यं स्वस्य स्वयं रूपं स्यां स्वस्मै स्वे सुखी स्वयम् ॥४४॥
मानापमानयोः साम्यं कीर्त्यकीर्त्योः सुखासुखे ।
व्यग्रता पश्यतो न स्यात् स्यां स्वस्मै स्वे सुखी स्व० ॥४५॥
शंसा निन्दा विपत्सम्पत्स्वाकुलतैव केवलम् ।
नैर्द्वन्द्वयं ज्ञानमात्रेऽस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥४६॥
अन्यवृत्तेर्न मे बाधा, बाधा स्वस्य विकल्पतः ।
प्रज्ञयाऽनाश्रयीकृत्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥४७॥
स्वाख्येच्छांजाऽन्यनिन्दा स्यात्तस्मान्निन्द्यो हि निन्दकः ।
स्वं दृष्ट्वाऽनिन्दकाऽनिन्द्यं स्यां स्वस्मै स्वे सुखी स्व० ॥४८॥
सर्वे समाः समे मैत्री मैत्र्या शांतिर्मतेह च ।
सुखं साम्यं हि तत्स्वास्थ्ये स्यांस्वस्मै स्वे सुखी० ॥४९॥
इष्टे न हर्षभावश्चेदनिष्टे स्यान्न खेदता ।
रुन्ध्वेष्टेच्छां स्वबोधेन स्यां स्वस्मै स्वे सुखी स्वयम् ॥५०॥
आत्मरूपेऽन्ययोगो न वियोगस्य च का कथा ?
कथं दृष्याधि खिन्दानि स्यां स्वस्मै स्वे सुखी स्वयम् ।५१।
कल्पितेऽर्थेऽनुतर्केशं शमन्वर्थे च कल्पिते ।
स्वतस्त्रोऽर्थो हि सर्वोऽतः स्यां स्वस्मै स्वे सुखी स्व० ॥५२॥
द्वयसाम्यं रतौ मोहे तस्माज्ज्ञाय दूरूपिणाम् ।
जानन्मुक्त्वा रतिं मोहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥५३॥
यस्मिन्साम्ये विनष्टाः स्युराशाः साम्यं सदास्तु तत् ।
साम्येन सहजानन्दः स्यां स्वस्मै स्वे सुखी स्वयम् ॥५४॥

श्रद्धा वृत्तं श्रुत ज्ञानं मत्यं साम्यं भवेद्यदि ।
तदेव स्वसुखं स्वास्थ्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥५५॥

समाप्तोऽयं षष्ठी ऽध्याय:

कौ दृश्यं नश्वरं सर्वं दुःखमूलं पृथक् हि तत् ।
निन्द्यं हेयमदस्तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥१॥

न कोऽपि शरणं भूतो न च कश्चिद्भविष्यति ।
शरणस्य भ्रमं हत्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥२॥

न भूतो न भविष्यामि कस्यचिच्छरणं कदा ।
कर्तृत्ववारुणीं क्षिप्त्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥३॥

बन्धुर्मित्रं सुतो दारा भृत्य: शिष्य: प्रशंसक: ।
गम्यो येन हितं शक्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥४॥

मृत्यौ सत्यां न यास्यन्ति केऽपि ये रागदर्शिन:
केभ्य: कुर्यामसद्ध्यानं स्यां स्वस्मै स्वे सुखी स्वयम् ॥५॥

यथात्रत्यस्य नार्थाः प्रागन्यत्रेमे न केऽपि मे ।
क्व हितं क्व सुखं मृज्यां ? स्यां स्वस्मै सुखी स्वयम् ॥६॥

आस्तां दूरे पुरे वास: संगो दूरे जनैषिणाम् ।
दूरे प्रशंसका: सन्तु स्यां स्वस्मै स्वे सुखी स्वयम् ॥७॥

सुखं सत्वं हितं तत्र तेभ्य: किञ्चिन्न वर्तते ।
न च वत्स्यामि तत्राहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥८॥

दुःख सुखं विपत्सम्पत् कल्पनामात्रमेव तत् ।
किं मिथ्या खेददं कल्पे स्यां स्वस्मै स्वे सुखी स्वयम् ॥९॥

पराधीनं सुखाभावं परक्रोधां कृतिं मुधा ।
लब्धु' क्लिश्नानि किं ? स्वस्थः स्यां स्वस्मै स्वे सुखी० ॥१०॥
च्च्युतेर्हेतवो भोगा अशान्तिर्भोगवेदनम् ।
चेष्टे किमेतदर्थं ज्ञः स्यां स्वस्मै स्वे सुखी स्वयम् ॥११॥
स्वय भिन्ने च किं हेयं भिन्ने काऽऽदेयता मम ।
अतर्क्यो ज्ञानमात्रोऽहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥१२॥
किञ्चिदिष्टमनिष्ट' न कल्पना क्लेशदा भ्रमे ।
नाहमज्ञानरूपोतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१३॥

इति त्रयोदशमाह्निकम् ।

भोगभ्रमेण दुखानि भ्रान्त्या भुक्त्वा हतं जगत् ।
आयापायेऽपि तापोऽतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१४॥
व्रतेऽप्यहंत्वमज्ञत्वं सयोगी ज्ञो न दुःखभाक् ।
प्रीतिर्मे नास्तु कस्मिंश्चित्स्यां स्वस्मै स्वे सुखी स्वयम् ॥१५॥
कातरो लोकदृष्ट्च स्मि स्यां लोका न सहाटिनः ।
मोहस्वप्नमिदं दृश्यं स्यां स्वस्मै स्वे सुखी स्वयम् ॥१६॥
स्ववाह्ये न हितं किञ्चित् किं कल्पै शृणवानि किं ?
जानानि किञ्च पश्यानि ? स्यां स्वस्मै स्वे सुखी स्वयम् ॥१७॥
देहोऽस्तु वा न को लाभः ? का हानिर्मे तु शान्तिदा ?
ज्ञानदृष्टिः सदा भूयात्, स्यां स्वस्मै स्वे सुखी स्वयम् ॥१८॥
न मे द्वन्द्वो न मे संगः सर्वकृत्यं हि मत्पृथक् ।
कस्मै स्यामाकुलोऽद्वैतः स्यां स्वस्मै स्वे सुखी स्वयम् ॥१९॥

सर्वसारमिदं कार्यं निवृत्तिः सर्वकार्यतः ।
ततो विस्मृत्य सर्वाणि स्यां स्वस्मै स्वे सुखी स्वयम् ॥२०॥
पुण्यार्थभोगसम्बन्धाः सन्त्यनर्थपरम्पराः ।
एषु कृत्यं हितं किं मे स्यां स्वस्मै स्वे सुखी स्वयम् ॥२१॥
जीवनं मरणं किं को लोकः का चास्ति लीनता ?
मायारूपाणि सर्वाणि स्यां स्वस्मै स्वे सुखी स्वयम् ॥२२॥
सर्वचिन्ताकथाचेष्टाभिरलं तासु नो हितम् ।
यतो निष्क्रियभावोऽहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥२३॥
चैतन्ये मयि नो देहो न प्राणा इन्द्रियाणि वा ।
रागादिरतान् कथं यानि स्यां स्वस्मै स्वे सुखी स्वयम् ॥२४॥
क्षेमंकरो ऽत्रभोगो न तत्राज्ञः सन् कथं रमे ।
क्षेमंकरः स्वयं स्वस्मै स्यां स्वस्मै स्वे सुखी स्वयम् ॥२५॥
दृश्यो रम्यो न विश्वास्यो ज्ञानमात्रमहं यतः ।
विश्वसानि रमै क्वाहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥२६॥
त्यागादाने परे भिन्ने किमौपाधिक एव हि ।
हेयोऽनाश्रित्य तं तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥२७॥
दृश्य जडमदृश्योऽन्यश्चेतनश्च तथा पृथक् ।
कस्मिन् रुष्याणि तुष्याणि स्यां स्वस्मै स्वे सुखी स्वयम् ॥२८॥
वृक्षे खगा इवायांति क्षणं यान्ति स्वकर्मतः ।
विश्वास्यं मे किमत्रातः स्यां स्वस्मै स्वे सुखी स्वयम् ॥२९॥
एकान्तेऽस्तु निवासो मे सर्वविस्मरणं भवेत् ।
संयोगेन न मे लाभः स्यां स्वस्मै स्वे सुखी स्वयम् ॥३०॥

भोगाः भुक्ता मुहुस्त्यक्तास्तानुच्छिष्टान् किमर्थये ।
ज्ञानमात्रं हि भुञ्जानः स्यां स्वस्मै स्वे सुखी स्वयम् ॥३१॥
भुक्त्वा त्यजानि भावोऽयं सद्भावो निवृत्तिस्तदा ।
भावयेयं निवृत्याहं स्यां स्वस्मै स्वे सुखी स्वयम् ॥३२॥
निरायुरेवये हेतोः कालस्येच्छा हि तृष्णया ।
तृष्णा स्वनाशिनीं भुक्त्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥३३॥
परान् पश्यामि व्यापन्नान् तथा पश्यानि स्वं यदि ।
दोषमुक्तः स्वलक्ष्यः सन् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३४॥
स्वोपादानेन जायन्तेऽर्था जायन्तां न वा ततः ।
हितं नैव निज दृष्ट्वा स्यां स्वस्मै स्वे सुखी स्वयम् ॥३५॥
आसमस्मि भविष्यामि सुखे दुःखेऽहमेकः ।
परयोगे न लाभो मे स्यां स्वस्मै स्वे सुखी स्वयम् ॥३६॥
खेदेन विषये वृत्तिर्वृत्तौ पश्चाच्च खेदता ।
भोगः खेदमयस्तस्मात् स्यां स्वस्मै स्वे सुखी स्वयम् ॥३७॥
शंसका: मां न पश्यन्ति पश्यन्तो व्यक्त्यलक्ष्यकाः ।
कौ का निष्ठा निजास्थास्था स्यां स्वस्मै स्वे सुखी स्वयम् ॥३८॥
भिन्नपूतितनोरास्था स्वं किं लाभयते ततः ।
कौ का निष्ठा निजास्थास्था स्यां स्वस्मै स्वे सुखी० ॥३९॥
नामाक्षरैर्न सम्बन्धो ह्यात्मनः किं तदाख्यया ।
कौ का निष्ठा निजास्थास्था स्यां स्वस्मै स्वे सुखी० ॥४०॥
न किमेऽदशारूपोऽनायनन्तस्तदा रुचिः ।
कास्तु मेलोकनिक्षेपे स्यां स्वस्मै स्वे सुखी स्वयम् ॥४१॥

रागवह्नीन्धनं दृष्यं किं संचित्येन्धनं स्वयम् ।
शीतलोऽपि पतान्यग्नौ स्यां स्वस्मै स्वे सुखी स्वयम् ॥ ४२॥
मृत्यैके ह्युद्यताः मृत्युरायात्याकस्मिकं ततः ।
सन्दिग्धायुषि सद्दृष्ट्या स्यां स्वस्मै स्वे सुखी स्वयम् ॥४३॥
ज्ञातुं कथं श्रमं कुर्यां ज्ञेया भान्ति स्वयं ततः ।
सर्वश्रमं परित्यज्य स्यां स्वस्मै स्वे सुखी स्वयम् ॥४४॥
न भोगो भोक्तुमायाति सन् बुद्धिस्थोऽघकारणम् ।
किं तं बुद्धिगतं कुर्यां स्यां स्वस्मै स्वे सुखी स्वयम् ॥४५॥
कल्पनया यया प्राप्तोऽकल्प्यः सापि न मे यदा ।
कोऽन्यो भव्यः पुनस्तस्मात्स्यां स्वस्मै स्वे सुखी स्वयम् ॥४६॥

समाप्तोऽयं सप्तमोऽध्यायः ।

आर्या

बौन्देलदुमदुमापुर्वासि श्रीमद्गुलाबचन्द्रस्य
श्रीतुलसायास्तनयेन श्रीमद्गणेशशिष्येण
सहजानन्देन मनोहरेण सद्वविंशशततमे ब्यब्दे
शुक्ले पौषे रचिता श्री सहजानन्दगीतेयम ॥ युग्मम् ॥
स्वस्ति श्री श्रीमतोऽध्यात्मसुधासिन्धोर्महात्मनः ।
न्यायाचार्यस्य सार्वस्य विष्ट्याख्यातवर्णिनः ॥१॥
श्रीगणेशप्रसादस्य प्रसादेनानुशिक्षितः ।
श्रद्धानतः समामारी दीक्षितो लोचनीकृतः ॥२॥
ज्ञातस्वः सहजानन्दः शिष्यो वर्णी मनोहरः ।
संसारच्छेदसन्द्रष्टा कृतज्ञोऽहं पदावलिम् ॥३॥

शिक्षादीक्षागुरोर्वाल्पगुरोश्चर्याप्रवर्तिनः,
श्रद्धेयपुण्यसेवायामर्पयामि महादरम् ॥४॥
अर्पणस्य प्रसादेन स्वस्मै स्वे स्वयं स्वतः।
अर्पयित्वा स्थिरीकृत्य स्यां स्वस्मै स्वे सुखी स्वयम ॥५॥
कुलकम् ॥

इति सहजानन्दगीता समाप्ता।

—: ० :—

३० सिद्ध भक्तिः

स्रग्धरा छंदः।

परापरसिद्धि परमेष्ठिनः सिद्धानित्यादिना स्तौति—

सिद्धानुद्धूतकर्मप्रकृतिसमुदयान्साधितात्मस्वभावान्
वंदे सिद्धिप्रसिद्धयै तदनुपमगुणप्रग्रहाकृष्टितुष्टः।
सिद्धिः स्वात्मोपलब्धिः प्रगुणगुणगणोच्छादिदोषापहारा-
द्योग्योपादानयुक्त्या दृषद इह यथा हेमभावोपलब्धिः॥१॥
नाभावः सिद्धिरिष्टा न निजगुणहतिस्तत्तपोभिर्न युक्ते-
रस्त्यात्मानादिबद्धः स्वकृतजफलभुक् तत्क्षयान्मोक्षभागी।
ज्ञाता द्रष्टा स्वदेहप्रमितिरुपसमाहारविस्तारधर्मा
ध्रौव्योत्पत्तिव्ययात्मा स्वगुणयुत इतो नान्यथा साध्यसिद्धिः॥२॥
स त्वन्तर्बाह्यहेतुप्रभवविमलसद्दर्शनज्ञानचर्या--
संपद्धेतिप्रघातक्षतदुरिततया व्यञ्जिताचिन्त्यसारैः।
कैवल्यज्ञानदृष्टिप्रवरसुखमहावीर्यसम्यक्त्वलब्धि--
ज्योतिर्वातायनादिस्थिरपरमगुणैरद्भुतैर्भासमानः॥३॥

ज्ञानन्दश्चन्समस्तं समममनुपरतं सम्प्रतृप्त्यन्वितन्वन् ।
धुन्वन्ध्वान्तं नितांतं निचितमनुपमं प्रीणयन्नीशभावम् ।
कुर्वन्सर्वप्रजानामपरमभिभवन् ज्योतिरात्मानमात्मा
आत्मन्येवात्मनासौ क्षणमुपजनयन्सत्स्वयम्भूः प्रवृत्तः ॥ ४ ॥
छिंदन्शेषानशेषान्निगलबलकलींस्तैरनंतस्वभावैः ।
सूक्ष्मत्वाग्र्यावगाहागुरुलघुकगुणैः क्षायिकैः शोभमानः ।
अन्यैश्चान्यव्यपोहप्रवणविषयसम्प्राप्तिलब्धिप्रभावै-
रूर्ध्वं व्रज्यास्वभावात्समयमुपगतो धाम्नि सन्तिष्ठतेऽग्र्ये ॥५॥
अन्याकाराप्तिहेतुर्न च भवति परो येन तेनाल्पहीनः ।
प्रागात्मोपात्तदेहप्रतिकृतिरुचिराकार एव ह्यमूर्तिः ।
क्षुत्तृष्णाश्वासकासज्वरमरणजरानिष्टयोगप्रमोह--
व्यापत्त्याद्युग्रदुःखप्रभवभवहतेः कोस्य सौख्यस्य माता ॥ ६ ॥

किंविशिष्टं तत्सौख्यमित्याह--

आत्मोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालं
वृद्धिह्रासव्यपेतं विषयविरहितं निष्प्रतिद्वन्द्वभावम् ।
अन्यद्रव्यानपेक्षं निरुपममभितं शाश्वतं सर्वकालं ।
उत्कृष्टानंतसारं परमसुखमतस्तस्य सिद्धस्य जातम् ॥ ७ ॥
नार्थः क्षुत्तृड्विनाशाद्विविधरसयुतैरन्नपानैरशुच्या-
नास्पृष्टेर्गन्धमाल्यैर्न हि मृदुशयनैर्ग्लानिनिद्राद्यभावात् ।
आतंकार्तेरभावे तदुपशमनसद्भेषजानर्थतावद् ।
दीपानर्थक्यवद्वा व्यपगततिमिरे दृश्यमाने समस्ते ॥ ८ ॥
तादृक्सम्पत्समेता विविधनयतपः संयमज्ञानदृष्टि--

चर्यासिद्धाः समन्तात्प्र विततयशसो विश्वदेवाधिदेवाः ।
भूता भव्या भवंतः सकलजगति ये स्तूयमाना विशिष्टै--
स्तान्सर्वान्नौम्यनंतान्निजिगमिषुररं तत्स्वरूपं त्रिसन्ध्यम् ॥६॥

अंचलिका प्राकृतसिद्धभक्तिवत्

३१ प्राकृत-सिद्धभक्तिः ।

अट्ठविहकम्ममुक्के अट्ठगुणड्ढे अणोवमे सिद्धे ।
अट्ठमपुढविणिविट्ठे णिट्ठियकज्जे य वंदिमो णिच्चं ॥१॥
तित्थयरेदरसिद्धे जलथलआयासणिव्वुदे सिद्धे ।
अन्तयडेदरसिद्धे उक्कस्सजहण्णमज्झिमोगाहे ॥ २ ॥
उड्ढमहतिरियलोए छव्विहकाले य णिव्वुदे सिद्धे ।
उवसग्गणिरुवसग्गे दीवोदहिणिव्वुदे य वंदामि ॥ ३ ॥
पच्छायडेय सिद्धे दुगतिगचदुणाणपंचचदुरजमे ।
परिवडिदापरिवडिदे संजमसम्मत्तणाणमादीहिं ॥ ४ ॥
साहरणासाहरणे सम्मुग्घादेदरे य णिव्वादे ।
ठिदपलियंकणिसण्णे विगयमले परमणाणगे वंदे ॥५॥
पुंवेदं वेदंता जे पुरिसा खवगसेढिमारूढा ।
सेसोदयेण वि तहा ज्झाणुवजुत्ता य ते दु सिज्झंति ॥ ६ ॥
पत्तेयसयंबुद्धा बोहियबुद्धा य होंति ते सिद्धा ।
पत्तेयं पत्तेयं समये समयं पणिवदामि सदा ॥ ७ ॥
पणणवदुअट्ठवीसाचउतियणवदी य दोण्णि पंचेव ।
बावण्णहीणबियसयपयडिविणासेण होंति ते सिद्धा ॥ ८ ॥

अइसयमव्वाबाहं सोक्खमणंतं अणोवमं परमं।
इंदियविसय.तीदं अप्पत्तं अच्चवं च ते पत्ता ॥ ६ ॥
लोयग्गमत्थयत्था चरमशरीरेण ते हु किंचूणा।
गयसित्थमूसगब्भे जारिसआयार तारिसायारा ॥ १० ॥
जरमरणजम्मरहिया ते सिद्धा मम सुभत्तिजुत्तस्स,
देंतु वरणाणलाहं बुहयणपरिपत्थणं परमसुद्धं ॥ ११ ॥
किच्चा काउस्सग्गं चउरट्ठयदोसविरहियं सुपरिसुद्धं।
अइभत्तिसंपउत्तो जो वंदइ लहु लहइ परमसुहं ॥ १२ ॥

इच्छामि भंते सिद्धभत्तिकाउस्काउसग्गो कओ तस्सालोचेउं, सम्मणाणसम्मदंसणसम्मचारित्तजुत्ताणं, अट्ठविहकम्मविप्पमुक्काणं अट्ठगुणसंपण्णाणं, उड्ढलोयमत्थयम्मि पयट्ठियाणं, तवसिद्धाणं णयसिद्धाणंसंजमसिद्धाणं, अतीताणागदवट्टमाणकालत्तयसिद्धाणं सव्वसिद्धाणं णिच्चकालं अंचेमि, पूजेमि, वंदामि, णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं।

लघुभक्तयः

३२ लघुसिद्धभक्तिः

(१)

संसारचक्रगमनागतिविप्रमुक्ता–
नित्यं जरामरणजन्मविकारहीनान्।

देवेन्द्रदानवगणैरभिपूज्यमानान् ।
सिद्धांस्त्रिलोकमहितान् शरणं प्रपद्ये ॥१॥

असरीरा जीवघणा उवजुत्ता दंसणे य णाणे य ।
सायारमणायारा लक्खणमेयं तु सिद्धाणं ।' २ ।

मूलुत्तरपयडीणं बंधोदयसत्तकम्मउम्मुक्का ।
मंगलभूदा सिद्धा अट्ठगुणातीदसंसारा ॥ ३ ॥

अट्ठविहकम्मवियडा सीदीभूदा णिरंजणा णिच्चा ।
अट्ठगुणा किदकिच्चा लोयग्गणिवासिणो सिद्धा ।। ४ ।।

सिद्धा णट्ठट्ठमला विसुद्धबुद्धीय लद्धसब्भावा ।
तिहुवणसिरसेहरया पसियंतु भडारया सव्वे ।। ५ ।।

गमणागमणविमुक्के विहडियकम्मट्ठपयडिसंघाए ।
सासहसुहसंपत्ते ते सिद्धे वंदिमो णिच्चं ।। ६ ।।

जय मंगलभूदाणं विमलाणं णाणदंसणमयाणं ।
तइलोयसेहराणं णमो सया सव्वसिद्धाणं ।। ७ ।।

सम्मत्त णाण–दंसण-वीरिय-सुहुमं तहेव अवगहणं ।
अगुरुलहुअव्वावाहं अट्ठगुणा होंति सिद्धाणं ।। ८ ।।

तवसिद्धे णयसिद्धे संजमसिद्धे चरित्तसिद्धे य ।
णाणम्मि दंसणम्मि य सिद्धे सिरसा णमंसामि ।। ९ ।।

(अंचलिका प्राकृतसिद्धभक्तिवत्)

---

३३ श्रुतभक्तिः

इदानीं सिद्धांस्तुत्वा श्रुतं स्तुवन् स्तोष्ये इत्याद्याह ।

स्तोष्ये संज्ञानानि परोक्षप्रत्यक्षभेदभिन्नानि ।
लोकालोकविलोकनलोलितसल्लोकलोचनानि सदा ॥ १ ॥
अभिमुखनियमितबोधनमाभिनिबोधिकमनिंद्रियेंद्रियजं ।
बह्वाद्यवग्रहादिककृतषट्त्रिंशत्त्रिशतभेदम् ॥ २ ॥
विविधर्द्धिबुद्धि कोष्ठस्फुटबीजपदानुसारिबुद्ध्यधिकं ।
संभिन्नश्रोतृतया सार्धं श्रुतभाजनं वन्दे ॥ ३ ॥
श्रुतमपि जिनवरविहितं गणधररचितं द्व्यनेकभेदस्थम् ।
अङ्गांगबाह्यभावितमनंतविषयं नमस्यामि ॥ ४ ॥
पर्यायाक्षरपदसंघातप्रतिपत्तिकानुयोगविधीन् ।
प्राभृतकप्राभृतकं प्राभृतकं वस्तुपूर्वं च ॥ ५ ॥
तेषां समासतोऽपि च विंशतिभेदान्समश्नुवानं तत् ।
वंदे द्वादशधोक्तं गंभीरवरशास्त्रपद्धत्या ॥६॥
आचारं सूत्रकृतं स्थानं समवायनामधेयं च ।
व्याख्याप्रज्ञप्तिं च ज्ञातृकथोपासकाध्ययने ॥७॥
वदे तकृद्दशमनुत्तरोपपादिकदशं दशावस्थम् ।
प्रश्नव्याकरणं हि विपाकसूत्रं च विनमामि ॥८॥
परिकर्म च सूत्रं च स्तौमि प्रथमानुयोगपूर्वगते ।
सार्द्धं चूलिकयापि च पंचविधं दृष्टिवादं च ॥९॥
पूर्वगतं तु चतुर्दशधोदितमुत्पादपूर्वमाद्यमहम् ।
आग्रायणीयमीडे पुरुवीर्यानुप्रवादं च ॥१०॥

संततमहमभिवंदे तथास्तिनास्तिप्रवादपूर्वं च ।
ज्ञानप्रवादसत्यप्रवादमात्मप्रवादं च ॥११॥
कर्मप्रवादमीडेऽथ प्रत्याख्याननामधेयं च ।
दशमं विद्याधारं पृथुविद्यानुप्रवाद च ॥१२॥
कल्याणनामधेयं प्राणावायं क्रियाविशाल च ,
अथ लोकबिंदुसारं वंदे लोकाग्रसारपदम् ॥१३॥
दश च चतुर्दश चाष्टावष्टादश च द्वयोर्द्विषट्कं च ।
षोडश च विंशतिं च त्रिशतमपि पंचदश च तथा ॥१४॥
वस्तूनि दश दशान्देष्वनुपूर्वं भाषितानि पूर्वाणाम् ।
प्रतिवस्तु प्राभृतकानि विंशतिं विंशतिं नौमि ॥ १५ ॥
पूर्वान्तं ह्यपरान्तं ध्रुवमध्रुवच्यवनलब्धिनामानि ।
अध्रुवसंप्रणिधिं चाप्यर्थं भौमावयाद्यं च ॥ १६ ॥
सर्वार्थकल्पनीयं ज्ञानमतीतं त्वनागतं कालं ।
सिद्धिमुपाध्यं च तथा चतुर्दशवस्तूनि द्वितीयस्य ॥१७॥
पचमवस्तुचतुर्थप्राभृतकस्यानुयोगनामानि ।
कृतिवेदने तथैव स्पर्शनकर्म प्रकृतिमेव ॥ १८ ॥
बंधननिबंधनप्रक्रमानुपक्रममथाभ्युदयमोक्षौ ।
संक्रमलेश्ये च तथा लेश्यायाः कर्मपरिणामौ ॥ १९ ॥
सातमसातं दीर्घं ह्रस्वं भवधारणीयसंज्ञं च ।
पुरुपुद्गलात्मनाम च निधत्तमनिधत्तमभिनौमि ॥ २० ॥
सनिकाचितमनिकाचितमथ कर्मस्थितिकपश्चिमस्कंधौ ।
अल्पबहुत्वं च यजे तद्द्वाराणां चतुर्विंशम् ॥२१॥

कोटीनां द्वादशशतमष्टापंचाशतं सहस्राणाम् ।
लक्षत्र्यशीतिमेव च पंच च वंदे श्रुतपदानि ।।२२।।
षोडशशतं चतुस्त्रिंशत्कोटीनां त्र्यशीतिलक्षाणि ।
शतसंख्याष्टासप्ततिमष्टाशीतिं च पदवर्णान् ।।२३।।
सामयिकं चतुर्विंशतिस्तवं वंदना प्रतिक्रमणं ।
वैनयिकं कृतिकर्म च पृथुदशवैकालिकं च तथा ।।२४।।
वरमुत्तराध्ययनमपि कल्पव्यवहारमेवमभिवंदे ।
कल्पाकल्पं स्तौमि महाकल्पं पुण्डरीकं च ।। २५ ।।
परिपाट्या प्रणिपतितोऽस्म्यहं महापुण्डरीकनामैव ।
निपुणान्यशीतिकं च प्रकीर्णकान्यंगबाह्यानि ।। २६ ।।
पुद्गलमर्यादोक्तं प्रत्यक्षं सप्रभेदमवधिं च ।
देशावधिपरमावधिसर्वावधिभेदमभिवंदे ।। २७ ।।
परमनसि स्थितमर्थं मनसा परिविद्य मंत्रिमहितगुणम् ।
ऋजुविपुलमतिविकल्पं स्तौमि मनःपर्ययज्ञानम् ।। २८ ।।
क्षायिकमनन्तमेकं त्रिकालसर्वार्थयुगपदवभासम् ।
सकलसुखधाम सततं वंदेऽहं केवलज्ञानम् ।। २९ ।।
एवमभिष्टुवतो मे ज्ञानानि समस्तलोकचक्षूंषि ।
लघु भवताज्ज्ञानर्द्धि ज्ञानफलं सौख्यमच्यवनम् ।।३०।।

अंचलिका प्राकृतम् सभक्तिवत्

३४ प्राकृत श्रुतभक्तिः ।

सिद्धवरसासणाणं सिद्धाणं कम्मचक्कमुक्काणं ।
काऊण णमुक्कारं भत्तीए णमामि अंगाइं ॥१॥
आयारं सुद्दयडं ठाणं समवाय विहायपण्णत्ती ।
णाणाधम्मकहाओ उवासयाणं च अज्झयणं ॥२॥
वंदे अंतयडदसं अणुत्तरदसं च पण्हवायरणं ।
एयारसमं च तहा विवायसुत्तं णमंसामि ॥ ३ ॥
परियम्मसुत्त पढमाणुओयपुव्वगयचूलिया चेव ।
पवरवरदिट्ठिवादं तं पंचविहं पणिवदामि ॥ ४ ॥
उप्पायपुव्वमग्गायणीय वीरियत्थिणत्थि [य पवादं ।
णाणासच्चपवादं आदाकम्मप्पवादं च ॥ ५ ॥
पच्चक्खाणं विज्जाणुवाय कल्लाणणामवरपुव्वं ।
पाणावायं किरियाविसालमथलोयबिंदुसारसुदं ॥ ६ ॥
दस चउदस अट्ठ ट्ठारस बारस तह य दोसु पुव्वेसु ।
सोलस वीसं तीसं दसमम्मिय पण्णरसवत्थू ॥ ७ ॥
एदेसिं पुव्वाणं जावदियो वत्थुसंगहो भणियो ।
सेसाणं पुव्वाणं दसदसवत्थू पणिवंदामि ॥ ८ ॥
एक्केक्कम्मि य वत्थू वीसं वीसं पाहुडा भणिया ।
विसमसमा वि य वत्थू सव्वे पुण पाहुडेहिं समा ॥६॥
पुव्वाणं वत्थुसयं पंचाणवदी हवंति वत्थूओ ।
पाहुड तिण्णि सहस्सा णवयसया चउदसाणं पि ॥ १० ॥

एवमए सुदपवरा भत्तीराये‌ण संथुया तच्चा।
सिग्घं मे सुदलाहं जिणवरवसहा पयच्छंतु ॥११॥

इच्छामि भंते ! सुदभत्तिकाउस्सग्गो कओ तस्स आलोचेउ अंगोवंगपइण्णए पाहुडयपरियम्मसुत्तपढमा णिओगपुव्वगयचूलिया चेव सुत्तत्थयथुइ धम्मकहाइयं णिच्चकालं अंचेमि, पूजेमि, वंदामि णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो सुगइगमणं, समाहिमरणं जिणगुणसंपत्ति होउ मज्झं।

---

३५ लघुश्रुतभक्तिः

अर्हद्वक्त्रप्रसूतं गणधररचितं द्वादशांगं विशालं
चित्रं बह्वर्थयुक्तं मुनिगणवृषभैर्धारितं बुद्धिमद्भिः।
मोक्षाग्रद्वारभूतं व्रतचरणफलं ज्ञेयभावप्रदीपं
भक्त्या नित्यं प्रवन्दे श्रुतमहमखिलं सर्वलोकैकसारम् ।।१।।

जिनेन्द्रवक्त्रप्रतिनिर्गतं वचो यतीन्द्रभूतिप्रमुखैर्गणाधिपैः।
श्रुतं धृतं तैश्च पुनः प्रकाशितं द्विषट्प्रकारं प्रणमाम्यहं श्रुतम् ॥२॥

कोटीशतं द्वादश चैव कोट्यो लक्षाण्यशीतिस्त्र्यधिकानि चैव।
पंचाशदष्टौ च सहस्रसंख्यमेतच्छ्रुतं पंचपदं नमामि ॥३॥

अरहन्तभासियत्थं गणधरदेवेहिं गंथियं सम्मं।
पणमामि भत्तिजुत्तो सुदणाणमहोवहिं सिरसा ॥४॥

(अंचलिका प्राकृत श्रुतभक्तिवत्)

३६ चारित्रभक्तिः

श्रुतं स्तुत्वा पंचधाचारं स्तुवन् येनेन्द्रानित्याद्याह–

येनेन्द्रान्भुवनत्रयस्य विलसत्केयूरहारांगदान्
भास्वन्मौलिमणिप्रभाप्रविसरोत्तुंगोत्तुमाङ्गान्नतान् ।
स्वेषां पादपयोरुहेषु मुनयश्चक्रुः प्रकामं सदा
वन्दे पंचतयं तमद्य निगदन्नाचारमभ्यर्चितम् ॥१॥

अर्थव्यंजनतद्द्वयाविकलताकालोपधाप्रश्रयाः
स्वाचार्याद्यनपह्नवो बहुमतिश्चेत्यष्टधा व्याहृतम् ।
श्रीमज्ज्ञातिकुलेन्दुना भगवता तीर्थस्य कर्त्राऽञ्जसा
ज्ञानाचारमहं त्रिधा प्रणिपताम्युद्धृतये कर्मणाम् ॥२॥

शंकादृष्टिविमोहकांक्षणविधिव्यावृत्तिसन्नद्धतां
वात्सल्यं विचिकित्सनादुपरतिं धर्मोपबृंहक्रियाम् ।
शक्त्या शासनदीपनं हितपथाद्भ्रष्टस्य संस्थापनं
वंदे दर्शनगोचरं सुचरितं मूर्ध्ना नमन्नादरात् ॥३॥

एकान्ते शयनोपवेशनकृतिः संतापनं तानवं ।
संख्यावृत्तिनिबन्धनामनशनं विष्वाणमर्द्धोदरम् ।
त्यागं चेन्द्रियदन्तिनो मदयतः स्वादो रसस्यानिशं ।
षोढा बाह्यमहं स्तुवे शिवगतिप्राप्त्यभ्युपायं तपः ॥४॥

स्वाध्यायः शुभकर्मणश्च्युतवतः संप्रत्यवस्थापनं ।
ध्यानं व्यापृतिरामयाविनि गुरौ वृद्धे च बाले यतौ ।
कायोत्सर्जनसत्क्रिया विनय इत्येवं तपः षड्विधं ।
वदेऽभ्यंतरमन्तरंगबलवद्विद्वेषिविध्वंसनम् ॥ ५ ॥

सम्यग्ज्ञानविलोचनस्य दधतः श्रद्धानमर्हन्मते ।
वीर्यस्याविनिगूहनेन तपसि स्वस्य प्रयत्नाद्यतेः ।
या वृत्तिस्तरणीव नौरविवरा लघ्वी भवोदन्वतो ।
वीर्याचारमहं तमूर्जितगुणं वंदे सतामर्चितम् ॥ ६ ॥
तिस्रः सत्तमगुप्तयस्तनुमनोभाषानिमित्तोदयाः ।
पञ्चेर्यादिसमाश्रयाः समितयः पंचव्रतानीत्यपि ।
चारित्रोपहितं त्रयोदशतयं पूर्वं न दृष्टं परै--
राचारं परमेष्ठिनो जिनपतेर्वीरं नमामो वयम् ॥ ७ ॥
आचारं सहपंचभेदमुदितं तीर्थं परं मंगलम् ।
निर्ग्रन्थानपि सच्चरित्रमहतो वंदे समग्रान्यतीन् ।
आत्माधीनसुखोदयामनुपमां लक्ष्मीमविध्वंसनी--
मिच्छन्केवलदर्शनावगमनप्राज्यप्रकाशोज्ज्वलाम् ॥ ८ ॥
अज्ञानाद्यदवीवृतं नियमिनोऽवर्तिष्यहं चान्यथा ।
तस्मिन्नर्जितमस्यति प्रतिनवं चैनो निराकुर्वति ।
वृत्ते सप्ततयीं निधिं सुतपसामृद्धिं नयत्यद्भुतं ।
तन्मिथ्या गुरु दुष्कृतं भवतु मे स्वं निंदतो निंदितम् ॥ ९ ॥
संसारव्यसनाहतिप्रचलिता नित्योदयप्रार्थिनः ।
प्रत्यासन्नविमुक्तयः सुमतयः शांतैनसः प्राणिनः ।
मोक्षस्यैव कृतं विशालमतुलं सोपानमुच्चैस्तरा-
मारोहन्तु चरित्रमुत्तममिदं जैनेन्द्रमोजस्विनः ॥ १० ॥

अंचलिका प्राकृतचारित्रभक्तिवत्

३७ प्राकृत-चारित्रभक्तिः।

तिलोए सव्वजीवाणं हिदं धम्मोवदेसिणं।
वड्ढमाणं महावीरं वंदित्ता सव्ववेदिणं ॥ १ ॥
घादिकम्मविघादत्थं घादिकम्मविणासिणा।
भासियं भव्वजीवाणं चारित्तं पंचभेददो ॥ २ ॥
सामाइयं तु चारित्तं छेदोवट्ठावणं तहा।
तं परिहारविसुद्धिं च संजमं सुहुमं पुणो ॥ ३ ॥
जहाखादं तु चारित्तं तहाखादं तु तं पुणो।
किच्चाहं पंचहाचारं मंगलं मलसोहणं ॥ ४ ॥
अहिंसादीणि उत्ताणि महव्वयाणि पंच य।
समिदीओ तदो पंच पंचइन्दियणिग्गहो ॥ ५ ॥
छब्भेयावास भूसिज्जा अण्हाणत्तमचेलदा।
लोयत्तं ठिदिभुत्तिं च अदंतधावणमेव य ॥ ६ ॥
एयभत्तेण संजुत्ता रिसिमूलगुणा तहा।
दसधम्मा तिगुत्तीओ सीलाणि सयलाणि च ॥ ७ ॥
सव्वेवि य परीसहा उत्तुत्तरगुणा तहा।
अण्णे वि भासिया सन्ता तेसिं हाणिं मए कया ॥ ८ ॥
जइ राएण दोसेण मोहेणणादरेण वा।
वंदित्ता सव्वसिद्धाणं संजदा सा मुमुक्खुणा ॥ ९ ॥
संजदेण मए सम्मं सव्वसंजमभाविणा।
सव्वसंजमसिद्धीओ लब्भदे मुत्तिजं सुहं ॥१०॥

इच्छामि भंते ! चारित्तभत्तिकाउस्सग्गो कओ तस्सालोचेउं, सम्मणाणुज्जोयस्स, सम्मत्ताहिट्ठियस्स,सव्वपहाणस्स, णिव्वाणमग्गस्स कम्मणिज्जरफलस्स, खमाहारस्स, पंचमहव्वयसंपुण्णस्स,तिगुत्तिगुत्तस्स पंचसमिदिजुत्तस्स, णाणज्झाणसाहणस्स समयाइवपवेसयस्स, सम्मचारित्तस्स, णिच्चकालं, अंचेमि,पूजेमि, वंदामि णमंसामि, दुक्खक्खओ, कम्मक्खओ, वोहिलाहो, सुगइगमणं, समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं।

---

३८ लघुचारित्रभक्तिः।

(३)

व्रतसमुदयमूलः संयमस्कन्धबन्धो
यमनियमपयोभिर्वर्धितः शीलशाखः।
समितिकलिकभारो गुप्तिगुप्तप्रवालो
गुणकुसुमसुगन्धि सत्तपश्चित्रपत्रः॥१॥
शिवसुखफलदायी यो दयाछाययोघः
शुभजनपथिकानां खेदनोदे समर्थः।
दुरितरविजतापं प्रापयन्नन्तभावं
स भवविभवहान्यै नोऽस्तु चारित्रवृक्षः॥२॥
चारित्रं सर्वजिनैश्चरितं प्रोक्तं च सर्वशिष्येभ्यः।
प्रणमामि पंचभेदं पञ्चमचारित्रलाभाय॥३॥
धर्मः सर्वसुखाकरो हितकरो धर्मं बुधाश्चिन्वते
धर्मेणैव समाप्यते शिवसुखं धर्माय तस्मै नमः।

धर्मास्त्यपरः सुहृद्भवभृतां धर्मस्य मूलं दया
धर्मे चित्तमहं दधे प्रतिदिनं हे धर्म! मां पालय ॥४॥
धम्मो मंगलमुक्किट्ठं अहिंसा संजमो तओ।
देवावि तस्स पणमंति जस्स धम्मे सया मणो ॥५॥
अञ्चलिका प्राकृतचारित्रभक्तिवत्

३९-प्राकृत-योगिभक्तिः।

थोस्सामि गुणधराणं अणयाराणं गुणेहिं तच्चेहिं।
अञ्जलिमउलियहत्थो अभिवंदंतो सविभवेण ॥ १ ॥
सम्मं चेव य भावे मिच्छाभावे तहेव बोधव्वा।
चइऊण मिच्छभावे सम्मम्मि उवट्ठिदे वंदे ॥ २ ।
दोदोसविप्पमुक्के तिदंडविरदे तिसल्लपरिसुद्धे।
तिण्णियगारवरहिए तियरणसुद्धे णमंसामि ॥ ३ ॥
चउविहकसायमहणे चउगइसंसारगमणभयभीए।
पञ्चासवपडिविरदे पंचिंदियणिज्जिदे वंदे ॥ ४ ॥
छज्जीवदयावण्णे छडायदणविवज्जिदे समिदभावे।
सत्तभयविप्पमुक्के सत्ताणभयंकरे वंदे ॥ ५ ॥
णट्ठट्ठमयट्ठाणे पणट्ठ कम्मट्ठणट्ठसंसारे।
परमट्ठणिट्ठियट्ठे अट्ठगुणड्ढीसरे वंदे ॥ ६ ॥
णवबंभचेरगुत्ते णवणयसब्भावजाणगे वंदे।
दहविहधम्मट्ठाई दसंजमसंजदे वंदे ॥ ७ ॥

एयारसंगसुदसायरपारगे बारसंगसुदखिउखे ।
बारसविहतवखिरदे तेरसकिरियादरे बन्दे ॥ ८ ॥
भूदेसु दयावएखे चउदस चउदससुगंथपरिसुद्धे ।
चउदसपुव्वपगब्भे चउदसमलवज्जिदे बन्दे ॥ ९ ॥
वंदे चउत्थभत्तादिजावछम्मासखवणपडिवएखे ।
वंदे आदावंते सूरस्स य अहिमुहट्ठिदे सूरे ॥ १० ॥
बहुविहपडिमट्ठाई खिसिज्जवीरासखेक्कवासी य ।
अखिट्ठीवकंडुवदीवे चत्तदेहे य वंदामि ॥ ११ ॥
ठाणी मोखवदीए अब्भोवासी य रुक्खमूली य ।
धुवकेसमसुलोमे खिप्पडियम्मे य वंदामि ॥ १२ ॥
जल्लमल्ललित्तगत्ते वंदे कम्ममलकलुसपरिसुद्धे ।
दीहणहमंसुलोमे तवसिरिभरिए खमंसामि ॥ १३ ॥
खाखोदयाहिसित्ते सीलगुखविहूसिए तवसुगंधे ।
ववगयरायसुदड्ढे सिवगइपहखायगे वंदे ॥ १४ ॥
उग्गतवे दित्तवे तत्तवे महातवे य घोरतवे ।
वंदामि तवमहंते तवसंजमइड्ढिसंजुत्ते ॥ १५ ॥
आमोसहिए खेलोसहिए जल्लोसहिए तवसिद्धे ।
विप्पोसहीए सव्वोसहीए वंदामि तिविहेख ॥ १६ ॥
अमयमहुखीरसप्पिसवीए अक्खिखमहाखसे वंदे ।
मखवचिवचवलिकायबलिखो य वंदामि तिविहेण ॥ १७ ॥
वरकुट्ठवीयबुद्धी पदाणुसारीय भिएखसोदारे ।
उग्गहईहसमत्थे सुत्तत्थविसारदे वंदे ॥ १८ ॥

आभिणिबोहियसुदओहिणाणिमणणाणिसव्वणाणीय ।
वंदे जगप्पदीवे पच्चक्खपरोक्खणाणी य ॥ १६ ॥
आयासतंतुजलसेढिचारणे जंघचारणे वंदे ।
विउवणइड्ढिपहाणे विज्जाहरपण्णसवणे य ॥२० ॥
गइचउरंगुलगमणे तहेव फलफुल्लचारणे वंदे ।
अणुवमतवमहंते देवासुरवंदिदे वंदे ॥ २१ ॥
जियभयजियउवसग्गे जियइंदियपरीसहे जियकसाए ।
जियरायदोसमोहे जियसुहदुक्खे णमंसामि ॥ २२ ॥
एवं मए भित्थुया अणयारा रायदोसपरिसुद्धा ।
संघस्स वरसमाहिं मज्झवि दुक्खक्खयं दिंतु ॥ २३ ॥

अंचलिका संस्कृतयोगिभक्तिवत्

—:०:—

४० संस्कृत-योगिभक्तिः

[२]

जातिजरोरुरोगमरणातुरशोकसहस्रदीपिता ।
दुःसहनरकपतनसन्त्रस्तधियः प्रतिबुद्धचेतसः ।
जीवितमंबुबिंदुचपलं तडिदभ्रसमा विभूतयः ।
सकलमिदं विचिन्त्य मुनयः प्रशमाय वनान्तमाश्रिताः ॥१॥
व्रतसमितिगुप्तिसंयुताः शिवसुखमाधाय मनसि वीतमोहाः ।
ध्यानाध्ययनवशंगता विशुद्धये कर्मणां तपश्चरन्ति ॥ २ ॥
दिनकरकिरणनिकरसंतप्तशिलानिचयेषु निःस्पृहा ।
मलपटलावलिप्ततनवः शिथिलीकृतकर्मबंधनाः ।

व्यपगतमदनदर्परतिदोषकषायविरक्तमत्सरा ।
गिरिशिखरेषु चंडकिरणाभिमुखस्थितयो दिगंबराः ॥३॥
सज्ज्ञानामृतपायिभिः क्षान्तिपयःसिच्यमानपुण्यकायैः ।
धृतसंतोषच्छत्रकैस्तापस्तीव्रोऽपि सह्यते मुनीन्द्रैः ॥ ४ ॥
शिखिगलकज्जलालिमलिनैर्विबुधाधिपचापचित्रितै—
र्भीमरवैर्विसृष्टचण्डाशनिशीतलवायुवृष्टिभिः ।
गगनतलं विलोक्य जलदैः स्थगितं सहसा तपोधनाः ।
पुनरपि तरुतलेषु विषमासु निशासु विशंकमासते ॥५॥
जलधाराशरताडिता न चलन्ति चरित्रतः सदा नृसिंहाः ।
संसारदुःखभीरवः परीषहारातिघातिनः प्रवीराः ॥६॥
अविरतबहलतुहिनकणवारिभिरंघ्रिपपत्रपातनै—
रनवरतमुक्तसात्काररवैः परुषैरथानिलैः शोषितगात्रयष्टयः ।
इह श्रमणा धृतिकंबलावृताः शिशिरनिशां ।
तुषारविषमां गमयन्ति चतुःपथे स्थिताः ॥ ७ ॥
इति योगत्रयधारिणः सकलतपःशालिनः प्रवृद्धपुण्यकायाः ।
परमानन्दसुखैषिणः समाधिमग्र्यं दिशंतु नो भदन्ताः ॥८ ॥

इच्छामि भंते ! योगिभत्तिकाउस्सग्गो कओ तस्सालोचेउं, अड्ढाइज्जदीवदोसमुद्देसु पण्णारसकम्मभूमिसु आदावणरुक्खमूल-अब्भोवासठाणमोणविरासणेक्कपासकुक्कुडासणचउत्थपक्खखवणादि योगजुत्ताणं सव्वसाहूणं णिच्चकालं अंचेमि पूजेमि वंदामि णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं ।

४१ लघुयोगिभक्तिः

प्रावृट्काले सविद्युत्प्रपतितसलिले वृक्षमूलाधिवासा
हेमन्ते रात्रिमध्ये प्रतिविगतभयाः काष्ठवत्त्यक्तदेहाः ।
ग्रीष्मे सूर्यांशुतप्ता गिरिशिखरगताः स्थानकूटान्तरस्था–
स्ते मे धर्मं प्रदद्युर्मुनिगणवृषभा मोक्षनिःश्रेणिभूताः ॥१
गिंमे गिरिसिहरत्था वरिसायाले रुक्खमूल रयणीसु ।
सिसिरे बाहिरसयणा ते साहू वंदिमो णिच्चं ॥२॥
गिरिकन्दरदुर्गेषु ये वसन्ति दिगम्बराः ।
पाणिपात्रपुटाहारास्ते यान्ति परमां गतिम् ॥३

(अंचलिका संस्कृतयोगिभक्तिवत्)

४२–आचार्यभक्तिः

(१)

सिद्धगुणस्तुतिनिरतानुद्धूतरुषाग्निजालबहुलविशेषान् ।
गुप्तिभिरभिसंपूर्णान्मुक्तियुतः सत्यवचनलक्षितभावान् ॥१॥
मुनिमाहात्म्यविशेषाञ्जिनशासनसत्प्रदीपभासुरमूर्तीन् ।
सिद्धिं प्रपित्सुमनसो बद्धरजोविपुलमूलघातनकुशलान् ॥२॥
गुणमणिविरचितवपुषः षड्द्रव्यविनिश्चितस्य धातॄन्सततम् ।
रहितप्रमादचर्यान्दर्शनशुद्धान्गणस्य संतुष्टिकरान् ॥३॥
मोहच्छिदुग्रतपसः प्रशस्तपरिशुद्धहृदयशोभनव्यवहारान् ।
प्रासुकनिलयाननघानाशाविध्वंसिचेतसो हतकुपथान् ॥४

धारित विलसन्मुण्डान्वर्जितबहुदंडपिंडमंडलनिकरान् ।
सकलपरीषहजयिनः क्रियाभिरनिशं प्रमादतः परिरहितान्॥५
अचलान्व्यपेतनिद्रान् स्थानयुतान्कष्टदुष्टलेश्याहीनान् ।
विधिनानाश्रितवासानलिप्तदेहान्विनिर्जितेंद्रियकरिणः ॥६॥
अतुलानुत्कुटिकासान्विविक्तचित्तानखंडितस्वाध्यायान् ।
दक्षिणभावसमग्रान्व्यपगतमदरागलोभशठमात्सर्यान् ॥७॥
भिन्नार्तरौद्रपक्षान्संभावितधर्मशुक्लनिर्मलहृदयान् ।
नित्यं पिनद्धकुगतीन्पुण्यान् गण्योदयान्विलीनगारवचर्यान्॥८
तरुमूलयोगयुक्तानवकाशातापयोगरागसनाथान् ।
बहुजनहितकरचर्यानभयाननघान्महानुभावविधानान् ॥९॥
ईदृशगुणसंपन्नान्युष्मान्भक्त्या विशालया स्थिरयोगान् ।
विधिनानारतमग्र्यान्मुकुलीकृतहस्तकमलशोभितशिरसा ।१०
अभिनौमि सकलकलुषप्रभवोदयजन्मजरामरणबंधनमुक्तान् ।
शिवमचलमनघमक्षयमव्याहतमुक्तिसौख्यमस्त्विति सततम्११

अंचलिका प्राकृताचार्यभक्तिवत्

४३ प्राकृताचार्यभक्तिः ।

[२]

देसकुलजाइसुद्धा विसुद्धमणवयणकायसंजुत्ता ।
तुम्हं पायपयोरुहमिह मंगलमत्थु मे णिच्च ॥ १ ॥
देशकुलजातिशुद्धाः विशुद्धमनोवचनकायसंयुक्ताः ।
युष्माकं पादपयोरुहं इह मंगलं अस्तु मे नित्यम् ॥१॥

सगपरसमयविदण्हू आगमहेदूहिं चावि जाणित्ता ।
सुसमत्था जिणवयणे विणये सत्ताणुरूवेण ॥२॥
बालगुरुवुड्ढसेहे गिलाणथेरे य खमणसंजुत्ता ।
वट्टावयगा अण्णे दुस्सीले चावि जाणित्ता ॥३॥
वयसमिदिगुत्तिजुत्ता मुत्तिपहे ठावया पुणो अण्णे ।
अज्झावयगुणणिलये साहुगुणेणावि संजुत्ता ॥४॥
उत्तमखमाए पुढवी पसण्णभावेण अच्छजलसरिसा ।
कम्मिंधणदहणादो अगणी वाऊ असंगादो ॥५॥
गयणमिव णिरुवलेवा अक्खोहा सायरुव्व मुणिवसहा ।
एरिसगुणणिलयाणं पायं पणमामि सुद्धमणो ॥६॥
संसारकाणणे पुण बंभममाणेहिं भव्वजीवेहिं ।
णिव्वाणस्स हु मग्गो लद्धो तुम्ह पसाएण ॥७॥
अविसुद्धलेस्सरहिया विसुद्धलेस्साहि परिणदा सुद्धा ।
रुद्दट्टे पुण चत्ता धम्मे सुक्के य संजुत्ता ॥८॥
उग्गहईहावायाधारणगुणसंपदेहि संजुत्ता ।
सुत्तत्थभावणाए भावियमाणेहि वंदामि ॥९॥
तुम्हं गुणगणसंथुदि अजाणमाणेण जो मया वुत्तो ।
देउ मम बोहिलाहं गुरुभत्तिजुदत्थओ णिच्चं ॥१०॥

इच्छामि भंते ! आयरियभत्तिकाउस्सग्गो कओ तस्सालोचेउं, सम्मणाणसम्मदंसणसम्मचारित्तजुत्ताणं पंचविहाचाराणं आयरियाणं, आयारादिसुदणाणोवदेसयाणं उवज्झायाणं, तिरयणगुणपालणरयाणं सव्वसाहूणं, णिच्चकालं अंचेमि, पूजेमि,

वंदामि, गामंसामि, दुक्खक्खओ कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं ।

४४ आचार्य-लघुभक्तिः

प्राज्ञः प्राप्तसमस्तशास्त्रहृदयः प्रव्यक्तलोकस्थितिः
प्रास्ताशः प्रतिभापरः प्रशमवान प्रागेव दृष्टोत्तरः ।
प्रायः प्रश्नसहः प्रभुः परमनोहारी परानिन्दया
ब्रूयाद्धर्मकथां गणी गुणनिधिः प्रस्पष्टमृष्टाक्षरः ॥१॥
श्रुतमविकलं शुद्धा वृत्तिः परप्रतिबोधने
परिणतिरुरुद्योगो मार्गप्रवर्तनसद्विधौ ।
बुधनुतिरनुत्सेको लोकज्ञता मृदुताऽस्पृहा
यतिपतिगुणा यस्मिन्नन्ये च सोऽस्तु गुरुः सताम् ॥२
श्रुतजलधिपारगेभ्यः स्वपरमतविभावनापटुमतिभ्यः ।
सुचरिततपोनिधिभ्यो नमो गुरुभ्यो गुणगुरुभ्यः ॥३॥
छत्तीसगुणसमग्गे पंचविहाचारकरणसंदरिसे ।
सिस्साणुग्गहकुसले धम्माइरिए सदा वंदे ॥४॥
गुरुभत्तिसंजमेण य तरंति संसारसायरं घोरं ।
छिण्णंति अट्ठकम्मं जम्मणमरणं ण पावेंति ॥५॥
ये नित्यं व्रतमंत्रहोमनिरता ध्यानाग्निहोत्राकुलाः
षट्कर्माभिरतास्तपोधनधनाः साधुक्रियासाधवः ।
शीलप्रावरणा गुणप्रहरणाश्चन्द्रार्कतेजोऽधिका
मोक्षद्वारकपाटपाटनभटाः प्रीणन्तु मां साधवः ॥६॥

गुरवः पान्तु वो नित्यं ज्ञानदर्शननायकाः ।
चारित्रार्णवगंभीरा मोक्षमार्गोपदेशकाः ॥७॥
अञ्चलिका प्राकृताचार्यभक्तिवत्

४५ संस्कृत पञ्चमहागुरुभक्तिः

श्रीमदमरेन्द्रमुकुटप्रघटितमणिकिरणवारिधाराभिः ।
प्रक्षालितपदयुगलान् प्रणमामि जिनेश्वरान् भक्त्या ॥१॥

अष्टगुणैः समुपेतान् प्रणष्टदुष्टाष्टकर्मरिपुसमितीन् ।
सिद्धान् सततमनन्तान्नमस्करोमीष्टतुष्टिसंसिद्धचै ॥ २ ॥

साचारश्रुतजलधीन् प्रतीर्य शुद्धोरुचरणनिरतानाम् ।
आचार्याणां पदयुगकमलानि दधे शिरसि मेऽहम् ॥ ३ ॥

मिथ्यावादिमदोग्रध्वान्तप्रध्वंसिवचनसंदर्भान् ।
उपदेशकान् प्रपद्ये मम दुरितारिप्रणाशाय ॥ ४ ॥

सम्यग्दर्शनदीपप्रकाशका मेयबोधसंभूताः ।
भूरिचरित्रपताकास्ते साधुगणास्तु मां पान्तु ॥ ५ ॥

जिनसिद्धसूरिदेशकसाधुवरानमलगुणगणोपेतान् ।
पंचनमस्कारपदैस्त्रिसन्ध्यमभिनौमि मोक्षलाभाय ॥ ६ ॥

एष पंचनमस्कारः सर्वपापप्रणाशनः ।
मंगलानां च सर्वेषां प्रथमं मंगलं मतं ॥ ७ ॥

अर्हत्सिद्धाचार्योपाध्यायाः सर्वसाधवः ।
कुर्वन्तु मङ्गलाः सर्वे निर्वाणपरमश्रियम् ॥ ८ ॥

सर्वान् जिनेन्द्रचन्द्रान् सिद्धानाचार्यपाठकान् साधून् ।
रत्नत्रयं च वन्दे रत्नत्रयसिद्धये भक्त्या ॥ ९ ॥
पान्तु श्रीपादपद्मानि पंचानां परमेष्ठिनाम् ।
लालितानि सुराधीशचूडामणिमरीचिभिः ॥ १० ॥
प्रातिहार्यैर्जिनान् सिद्धान् गुणैः सूरीन् स्वमातृभिः ।
पाठकान् विनयैः साधून् योगाङ्गैरष्टभिः स्तुवे ॥ ११ ॥

(अञ्चलिका प्राकृतपञ्चमहागुरुभक्तिवत्)

४६ प्राकृत पँचमहागुरुभक्तिः ।

मणुय-णाइंद-सुरधरियछत्तत्तया, पंचकल्लाणसोक्खावलीपत्तया ।
दंसणं णाण झाणं अणंतं बलं, ते जिणा दिंतुअम्हं वरंमङ्गलं।१।
जेहिं झाणग्गिवाणेहिं अइथद्दयं,जम्म-जर-मरणनयरत्तयं दड्ढयं।
जेहिं पत्तं सिवं सासयं ठाणयं,ते महं दिंतु सिद्धा वरं णाणयं।२।

पंचहाचार-पंचग्गिससाहया,
बारसंगाइंसुअ-जलहिअवगाहया ।
मोक्खलच्छी महंती महं ते सया,
सूरिणो दिंतु मोक्खं गयासं गया ॥ ३ ॥

घोरसंसारभीमाडवीकाणणे, तिक्खवियरालणहपावपंचाणणे ।
णट्ठमग्गाण जीवाण पहदेसिया, वंदिमो ते उवज्झायअम्हे सया४
उग्गतवचरणकरणेहिं झीणंगया,धम्मवरझाण सुक्केक्कझाणंगया।
णिब्भरं तवसिरीए समालिंगया,साहवोते महं मोक्खपहमग्गया॥५॥

एस थोस्सेस जो पंचगुरु वंदए, गुरुयसंसारघणवेल्लि सो छिंदए।
लहइसो सिद्धिसोक्खाइंवरमाणणं,कुणइ कम्मिंधणंपुं जपज्जालणं६

अरुहा सिद्धाइरिया उवज्झाया साहु पंचपरमेट्ठी।
एयाण णमुक्कारा भवे भवे मम सुहं दिंतु॥ ७॥

इच्छामि भंते! पंचामहागुरुभत्तिका उस्सग्गो कओ तस्सालोचेउं, अट्ठमहापाडिहेरसंजुत्ताणं, अट्ठगुणसंपण्णाणं उड्ढलोयमत्थयम्मि पइट्ठियाणं सिद्धाणं, पट्ठपवयणमउसंजुत्ताणं आयरियाणं, आयारादिसुदणाणोवदेसयाणं उवज्झायाणं, तिरयणगुणपालणरयाणं सव्वसाहूणं, णिच्चकालं अंचेमि पूजेमि वंदामि णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं।

४७ अथ शान्तिभक्तिः।

न स्नेहाच्छरणं प्रयान्ति भगवन्पादद्वयं ते प्रजाः। हेतुस्तत्र विचित्रदुःखनिचयः संसारघोरार्णवः॥ अत्यंतस्फुरदुग्ररश्मिनिकरव्याकीर्णभूमंडलो। ग्रैष्मः कारयतीन्दुपादसलिलच्छायानुरागं रविः॥ १॥ क्रुद्धाशीविषदष्टदुर्जयविषज्वालावलीविक्रमो, विद्याभेषजमंत्रतोयहवनैर्याति प्रशांतिं यथा॥ तद्वत्ते चरणारुणांबुजयुगस्तोत्रोन्मुखानां नृणाम्। विघ्नाः कायविनायकाश्च सहसा शाम्यन्त्यहो विस्मयः॥ २॥ संतप्तोत्तमकांचनक्षितिधर श्रीस्पर्द्धिगौरद्युते। पुन्सां त्वच्चरणप्रणामकरणात्पीडाः प्रयान्ति क्षयं॥ उद्य-

द्भास्करविस्फुरत्करशतव्याघातनिष्कासिता । नानादेहिविलोचन-द्युतिहरा शीघ्रं यथा शर्वरी ॥३॥ त्रैलोक्येश्वरभंगलब्धविजया-दत्यंतरौद्रात्मकान् । नानाजन्मशतांतरेषु पुरतो जीवस्य संसा-रिणः ॥ को वा प्रस्खलतीह केन विधिना कालोग्रदावानलान् । न स्याच्चेत्तव पादपद्मयुगलस्तुत्यापगावारणम् ॥ ४ ॥ लोकालोक-निरंतरप्रविततज्ञानैकमूर्ते विभो । नानारत्नपिनद्धदंडरुचिरश्वेता-तपत्रत्रय ॥ त्वत्पादद्वयपूतगीतरवतः शीघ्रं द्रवन्त्यामयाः । दर्पा-ध्मातमृगेंद्रभीमनिनदाद्वन्या यथा कुञ्जराः ॥ ५ ॥ दिव्यस्त्रीनय-नाभिरामविपुलश्रीमेरुचूडामणे भास्वद्बालदिवाकरद्युतिहर प्राणी-ष्टभामंडल ॥ अव्याबाधमचिन्त्यसारमतुलं त्यक्तोपमं शाश्वतं । सौख्यं त्वच्चरणारविंदयुगलस्तुत्यैव संप्राप्यते ॥६॥ यावन्नोदयते प्रभापरिकरः श्रीभास्करो भासयं । स्तावद्धारयतीह पंकजवनं निद्रातिभारश्रमम् ॥ यावत्त्वच्चरणद्वयस्य भगवन्न स्यात्प्रसादोदय-स्तावज्जीवनिकाय एष वहति प्रायेण पापं महत् ॥ ७ ॥ शान्ति शान्तिजिनेन्द्र शान्तमनसस्त्वत्पादपद्माश्रयात् । संप्राप्ताःपृथिवीत-लेषु बहवः शान्त्यर्थिनः प्राणिनः ॥ कारुण्यान्मम भाक्तिकस्य च विभो दृष्टिं प्रसन्नां कुरु । त्वत्पादद्वयदैवतस्य गदतः शान्त्यष्टकं भक्तितः ॥८॥ शान्तिजिनं शशिनिर्मलवक्त्रं । शीलगुणव्रतसंयम-पात्रम् ॥ अष्टशतार्चितलक्षणगात्रं । नौमि जिनोत्तममंबुजनेत्रम् ॥ ६ ॥ पंचममीप्सितचक्रधराणां । पूजितमिन्द्रनरेन्द्रगणैश्च ॥ शान्तिकरं गणशान्तिमभीप्सुः । षोडशतीर्थकरं प्रणमामि ॥१०॥ दिव्यतरुःसुरपुष्पसुवृष्टिर्दुन्दुभिरासनयोजनघोषौ ॥ आतपवारण-

चामरयुग्मे यस्य विभाति च मंडलतेजः ॥ ११ ॥ तं जगदर्चित-शान्तिजिनेंद्रं शान्तिकरं शिरसा प्रणमामि ॥ सर्वगणाय तु यच्छतु शान्ति । मह्यमरं पठते परमां च ॥१२॥ येऽभ्यर्चिता मुकुटकुंडलहाररत्नैः ॥ शक्रादिभिः सुरगणैः स्तुतपादपद्माः ॥ ते मे जिनाः प्रवरवंशजगत्प्रदीपाः । तीर्थंकराः सततशान्तिकरा भवंतु ॥१३॥ संपूजकानां प्रतिपालकानां यतीन्द्रसामान्यतपोधनानाम् । देशस्य राष्ट्रस्य पुरस्य राज्ञः करोतु शान्तिं भगवाञ्जिनेन्द्रः । १४ ॥ क्षेमं सर्वप्रजानां प्रभवतु बलवान्धार्मिको भूमिपालः । काले काले च सम्यग्वर्षतु मघवा व्याधयो यान्तु नाशम् । दुर्भिक्षं चौरमारिः क्षणमपि जगतां मास्म भूज्जीवलोके ॥ जैनेन्द्रं धर्मचक्रं प्रभवतु सततं सर्वसौख्यप्रदायि ॥ १५ ॥ तद्द्रव्यमव्ययमुदेतु शुभः स देशः । संतन्यतां प्रतपतां सततं स कालः ॥ भावः स नन्दतु सदा यदनुग्रहेण । रत्नत्रयं प्रतपतीह मुमुक्षुवर्गे ॥१६॥ प्रध्वस्त-घातिकर्माणः केवलज्ञानभास्कराः ॥ कुर्वन्तु जगतां शान्तिं वृषभाद्या जिनेश्वराः ॥ १७ ॥ इच्छामि भंते! शान्तिभत्तिकाउस्सग्गो कओ, तस्सालोचेउं पंचमहाकल्लाणसंपण्णाणं अट्ठमहापाडिहेरसहियाणं, चउतीसातिसयविसेससंजुत्ताणं, बत्तीसदेविंदमणिमयमउडमत्थयमहियाणं, बलदेववासुदेवचक्कहररिसिमुणिजदिअणगारोवगूढाणं, थुइसयसहस्सणिलयाणं, उसहाइवीरपच्छिममंगलमहापुरिसाणं णिच्चकालं अंचेमि, पूजेमि वंदामि, णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहिमरणं जिणगुणसंपत्ति होउ मज्झं ॥

४८ अथ चैत्यभक्तिः

श्रीगौतमादिपदमद्भुतपुण्यबंधमुद्योतिताखिलममोघमघप्रणाशम्। वक्ष्ये जिनेश्वरमहं प्रणिपत्य तथ्यं निर्वाणकारणमशेषजगद्धितार्थम् ॥१॥ जयति भगवान् हेमाम्भोजप्रचारविजृम्भिता-। वमरमुकुटच्छायोद्गीर्णप्रभापरिचुम्बितौ ॥ कलुषहृदया मानोद्भ्रान्ताः परस्परवैरिणः। विगतकलुषाः पादौ यस्य प्रपद्य विशश्वसुः २॥ तदनु जयति श्रेयान्धर्मः प्रवृद्धमहोदयः। कुगतिविपथक्लेशाद्योसौ विपाशयति प्रजाः ॥ परिणतनयस्यांगीभावाद्विविक्तविकल्पितम्। भवतु भवतस्त्रातृ त्रेधा जिनेन्द्रवचोऽमृतम् ॥२॥ तदनु जयताज्जैनी वित्तिः प्रभंगतरंगिणी। प्रभवविगमध्रौव्यद्रव्यस्वभावविभाविनी ॥ निरुपमसुखस्येदं द्वारं विघट्य निरर्गलम्। विगतरजसं मोक्षं देयान्निरत्ययमव्ययम् ॥३॥ अर्हत्सिद्धाचार्योपाध्यायेभ्यस्तथा च साधुभ्यः। सर्वजगद्वंद्येभ्यो नमोस्तु सर्वत्र सर्वेभ्यः ॥४॥ मोहादिसर्वदोषारिघातकेभ्यः सदा हतरजोभ्यः। विरहितरहस्कृतेभ्यः पूजार्हेभ्यो नमोऽर्हद्भ्यः ॥५॥ क्षान्त्यार्जवादिगुणगणसुसाधनं सकललोकहितहेतुं। शुभधामनि धातारं वंदे धर्मं जिनेन्द्रोक्तम् ॥ ६ ॥ मिथ्याज्ञानतमोवृतलोकैकज्योतिरमितगमयोगि। सांगोपांगमजेयं जैनं वचनं सदा वंदे ॥७॥ भवनविमानज्योतिर्व्यंतरनरलोकविश्वचैत्यानि। त्रिजगदभिवंदितानां त्रेधा वंदे जिनेन्द्राणाम् ॥८॥ भुवनत्रयेऽपि भुवनत्रयाधिपाभ्यर्च्यतीर्थकर्तॄणां। वंदे भवाग्निशान्त्यै विभवानामालयालीस्ताः ॥९॥

इति पंचमहापुरुषाः प्रणुता जिनधर्मवचनचैत्यानि। चैत्यालयाश्च विमलां दिशन्तु बोधिं बुधजनेष्टाम् ॥ १० ॥ अकृतानि कृतानि चाप्रमेयद्युतिमन्ति द्युतिमत्सु मंदिरेषु। मनुजामरपूजितानि वंदे प्रतिबिंबानि जगत्त्रये जिनानाम् ॥ ११ ॥ द्युतिमंडलभासुराङ्गयष्टीः प्रतिमा अप्रतिमा जिनोत्तमानाम्। भुवनेषु विभूतये प्रवृत्ता वपुषा प्रांजलिरस्मि वंदमानः ॥ १२ ॥ विगतायुधविक्रियाविभूषाः प्रकृतिस्थाः कृतिनां जिनेश्वराणां ॥ प्रतिमाः प्रतिमागृहेषु कान्त्या प्रतिमाः कल्मषशान्तयेऽभिवंदे ॥१३॥ कथयन्ति कषायमुक्तिलक्ष्मीं परया शान्ततया भवांतकानाम्। प्रणमाम्यभिरूपमूर्तिमंति प्रतिरूपाणि विशुद्धये जिनानाम् ॥ १४ ॥ यदिदं मम सिद्धभक्तिनीतं सुकृतं दुष्कृतवर्त्मरोधि तेन। पटुना जिनधर्म एव भक्तिर्भवताज्जन्मनि जन्मनि स्थिरा मे ॥१५॥ अर्हतां सर्वभावानां दर्शनज्ञानसंपदाम्। कीर्तयिष्यामि चैत्यानि यथाबुद्धि विशुद्धये ॥ १६ ॥ श्रीमद्भवनवासस्था स्वयमासुरमूर्तयः। वंदिता नो विधेयासुः प्रतिमाः परमां गतिम् ॥ १७ ॥ यावंति संति लोकेऽस्मिन्नकृतानि कृतानि च। तानि सर्वाणि चैत्यानि वंदे भूयांसि भूतये ॥१८॥ ये व्यंतरविमानेषु स्थेयांसः प्रतिमागृहाः। ते च संख्यामतिक्रान्ताः संतु नो दोषविच्छिदे ॥ १९ ॥ ज्योतिषामथ लोकस्य भूतयेऽद्भुतसंपदः। गृहाः स्वयंभुवः संति विमानेषु नमामि तान् ॥ २० ॥ वंदे सुरतिरीटाग्रमणिच्छायाभिषेचनम्। याः क्रमेणैव सेवन्ते तदर्चाः सिद्धिलब्धये ॥ २१ ॥ इति स्तुतिपथातीतश्रीभृतामर्हतां मम। चैत्यानामस्तु संकीर्तिः सर्वा-

स्रवनिरोधिनो ॥ २२ ॥ अर्हन्महानदस्य त्रिभुवनभव्यजनतीर्थयात्रिकदुरितम् । प्रक्षालनैककारणमतिलौकिककुहकतीर्थमुत्तमतीर्थम् ॥२३॥ लोकालोकसुतत्त्वप्रत्यवबोधनसमर्थदिव्यज्ञान।-प्रत्यहवहत्प्रवाहं व्रतशीलामलविशालकूलद्वितयम् ॥२४॥ शुक्लध्यानस्तिमितस्थितराजद्राजहंसराजितमसकृत् । स्वाध्यायमंद्रघोषं नानागुणसमितिगुप्तिसिकतासुभगम् ॥२५॥ क्षान्त्यावर्तसहस्रं सर्वदयाविकचकुसुमविलसल्लतिकम् । दुःसहपरीषहाख्यद्रुततररंगत्तरङ्गभंगुरनिकरम् ॥ २६ ॥ व्यपगतकषायफेनं रागद्वेषादिदोषशैवलरहितं । अत्यस्तमोहकर्दममतिदूरनिरस्तमरणमकरप्रकरम् ॥२७॥ ऋषिवृषमस्तुतिमंद्रोद्रेकितनिर्घोषविविधविहगध्वानम् । विविधतपोनिधिपुलिनं सास्रवसंवरणनिर्जरानिःस्रवणम् ॥२८॥ गणधरचक्रधरेन्द्रप्रभृतिमहाभव्यपुण्डरीकैः पुरुषैः। बहुभिः स्नातं भक्त्या कलिकलुषमलापकर्षणार्थममेयम् ॥ २९ ॥ अवतीर्णवतः स्नातुं ममापि दुस्तरसमस्तदुरितं दूरम् । व्यवहरतु परमपावनमनन्यजय्यस्वभावगंभीरम् ॥३०॥ अताम्रनयनोत्पलं सकलकोपवह्नेर्जयात् । कटाक्षशरमोक्षहीनमविकारतोद्रेकतः॥ विषादमदहानितः प्रहसितायमानं सदा । मुखं कथयतीव ते हृदयशुद्धिमात्यन्तिकीम् ॥३१॥ निराभरणभासुरं विगतरागवेगोदयात् । निरंबरमनोहरं प्रकृतिरूपनिर्दोषतः ॥ निरायुधसुनिर्भयं विगतहिंस्यहिंसाक्रमात् । निरामिषसुतृप्तिमद्विविधवेदनानां क्षयात् ॥३२॥ मितस्थितनखांगजं गतरजोमलस्पर्शनम् । नवांबुरुहचंदनप्रतिमदिव्यगंधोदयं ॥ रवीन्दुकुलिशादिदिव्यबहुलक्षणालंकृतम् । दिवा-

करसहस्रमासुरमपोहणानां प्रिथम् ॥३३॥ हितार्थपरिपंथिभिः प्रबलरागमोहादिभिः। कलंकितमना जनो यदभिवीक्ष्य शोशुध्यते ॥ सदाभिमुखमेव यज्जगति पश्यतां सर्वतः। शरद्विमलचंद्रमंडलमिवोत्थितं दृश्यते ॥३४॥ तदेतदमरेश्वरप्रचलमौलिमालामणिस्फुरत्किरणचुम्बनीयचरणारविन्दद्वयम् ॥ पुनातु भगवज्जिनेन्द्र तव रूपमन्धीकृतम्। जगत्सकलमन्यतीर्थगुरुरूपदोषोदयैः ॥३५॥ मानस्तंभाः सरांसि प्रविमलजलसत्खातिका पुष्पवाटी। प्राकारो नाट्यशालाद्वितयमुपवन वेदिकांतर्ध्वजाद्याः ॥ शालः कल्पद्रुमाणां सुपरिवृतवनं स्तूपहर्म्यावली च। प्राकारः स्फाटिकोन्तर्नृसुरमुनिसभा पीठिकाग्रे स्वयंभूः ॥३६॥ वर्षेषु वर्षान्तरपर्वतेषु, नंदीश्वरे यानि च मंदरेषु। यावन्ति चैत्यायतनानि लोके सर्वाणि वंदे जिनपुङ्गवानाम् ॥३७॥ अवनितलगतानां कृत्रिमाऽकृत्रिमाणाम्। वनभवनगतानां दिव्यवैमानिकानाम् ॥ इह मनुजकृतानां देवराजार्चितानाम्। जिनवरनिलयानां भावतोऽहं स्मरामि ॥३८॥ जम्बूधातकिपुष्कराद्धवसुधाक्षेत्रत्रयेभवा-। श्चंद्रांभोजशिखंडिकंठकनकप्रावृड्घनाभाः जिनाः ॥ सम्यग्ज्ञानचरित्रलक्षणधरा दग्धाष्टकर्मेन्धनाः। भूतानागतवर्तमानसमये तेभ्यो जिनेभ्यो नमः ॥३९॥ श्रीमन्मेरौ कुलाद्रौ रजतगिरिवरे शाल्मलौ जंबुवृक्षे। वक्षारे चैत्यवृक्षे रतिकररुचकेकुण्डले मानुषांके ॥ इष्वाकारेऽञ्जनाद्रौ दधिमुखशिखरे व्यंतरे स्वर्गलोके। ज्योतिर्लोकेऽभिवंदे भुवनमहितले यानि चैत्यानि तानि ॥४०॥ देवासुरेन्द्रनरनागसमर्चितेभ्यः। पापप्रनाशकरभव्यमनोहरेभ्यः ॥ घंटाध्वजादिपरिवार-

विभूषितेभ्यो । नित्यं नमो जगति सर्व जिनालयेभ्यः ॥४१॥
इच्छामि भंते ! चेइयभत्तिकाउस्सग्गो कओ। तस्सालोचेउं अह-लोयतिरियलोयउढ्ढलोयम्मि किट्टिमाकिट्टिमाणि जाणि जिणचेइ-याणि ताणि सव्वाणि तिसुवि लोएसु भवणवासियवाणविंतर जोइसियकप्पवासियत्ति चउविहा देवा सपरिवारा दिव्वेण गंधेण दिव्वेण पुप्फेण, दिव्वेण वासेण, दिव्वेण ण्हाणेण, णिच्चकालं अच्चन्ति, पुजन्ति, वंदंति, णमंसंति । अहमवि इह संतो तत्थ संताइ णिच्चकाल अंचेमि, पूजेमि, वंदामि, णमंसामि, दुक्खक्खओ कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहिमरणं, जिणगुण-संपत्ति होउ मज्झं ॥

४६-लघुचैत्य भक्तिः

वर्षेषु वर्षान्तरपर्वतेषु नन्दीश्वरे यानि च मन्दरेषु ।
यावन्ति चैत्यायतनानि लोके सर्वाणि वन्दे जिनपुङ्गवानाम् ॥१॥

अवनितलगतानां कृत्रिमाकृत्रिमाणां
वनभवनगतानां दिव्यवैमानिकानाम् ।
इह मनुजकृतानां देवराजार्चितानां
जिनवरनिलयानां भावतोऽहं नमामि ॥२॥

जम्बूधातकिपुष्करार्धवसुधाक्षेत्रत्रये ये भवा-
श्चन्द्राम्भोजशिखंडिकंठकनकप्रावृड्घनाभा जिनाः ।
सम्यग्ज्ञानचरित्रलक्षणधरा दग्धाष्टकर्मेन्धना
भूतानागतवर्तमानसमये तेभ्यो जिनेभ्यो नमः ॥३॥

श्रीमन्मेरौ कुलाद्रौ रजतगिरिवरे शाल्मलौ जम्बुवृक्षे
वक्षारे चैत्यवृक्षे रतिकररुचके कुण्डले मानुषांके ।
इष्वाकारेऽञ्जनाद्रौ दधिमुखशिखरे व्यन्तरे स्वर्गलोके
ज्योतिर्लोकेऽभिवन्दे भवनमहितले यानि चैत्यालयानि ॥४॥
द्वौ कुन्देन्दुतुषारहारधवलौ द्वाविन्द्रनीलप्रभौ
द्वौ बन्धूकसमप्रभौ जिनवृषौ द्वौ च प्रियंगुप्रभौ ।
शेषाः षोडशजन्ममृत्युरहिताः सन्तप्तहेमप्रभा-
स्ते संज्ञानदिवाकराः सुरनुताः सिद्धिं प्रयच्छन्तु नः ॥५॥

अंचलिका चैत्यभक्तिवत्

५० समाधिभक्तिः ।

स्वात्माभिमुखसंवित्तिलक्षणं श्रुतचक्षुषा । पश्यन्पश्यामि देव त्वां केवलज्ञानचक्षुषा ॥ १ ॥* शास्त्राभ्यासो जिनपतिनुतिः संगतिः सर्वदार्यैः । सद्वृत्तानां गुणगणकथा दोषवादे च मौनम् ॥

---

* व्युत्सृज्य दोषान्निःशेषान्सद्ध्यानेस्यात्तनूत्सृतौ । सहेतात्युपसर्गोर्मीन्कर्मैवं भिद्यतेतरां ।१। ध्यानाशुशुक्षुणा विद्धे मनोरुत्विक्समाहितः । स्वकर्म समिधो भावसर्पिषा जुहुमोऽधुना ।।२।। अहमेवाहमित्यात्मज्ञानादन्यत्र चेतनां । इदमस्मि करोमीदमिदं भुंज इति क्षिपेत् ।।३।। अहमेवाहमित्यन्तर्जल्पसंपृक्तकल्पनां त्यक्त्वाऽवाग्गोचरं ज्योतिः स्वयं पश्यामि शाश्वतम् ।।४।। अमुह्यंतमरज्यंतमद्विषंतं च यः स्वयं । शुद्धे निधत्ते स्वे शुद्धमुपयोगं स शुद्धयति ।।५।। बोधिसमाधिविशुद्धस्वचिदुपलब्ध्युच्छलत्प्रमोदभराः ब्रह्म विदंति परं ये ते सद्गुरवो मम प्रसीदंतु ॥ ६ ॥

सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे। संपद्यंतां मम भव-भवे यावदेतेऽपवर्गः ॥ २ ॥ जैनमार्गरुचिरन्यमार्गनिर्वेगता जिनगुणस्तुतौ मतिः। निष्कलंकविमलोक्तिभावनाः संभवन्तु मम जन्मजन्मनि ॥३॥ गुरुमूले यतिनिचिते चैत्यसिद्धान्तवार्धिसद्घोषे मम भवतु जन्मजन्मनि सन्यसनसमन्वितं मरणम् ॥ ४ ॥ जन्म-जन्मकृतं पापं जन्मकोटिसमार्जितम् ॥ जन्ममृत्युजरामूलं हन्यते जिनवंदनात् ॥ ५ ॥ आबाल्याज्जिनदेवदेव भवतः श्रीपादयोः सेवया। सेवासक्तविनेयकल्पलतया कालोऽद्ययावद्गतः।त्वां तस्याः फलमर्थये तदधुना प्राणप्रयाणक्षणे। त्वन्नामप्रतिबद्धवर्णपठने कण्ठोऽस्त्वकुण्ठो मम ॥ ६ ॥ तव पादौ मम हृदये मम हृदयं तव पदद्वये लीनम्। तिष्ठतु जिनेन्द्र! तावद्यावन्निर्वाणसंप्राप्तिः ॥७॥ एकापि समर्थेयं जिनभक्तिदुर्गतिं निवारयितुम्। पुण्यानि च पूरयितुं दातुं मुक्तिश्रियं कृतिनः ॥ ८ ॥ पंच अरिंजयणामे पंच य मदिसायरे जिणे वंदे। पंच जसोयरणामे पंच य सीमंदरे वंदे ॥ ९ ॥ रयणत्तयं च वंदे चउवीसजिणे च सव्वदा वंदे ॥ पंचगुरूणं वंदे चारणचरणं सदा वंदे ॥१०॥ अर्हमित्यक्षरब्रह्म-वाचकं परमेष्ठिनः। सिद्धचक्रस्य सद्बीजं सर्वतः प्रणिदध्महे ॥११॥ कर्माष्टकविनिर्मुक्तं मोक्षलक्ष्मीनिकेतनम्। सम्यक्त्वादिगुणोपेतं सिद्धचक्रं नमाम्यहम् ॥१२॥ आकृष्टिं सुरसपदां विदधते मुक्ति-श्रियो वश्यतां। उच्चाटं विपदां चतुर्गतिभुवां विद्वेषमात्मैनसाम् ॥ स्तंभं दुर्गमनं प्रति प्रयततो मोहस्य सम्मोहनम्। पायात्पंचन-मस्क्रियाक्षरमयी साराधना देवता ॥ १३ ॥ अनंतानन्तसंसार-

संततिच्छेदकारणम् । जिनराजपदाम्भोजस्मरणं शरणं मम ॥२४॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारुण्यभावेन रक्ष रक्ष जिनेश्वर ॥ १५ ॥ नहि त्राता नहि त्राता नहि त्राता जगत्त्रये ॥ वीतरागात्परो देवो न भूतो न भविष्यति ॥ १६ ॥ जिने भक्तिर्जिने भक्तिर्जिने भक्तिर्दिने दिने ॥ सदा मेऽस्तु सदा मेऽस्तु सदा मेऽस्तु भवे भवे ॥ १७ ॥ याचेऽहं याचेऽहं जिन तव चरणारविन्दयोर्भक्तिम् । याचेऽहं याचेऽहं पुनरपि तामेव तामेव ॥१८॥ विघ्नौघाः प्रलयं यान्ति शाकिनीभूतपन्नगाः। विषं निर्विषतां याति स्तूयमाने जिनेश्वरे ॥ १९ । इच्छामि भंते ! समाहिभत्तिकाउस्सग्गो कओ, तस्सालोचेउं, रयणत्तयपरूवपरमप्पज्झाणलक्खणं समाहिभत्तीये णिच्चकालं अंचेमि, पूजेमि, वंदामि, णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं समाहिमरणं जिणगुणसंपत्ति होउ मज्झं ।

---

५१ लघुसमाधिभक्तिः (प्रियभक्तिः)

शास्त्राभ्यासो जिनपतिनुतिः संगतिः सर्वदार्यैः, सद्वृत्तानां गुणगणकथा दोषवादे च मौनम् । सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे संपद्यन्तां मम भवभवे यावदेतेऽपवर्गः ॥१॥ तव पादौ मम हृदये मम हृदयं तव पदद्वये लीनम्। तिष्ठतु जिनेन्द्र तावद्यावन्निर्वाणसंप्राप्तिः ॥२॥ अक्खरपयत्थहीणं मत्ताहीणं च जं मए भणियं । तं खमउ णाणदेव म लज्झवि दुक्खक्खयं

दितु ॥३॥ दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुणसंपत्ति होउ मज्झम् ।

(अंचलिका समाधि भक्तिवत्)

५२ निर्वाणभक्तिः ।

विबुधपतिखगपनरपतिधनदोरगभूतयक्षपतिमहितम् । अतुल सुखविमलनिरूपमशिवमचलमनामयं हि संप्राप्तम् ॥१॥ कल्याणैः संस्तोष्ये पंचभिरनघं त्रिलोकपरमगुरुम् । भव्यजनतुष्टिजननैर्दुरवापैः सन्मतिं भक्त्या ॥ २ ॥ आषाढसुसितषष्ठ्यां हस्तोत्तरमध्यमाश्रिते शशिनि । आयातः स्वर्गसुखं भुक्त्वा पुष्पोत्तराधीशः ॥ ३ ॥ सिद्धार्थनृपतितनयो भारतवास्ये विदेहकुण्डपुरे । देव्यां प्रियकारिण्यां सुस्वप्नान्संप्रदर्श्य विभुः ॥ ४ ॥ चैत्यसितपक्षफाल्गुनि शशांकयोगे दिने त्रयोदश्याम् ॥ जज्ञे स्वोच्चस्थेषु ग्रहेषु सौम्येषु शुभलग्ने ॥५॥ हस्ताश्रिते शशांके चैत्रज्योत्स्ने चतुर्दशीदिवसे । पूर्वाह्णे रत्नघटैर्विबुधेन्द्राश्चक्रुरभिषेकम् ॥६॥ भुक्त्वा कुमारकाले त्रिंशद्वर्षाण्यनंतगुणराशिः । अमरोपनीतभोगान्सहसाभिनिबोधितोऽन्येद्युः ॥७॥ नानाविधरूपचितां विचित्रकूटोच्छ्रितां मणिविभूषाम् । चंद्रप्रभाख्यशिबिकामारुह्य पुराद्विनिःक्रान्तः ॥८॥ मार्गशिरकृष्णदशमीहस्तोत्तरमध्यमाश्रिते सोमे । षष्ठेन त्वपराह्णे भक्तेन जिनः प्रवव्राज ॥९ ग्रामपुरखेटकर्वटमटंबघोषाकरान्प्रविजहार । उग्रैस्तपोविधानैर्द्वादशवर्षाण्यमरपूज्यः ॥ १० ॥ ऋजु-

कूलायास्तीरेशालद्रुमसंश्रिते शिलापट्टे। अपराह्णेषष्ठेनास्थितस्य खलु जृम्भिकाग्रामे ॥ ११ ॥ वैशाखसितदशम्यां हस्तोत्तरमध्यमाश्रिते चंद्रे। क्षपकश्रेण्यारूढस्योत्पन्नं केवलज्ञानम् ॥१२॥ अथ भगवान् संप्रापद्दिव्यं वैभारपर्वतं रम्यम्। चातुर्वर्ण्यसुसंघस्तत्राभूद्गौतमप्रभृति ॥१३॥ छत्राशोकौ घोषं सिंहासनदुन्दुभी कुसुमवृष्टिम्। वरचामरभामंडलदिव्यान्यन्यानि चावापत् ॥ १४ ॥ दशविधमनगाराणामेकादशधोत्तरं तथा धर्मम्। देशयमानो व्यहरत्त्रिंशद्वर्षाण्यथ जिनेन्द्रः ॥१५॥ पद्मवनदीर्घिकाकुलविविधद्रुमखण्डमण्डिते रम्ये। पावानगरोद्याने व्युत्सर्गेण स्थितः स मुनिः ॥ १६ ॥ कार्तिककृष्णस्यान्ते स्वातावृक्षे निहत्य कर्मरजः। अवशेषं संप्रापद्व्यजरामरमक्षयं सौख्यं ॥ १७ ॥ परिनिर्वृतं जिनेन्द्रं ज्ञात्वा विबुधा ह्यथाशु चागम्य। देवतरुरक्तचंदनकालागुरुसुरभिगोशीर्षैः ॥ १८ ॥ अग्नीन्द्राज्जिनदेहं मुकुटानलसुरभिधूपवरमाल्यैः। अभ्यर्च्य गणधरानपि गता दिवं खं च वनभवने ॥ १९ ॥ इत्येवं भगवति वर्धमानचंद्रे, यः स्तोत्रं पठति सुसंध्ययोर्द्वयोर्हि ॥ सोऽनंतं परमसुखं नृदेवलोके भुक्त्वांते शिवपदमक्षयं प्रयाति ॥ २० ॥ यत्रार्हतां गणभृतां श्रुतपारगाणां। निर्वाणभूमिरिह भारतवर्षजानाम् ॥ तामद्य शुद्धमनसा क्रियया वचोभिः। संस्तोतुमुद्यतमतिः परिणौमि भक्त्या ॥ २१ ॥ कैलासशैलशिखरे परिनिर्वृतोऽसौ। शैलेशिभावमुपपद्य वृषो महात्मा ॥ चंपापुरे च वसुपूज्यसुतः सुधीमान्। सिद्धिपरामुपगतो गतरागबंधः ॥२२॥ यत्प्रार्थ्यते शिवमयं विबुधेश्वराद्यैः। पाखंडिभिश्च परमार्थगवेष

शीलैः ॥ नष्टाष्टकर्मसमये तदरिष्टनेमिः । संप्राप्तवान् क्षितिधरे बृहदूर्जयन्ते ॥ २३ ॥ पावापुरस्य बहिरुन्नतभूमिदेशे । पद्मोत्पलाकुलवतां सरसां हि मध्ये ॥ श्रीवर्द्धमानजिनदेव इति प्रतीतो । निर्वाणमाप भगवान्प्रविधूतपाप्मा ॥ २४ ॥ शेषास्तु ते जिनवरा जितमोहमल्ला । ज्ञानार्कभूरिकिरणैरवभास्य लोकान् ॥ स्थानं पर निरवधारितसौख्यनिष्ठं । सम्मेदपर्वततले समवापुरीशाः ॥२५॥ आद्यश्चतुर्दशदिनैर्विनिवृत्तयोगः । षष्ठेन निष्ठितकृतिर्जिनवर्द्धमानः ॥ शेषा विधूतघनकर्मनिबद्धपाशाः मासेन ते यतिवरास्त्वभवन्वियोगाः ॥ २६ ॥ माल्यानि वाक्स्तुतिमयैः कुसुमैः सुदृब्धान्यादाय मानसकरैरभितः किरंतः ॥ पर्येम आदृतियुता भगवन्निषद्याः । संप्रार्थिता वयमिमे परमां गतिं ताः ॥२७॥ शत्रुंजये नगवरे दमितारिपक्षाः । पंडोः सुताः परमनिर्वृतिमभ्युपेताः ॥तुङ्ग्यां तु संगरहितो बलभद्रनामा । नद्यास्तटे जितरिपुश्च सुवर्णभद्रः ॥२८॥ द्रोणीमति प्रबलकुण्डलमेढ्के च । वैभारपर्वततले वरसिद्धकूटे ॥ ऋष्याद्रिके च विपुलाद्रिबलाहके च, विंध्ये च पौदनपुरे वृषदीपके च ।२९। सह्याचले च हिमवत्यपि सुप्रतिष्ठे । दंडात्मके गजपथे पृथुसारयष्टौ ॥ ये साधवो हतमलाः सुगतिं प्रयाताः । स्थानानि तानि जगति प्रथितान्यभूवन् ॥३०॥ इक्षोर्विकाररसपृक्तगुणेन लोके । पिष्टोऽधिकां मधुरतामुपयाति यद्वत्॥ तद्वच्च पुण्यपुरुषैरुषितानि नित्यं । स्थानानि तानि जगतामिह पावनानि ॥ ३१ ॥ इत्यर्हतां शमवतां च महामुनीनां । प्रोक्ता मयात्र परिनिर्वृतिभूमिदेशाः ॥ ते मे जिना जितभया मुनयश्च

शान्ताः। दिश्यासुराशु सुगतिं निरवद्यसौख्याम् ॥ ३२ ॥
कैलासाद्रौ मुनीन्द्रः पुरुरपदुरितो मुक्तिमाप प्रणूतः । चंपायां
वासुपूज्यस्त्रिदशपतिनुतो नेमिरप्यूर्जयन्ते ॥ पावायां वर्धमान-
स्त्रिभुवनगुरवो विंशतिस्तीर्थनाथाः सम्मेदाग्रे प्रजग्मुर्ददतु विन-
मतां निर्वृतिं नो जिनेन्द्राः[1] ॥३३॥ गौर्गजोश्वः कपिः कोकः
सरोजः स्वस्तिकः शशी। मकरः श्रीयुतो वृक्षो गंडो महिषसूकरौ
॥ ३४ ॥ सेधा वज्रमृगच्छागाः पाठीनः कलशस्तथा। कच्छप-
श्चोत्पलं शंखो नागराजश्च केसरी ॥ ३५ ॥ शान्तिकुंथ्वर-
कौरव्या यादवो नेमिसुव्रतौ ॥ उग्रनाथौ पार्श्ववीरौ शेषा इक्ष्वाकु-
वंशजाः ॥ ३६ ॥ इच्छामि भंते ! परिणिव्वाणभत्ति काउ-
स्सग्गो कओ तस्सालोचेउं, इमम्मि अवसप्पिणीये चउत्थ-
समयस्स पच्छिमे भाए आउट्ठमासहीणे वासचउक्कम्मि सेसका-
लम्मि पावाए णयरीए कत्तियमासस्स किण्हचउदसीए रत्तीए
सादीए णक्खत्ते पच्चूसे भयवदो महदि महावीरो वढ्ढमाणो सिद्धिं
गदो। तिसुवि लोएसु, भवणवासियवाणविंतरजोइसियकप्पवासि-
यत्ति चउव्विहा देवा सपरिवारा दिव्वेण गंधेण, दिव्वेण पुप्फेण,
दिव्वेण धूवेण, दिव्वेण चुण्णेण, दिव्वेण वासेण, दिव्वेण ण्हाणेण,
णिच्चकालं, अच्चंति, पूजंति, वंदंति, णमंसंति, परिणिव्वाणमहा-
कल्लाणपुज्जं करंति । अहमवि इह संतो तत्थ संताइयं णिच्चकालं
अंचेमि, पूजेमि, वंदामि, णमंसामि, दुक्खक्खओ, कम्मक्खओ,
बोहिलाहो, सुगइगमणं, समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं ॥
निर्वाणकाण्ड पठित्वेकामंचलिकां पठेत्

[1] प्रक्षिप्तोऽयं श्लोकः।

५४ नंदीश्वरभक्तिः ।

त्रिदशपतिमुकुतटगतमणिगणकरनिकरसलिलधाराधौतक्रम-कमलयुगलजिनपतिरुचिरंप्रतिबिंबविलयविरहितनिलयान् ॥ १ ॥ निलयानहमिह महसा सहसाप्रणिपतनपूर्वमवनौम्यवनौ , त्रय्यां त्रय्या शुद्धचा निसर्गशुद्धान्विशुद्धये घनरजसाम् ॥ २ ॥ भावन-सुरभवनेषु द्वासप्ततिशतसहस्रसंख्याऽभ्यधिकाः । कोटयः सप्त प्रोक्ता भवनानां भूरितेजसां भुवनानाम् ॥ ३ ॥ त्रिभुवन भूतविभूनां संख्यातीतान्यसंख्यगुणयुक्तानि ॥ त्रिभुवनजन-नयनमनः प्रियाणि भवनानि भौमविबुधनुतानि ॥४ ॥ यावन्ति सन्ति कान्तज्योतिर्लोकाधिदेवताभिनुतानि । कल्पेऽनेकविकल्पे कल्पातीतेऽहमिन्द्रकल्पानल्पे ॥५॥ विंशतिरथ त्रिसहिता सहस्र-गुणिता च सप्तनवति प्रोक्ता । चतुरधिकाशीतिरतः पंचकशून्येन विनिसतान्यनघानि ॥६॥ अष्टापंचाशदतश्चतुःशतानीह मानुषे च क्षेत्रे ॥ लोकालोकविभागप्रलोकनालोकसंयुजां जयभाजाम् ॥७॥ नवनवचतुःशतानि च सप्त च नवतिः सहस्रगुणिताः षट् च । पंचाशत्पंचवियत्प्रहताः पुनरत्र कोटयोऽष्टौ प्रोक्ताः ॥ ८ ॥ एतावन्त्येव सतामकृत्रिमाण्यथ जिनेशिनां भवनानि । भुवनत्रितये त्रिभुवन-सुरसमितिसमर्च्यमानसत्प्रतिमानि ॥ ९ ॥ वक्षाररुचककुण्डलरौ-प्यनगोत्तरकुलेषुकारनगेषु । कुरुषु च जिनभवनानि त्रिशतान्यधि-कानि तानि षड्विंशत्या ॥ १० ॥ नंदीश्वरसद्द्वीपे नंदीश्वरजल-धिपरिवृते धृतशोभे । चंद्रकरनिकरसंनिभरुन्द्रयशोविततदिङ्महीं-

मंडलके ॥ ११ ॥ तत्रत्यांजनदधिमुखरतिकरपुरुनगवराख्यपर्वत-मुख्याः । प्रतिदिशमेषामुपरि त्रयोदशेन्द्रार्चितानि जिनभवनानि ॥ १२ ॥ आषाढकार्तिकाख्ये फाल्गुनमासे च शुक्लपक्षेऽष्टम्याः। आरभ्याष्टदिनेषु च सौधर्मप्रमुखविबुधपतयो भक्त्या ॥ १३ ॥ तेषु महामहमुचितं प्रचुराक्षतगंधपुष्पधूपैर्दिव्यैः । सर्वज्ञप्रतिमाना-मप्रतिमानां प्रकुर्वते सर्वहितम् ॥१४॥ भेदेन वर्णना का सौधर्मः स्नपनकर्तृतामापन्नः । परिचारकभावमिताः शेषेन्द्रा रुन्द्रचंद्रनिर्म-लयशसः ॥ १५ ॥ मंगलपात्राणि पुनस्तद्देव्यो विभ्रति स्म शुभ्र-गुणाढ्याः । अप्सरसो नर्तक्यः शेषसुरास्तत्र लोकनाव्यग्रधियः ॥ १६ ॥ वाचस्पतिवाचामपि गोचरतां संव्यतीत्य यत्क्रममा-णम् ॥ विबुधपतिविहितविभवं मानुषमात्रस्य कस्य शक्तिः स्तोतुम् ॥१७॥ निष्ठापितजिनपूजाश्चूर्णस्नपनेन दृष्टविकृतविशेषाः । सुर-पतयो नंदीश्वरजिनभवनानि प्रदक्षिणीकृत्य पुनः ॥१८ ॥ पंचसु मंदरगिरिषु श्रीभद्रशालनंदनसौमनसम् । पांडुकवनमिति तेषु प्रत्येकं जिनगृहाणि चत्वार्येव ॥ १९ ॥ तान्यथ परीत्य तानि च नमसित्वा कृतसुपूजनास्तत्रापि । स्वास्पदमीयुः सर्वे स्वास्पद-मूल्यं स्वचेष्टया संगृह्य ॥ २० ॥ सहतोरणसद्वेदीपरीतवनयाग-वृक्षमानस्तंभ-। ध्वजपंक्तिदशकगोपुरचतुष्टयत्रितयशालमंडपवर्यैः ॥ २१ ॥ अभिषेकप्रेक्षणिका क्रीडनसंगीतनाटकालोकगृहैः । शिल्पिविकल्पितकल्पनसंकल्पातीतकल्पनैः समुपेतैः ॥ २२ ॥ वापीसत्पुष्करिणीसुदीर्घिकाद्यम्बुसंश्रितैः समुपेतैः । विकसितजल-रुहकुसुमैर्नभस्यमानैः शशिग्रहर्क्षैः शरदि ॥ २३ ॥ भृङ्गाराद्वक-

कलशाद्युपकरणैरष्टशतकपरिसंख्यानैः। प्रत्येकं चित्रगुणैः कृतभ्रणभ्रणनिनदवितत घंटाजालैः ॥ २४ ॥ प्रविभाजंते नित्यं हिरण्मयानीश्वरेशिनां भवनानि । गंधकुटीगतमृगपतिविष्टररुचिराणि विविधविभवयुतानि ॥ २५ ॥ येषु जिनानां प्रतिमाः पंचशतशरासनोच्छ्रिताः सत्प्रतिमाः। मणिकनकरजतविकृता दिनकरकोटिप्रभाधिकप्रभदेहाः ॥२६॥ तानि सदा वंदेऽहं भानुप्रतिमानियानि कानि च तानि। यशसां महसां प्रतिदिशमतिशयशोभाविभांजि पापविभंजि ॥ २७ ॥ सप्तत्यधिकशतप्रियधर्मक्षेत्रगततीर्थंकरवरवृषभान् । भूतभविष्यत्संप्रतिकालभवान्भवविहानये विनतोऽस्मि ॥ २८ ॥ अस्यामवसर्पिण्यां वृषभजिनः प्रथमतीर्थंकर्ता भर्ता। अष्टापदगिरिमस्तकगतस्थितो मुक्तिमाप पापान्मुक्तः ॥ २९ ॥ श्रीवासुपूज्यभगवान शिवासु पूजासु पूजितस्त्रिदशानां। चंपायां दुरितहरः परमपदं प्रापदापदामन्तगतः ॥ ३० ॥ मुदितमतिबलमुरारिप्रपूजितो जितकषायरिपुरथ जातः । बृहदूर्जयन्तशिखरे शिखामणिस्त्रिभुवनस्य नेमिर्भगवान् ॥ ३१ ॥ पावापुरवरसरसां मध्यगतः सिद्धिवृद्धितपसां महसां। वीरो नीरदनादो भूरिगुणश्चारुशोभमास्पदमगमत् ॥ ३२ ॥ सम्मदकरिवनपरिवृत-सम्मेदगिरीन्द्रमस्तके विस्तीर्णे। शेषा ये तीर्थंकराः कीर्तिभृतः प्रार्थितार्थसिद्धिमवापन् ॥ ३३ ॥ शेषाणां केवलिनामशेषमतवेदिगणभृतां साधूनां। गिरितलविवरदरीसरिदुरुवनतरु-विटपिजलत्रिदहनशिखासु ।३४। मोक्षगतिहेतुभूतस्थानानि सुरेन्द्ररुन्द्रभक्तिनुतानि। मंगलभूतान्येतान्यङ्गीकृतधर्मकर्मणामस्माकम् ॥३५॥

जिनपतयस्तत्प्रतिमास्तदालयास्तन्निषद्यका स्थानानि । ते ताश्च ते च तानि च भवन्तु भवघातहेतवो भव्यानाम् ॥३६॥ संध्यासु तिसृषु नित्यं, पठेद्यदि स्तोत्रमेतदुत्तमयशसाम् । सर्वज्ञानां सार्वं, लघु लभते श्रुतधरेडितं पदममितम् ॥ ३७ ॥ नित्यं निःस्वेदत्वं निर्मलता क्षीरगौररुधिरत्वं च । स्वाद्याकृतिसंहनने सौरूप्यं सौरभं च सौलक्ष्यम् ॥ ३८ ॥ अप्रमितवीर्यता च प्रियहितवादित्वमन्यदमितगुणस्य । प्रथिता दशसंख्याता स्वतिशयधर्माः स्वयंभुवो देहस्य ॥ ३९ ॥ गव्यूतिशतचतुष्टयसुभिक्षतागगनगमनमप्राणिवधः ॥ भुक्त्युपसर्गाभावश्चतुरास्यत्वं च सर्वविद्येश्वरता ॥४०॥ अच्छायत्वमपक्ष्मस्पंदश्च समप्रसिद्धनखकेशत्वं । स्वतिशयगुणा भगवतो घातिक्षयजा भवंति तेपि दशैव ॥ ४१ ॥ सार्वार्धमागधीया भाषा मैत्री च सर्वजनताविषया । सर्वर्तुफलस्तवकप्रवालकुसुमोपशोभिततरुपरिणामा ॥ ४२ ॥ आदर्शतलप्रतिमा रत्नमयी जायते मही च मनोज्ञा । विहरणमन्वेत्यनिलः परमानंदश्च भवति सर्वजनस्य ॥ ४३ ॥ मरुतोऽपि सुरभिगंधव्यामिश्रा योजनान्तरं भूभागं । व्युपशमितधूलिकंटकतृणकीटकशर्करोपलं प्रकुर्वन्ति॥४४॥ तदनु स्तनितकुमारा विद्युन्मालाविलासहासविभूषाः । प्रकिरन्ति सुरभिगंधिं गंधोदकवृष्टिमाज्ञया त्रिदशपतेः ॥ ४५ ॥ वरपद्मरागकेसरमतुलसुखस्पर्शहेममयदलनिचयम् । पादन्यासे पद्मं सप्त पुरः पृष्टतश्च सप्त भवंति ॥४६॥ फलभारनम्रशालिव्रीह्यादिसमस्तसस्यधृतरोमांचा । परिहृषितेव च भूमिस्त्रिभुवननाथस्य वैभवं पश्यंती ॥४७॥ शरदुदयविमलसलिलं सर इव गगनं विराजते

विगतमलम् । जहति च दिशस्तिमिरिकां विगतरजःप्रभृतिजिह्मताभावं सद्यः ॥४८॥ एतेतेति त्वरितं ज्योतिर्व्यंतरदिवौकसामृतभुजः । कुलिशभृदाज्ञापनया कुर्वन्त्यन्ये समन्ततो व्याह्वानम् ॥ ४६ ॥ स्फुरदरसहस्ररुचिरं विमलमहारत्नकिरणनिकरपरीतम् । प्रहसितकिरणसहस्रद्युतिमंडलमग्रगामि धर्मसुचक्रम् ॥ ५० ॥ इत्यष्टमंगलं च स्वादर्शप्रभृति भक्तिरागपरीतैः । उपकल्प्यन्ते त्रिदशैरेतेऽपि निरुपमातिविशेषाः ॥ ५१ ॥ वैडूर्यरुचिरविटपप्रवालमृदुपल्लवोपशोभितशाखः । श्रीमानशोकवृक्षो वरमरकतपत्रगहनबहलच्छायः ॥५२॥ मंदारकुन्दकुवलयनीलोत्पलकमलमालतीबकुलाद्यैः । समदभ्रमरपरीतैर्व्यामिश्रा पतति कुसुमवृष्टिर्नभसः ॥५३॥ कटकटिसूत्रकुण्डलकेयूरप्रभृतिभूषितांगौ स्वंगौ । यक्षौ कमलदलाक्षौ परिनिक्षिपतः सलीलचामरयुगलम् ॥५४॥ आकस्मिकमिव युगपद्दिवसकरसहस्रमपगतव्यवधानम् । भामंडलमविभावितरात्रिंदिवभेदमतितरामाभाति ॥ ५५ ॥ प्रबलपवनाभिघातप्रक्षुभितसमुद्रघोषमन्द्रध्वानम् । दंध्वन्यते सुवीणावंशादिसुवाद्यदुन्दुभिस्तालसमम् ॥ ५६ ॥ त्रिभुवनपतितालांछनमिंदुत्रयतुल्यमतुलमुक्ताजालम् । छत्रत्रयं च सुबृहद्वैडूर्यविक्लृप्तदंडमधिकमनोज्ञम् ॥५७॥ ध्वनिरपि योजनमेकं प्रजायते श्रोत्रहृदयहारिगभीरः । ससलिलजलधरपटलध्वनितमिव प्रविततान्तराशावलयम् ॥५८॥ स्फुरितांशुरत्नदीधितिपरिविच्छुरितामरेन्द्रचापच्छायम् । ध्रियते मृगेन्द्रवर्यैः स्फटिकशिलाघटितसिंहविष्टरमतुलम् ॥५९॥ यस्येह चतुस्त्रिंशत्प्रवरगुणा प्रातिहार्यलक्ष्म्यश्चाष्टौ तस्मै नमो भगवते

त्रिभुवनपरमेश्वरार्हते गुणमहते ॥ ६० ॥ इच्छामि भंते ! णंदीसरभत्तिकाउस्सग्गो कओ । तस्सालोचेउं णंदीसरदीवम्मि चउदिसिविदिसासु अंजणदधिमुहरदिकरपुरुणगवरेसु जाणि जिणचेइयाणि ताणि सव्वाणि तिसुवि लोएसु भवणवासियवाणविंतरजोइसियकप्पवासियत्ति चउविहा देवा सपरिवारा दिव्वेहि गंधेहि, दिव्वेहि पुप्फेहि, दिव्वेहि धुव्वेहि, दिव्वेहि चुण्णेहि, दिव्वेहि वासेहि, दिव्वेहिं ण्हाणेहि आसाढकत्तियफागुणमासाणं अट्ठमिमाइं काऊण जाव पुण्णिमंति णिच्चकालं अच्चंति,पूजन्ति, वंदंति, णमंसंति, णंदीसरमहाकल्लाणं करंति । अहमवि इह संतो तत्थसंताइं णिच्चकालं अंचेमि, पूजेमि, वंदामि, णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो, सुगइगमणं, समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं ॥

५५–दैवसिकरात्रिकप्रतिक्रमणम् ।

जीवे प्रमादजनिताः प्रचुराः प्रदोषा
यस्मात् प्रतिक्रमणतः प्रलयं प्रयान्ति ।
तस्मात्तदर्थममलं मुनिबोधनार्थम्
वक्ष्ये विचित्रभवकर्मविशोधनार्थम् ॥१॥

पापिष्ठेन दुरात्मना जडधिया मायाविना लोभिना
रागद्वेषमलीमसेन मनसा दुष्कर्मयन्निर्मितम् ।
त्रैलोक्याधिपते जिनेन्द्र ! भवतः श्रीपादमूलेऽधुना
निन्दापूर्वमहं जहामि सततं वर्वर्तिषुः सत्पथे ॥२॥

खम्मामि सव्वजीवाणं सव्वे जीवा खमंतु मे ।
मित्ती मे सव्वभूदेसु वेरं मज्झं ण केण वि ॥३॥

रागबंधपदोसं च हरिसं दीणभावयं ।
उस्सुगत्तं भयं सोग रदिमरदिं च वोस्सरे ॥४॥

हा ! दुट्ठकयं हा ! दुट्ठचिंतियं भासियं च हा दुट्ठं ।
अंतोअंतो डज्झामि पच्छुत्तावेण वेदंतो ॥५॥

दव्वे खेत्ते काले भावे य कदावराहसोहणयं ।
णिंदणगरहणजुत्तो मणवचकाएण पडिक्कमणं ॥६॥

एइंदिया, वेइन्दिया, तेइन्दिया, चतुरिंदिया, पंचिंद्रिया, पुढविकाइया, आउकाइया, तेउकाइया, वाउकाइया, वणप्फदिकाइया, तसकाइया, एदेसिं उद्दावणं परिदावणं विराहणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमण्णिदो तस्स मिच्छा मे दुक्कडं।

वदसमिदिंदियरोधो लोचो आवासयमचेलमण्हाणं ।
खिदिसयणमदंतवणं ठिदिभोयणमेयभत्तं च ॥१॥

एदे खलु मूलगुणा समणाणं जिणवरेहिं पण्णत्ता ।
एत्थ पमादकदादो अइचारादो णियत्तो हं ॥ २ ॥

छेदोवट्ठावणं होदु मज्झं ।

पंचमहाव्रत-पंचसमिति-पंचेंद्रियरोध-लोच-षडावश्यकक्रिया अष्टाविंशतिमूलगुणाः उत्तमक्षमामार्दवार्जवशौचसत्यसंयमतपस्त्यागाकिंचन्यब्रह्मचर्याणि दशलाक्षणिको धर्मः, अष्टादशशील-

सहस्राणि, चतुरशीतिलक्षगुणाः, त्रयोदशविधं चारित्रं, द्वादशविधं तपश्चेति सकलं सम्पूर्णं अर्हत्सिद्धाचार्योपाध्यायसर्वसाधुसाक्षिकं, सम्यक्त्वपूर्वकं दृढव्रतं सुव्रतं समारूढं ते मे भवतु ।

अथ सर्वातिचारविशुद्ध्यर्थं दैवसिकप्रतिक्रमणक्रियायां कृतदोषनिराकरणार्थं पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावंदनास्तवसमेतं आलोचनासिद्ध भक्तिकायोत्सर्गं करोम्यहं--

इति प्रतिज्ञाप्य णमो अरहंताणमित्यादि सामायिकदंडकं पठित्वा कायोत्सर्गं कुर्यात्) । थोसामीत्यादि (चतुर्विंशतिस्तवं पठेत्)

श्रीमते वर्धमानाय नमो नमितविद्विषे ।
यज्ज्ञानान्तर्गतं भूत्वा त्रैलोक्यं गोष्पदायते ॥१॥
तवसिद्धे णयसिद्धे संजमसिद्धे चरित्तसिद्धे य ।
णाणम्मि दंसणम्मि य सिद्धे सिरसा णमंसामि ॥ २ ॥

इच्छामि भंते ! सिद्धभत्तिकाओसग्गो कओ तस्सालोचेउं, सम्मणाणसम्मदंसणसम्मचरित्तजुत्ताणं, अट्ठविहकम्ममुक्काणं, अट्ठगुणसंपण्णाणं,उड्ढलोयमत्थयम्मि पयिट्ठियाणं, तवसिद्धाणं णयसिद्धाणं, संजमसिद्धाणं, चरित्तसिद्धाणं,अतीदाणागदवट्टमाणकालत्तयसिद्धाणं,सव्वसिद्धाणं णिच्चकालं अंचेमि पूजेमि वंदामि णमंसामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुणसंपत्ती होउ मज्झं ।

आलोचना--

इच्छामि भंते ! चरित्तायारो तेरसविहो परिविहाविदो, पंचमहव्वदाणि पंचसमिदीओ तिगुत्तीओ चेदि । तत्थ पढमे महव्वदे

पाणादिवादादो वेरमणं, से पुढविकाइया जीवा असंखेज्जासंखेज्जा, आउकाइया जीवा असंखेज्जा संखेज्जा, तेउकाइया जीवा असंखेज्जा-संखेज्जा, वाउकाइया जीवा असंखेज्जासंखेज्जा, वणप्फदिकाइया जीवा अणंता हरिआ वीआ अंकुरा छिण्णा भिण्णा, तेसिं उद्दावणं परिदावणं विराहणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमण्णिदो तस्स मिच्छा मे दुक्कडं ॥ १ ॥

वेइन्दिया जीवा असंखेज्जासंखेज्जा कुक्खिकिमि-संखखुल्लुय-वराडय-अक्खु-रिट्ठवाल-संबुक्क-सिप्पि-पुलविकाइया तेसिं उद्दावणं परिदावणं विराहणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमण्णिदो तस्स मिच्छा मे दुक्कडं ॥ २ ॥

तेइंदिया जीवा असंखेज्जासंखेज्जा कुन्थु-देहिय-विंछिय-गोभिंद-गोजुव-मक्कुण-पिपीलियाइया, तेसिं उद्दावणं परिदावणं विराहणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमण्णिदो तस्स मिच्छा मे दुक्कडं ॥ ३ ॥

चउरिंदिया जीवा असंखेज्जासंखेज्जा दंसमसय-मक्खि-पयंग-कीड-भमर-महुयर-गोमच्छियाइया, तेसिं उद्दावणं परिदावणं विराहणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमण्णिदो तस्स मिच्छा मे दुक्कडं ॥ ४ ॥

पंचिंदिया जीवा असंखेज्जासंखेज्जा अंडाइया पोदाइया जराइया रसाइया ससेदिमा सम्मुच्छिमा उब्भेदिमा उववादिमा अवि चउरासीदिजोणिपमुहसदसहस्सेसु, एदेसि उद्दावणं परिदावणं विराहणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमण्णिदो

तस्स मिच्छा मे दुक्कडं ॥ ५ ॥

प्रतिक्रमणपीठिकादण्डकः—

विख्यातं पुष्पदन्तं भवभयमथनं शीतलं लोकनाथं
श्रेयांसं शीलकोशं प्रवरनरगुरुं वासुपूज्यं सुपूज्यम् ।
मुक्तं दान्तेन्द्रियाश्वं विमलमृषिपतिं सिंहसेन्यं मुनीन्द्रं
धर्मं सद्धर्मकेतुं शमदमनिलयं स्तौमि शान्तिं शरण्यम् ॥४॥
कुन्थुं सिद्धालयस्थं श्रमणपतिमरं त्यक्तभोगेषु चक्रं
मल्लिं विख्यातगोत्रं खचरगणनुतं सुव्रतं सौख्यराशिम्
देवेन्द्राचार्य्यं नमीशं हरिकुलतिलकं नेमिचंद्रं भवान्तं
पार्श्वं नागेन्द्रवन्द्यं शरणमहमितो वर्द्धमानं च भक्त्या।५।

इच्छामि भंते ! चउवीसतित्थयरभत्तिकाउस्सग्गो कओ तस्सालोचेउ ! पंचमहाकल्लाणसंपण्णाणं, अट्ठमहापाडिहेर-

सहियाणं, चउतीसअतिसयविसेससंजुत्ताणं बत्तीसदेविंदमणिम-उडमत्थयमहियाणं बलदेववासुदेवचक्कहररिसिमुणिजइअणगारो-वगूढाणं, थुइसयसहस्सणिलयाणं, उसहाइवीरपच्छिमसंगलमहा-पुरिसाणं णिच्चकालं अंचेमि, पुज्जेमि, वंदामि, णमंसामि, दुक्खक्खओ, कम्मक्खओ, बाहिलाहो, सुगइगमणं, समाहिमरणं, जिणगुणसंपत्ति होउ मज्झं ।

देववन्दना-प्रयोगानुपूर्वी ।

देववन्दना के लिए श्रीजिनमन्दिर को जावें, वहाँ उचित स्थान में बैठकर दोनों हाथों और दोनों पैरों को धोवें । अनन्तर—

"निसही निसही निसही"

ऐसा तीन बार उच्चारण कर चैत्यालय में प्रवेश करें; वहां जिनेन्द्रदेव के मुख का अवलोकन कर तीन बार प्रणाम करें । अनन्तर "दृष्टं जिनेन्द्रभवनं भवतापहारि" इत्यादि दर्शन-स्तोत्र को वन्दना मुद्रा जोड़ कर पढ़ते हुए चैत्यालय की तीन प्रदक्षिणा देवें । प्रत्येक दिशा में तीन तीन आवर्त और एक एक शिरोनति करते जावें ।

अनन्तर खड़ा रह कर, दोनों पैरों को समान कर, चार अंगुल का अन्तर रख कर और दोनों हाथों को मुकुलित कर नीचे लिखा "ऐर्यापथिक दोषविशुद्धिपाठ" पढ़ें ।

—: ० :—

६०—ईर्यापथविशुद्धिः

पडिकमामि भंते! इरियावहियाए विराहणाए अणागुत्ते, अइगमणे णिग्गमणे, ठाणे, गमणे, चंकमणे, पाणुग्गमणे, बीजु-

ग्गमणे, हरिदुग्गमणे, उच्चारपस्सवण-खेल-सिंहाण-वियडिपइट्ठावणियाए, जे जीवा एइन्दिया वा, वे इन्दिया वा, ते इंदिया वा चउरिंदिया वा, पंचिंदिया वा, णोल्लिदा वा, पेल्लिदा वा, संघट्टिदा वा, संघादिदा वा, परिदाविदा वा, किरिच्छिदा वा, लेस्सिदा वा, छिंदिदा वा, भिंदिदा वा, ठाणदो वा, ठाणचंकमणदो वा, तस्स उत्तरगुणं, तस्स पायच्छित्तकरणं, तस्स विसोहिकरणं, जाव अरहंताणं भयवंताणं णमोकारं पज्जुवासंकरेमि ताव कायं पावकम्मं दुच्चरियं वोस्सरामि ।

आलोचना— ईर्यापथे प्रचलिताद्य मया प्रमादा—

देकेन्द्रियप्रमुखजीवनिकायबाधा ।
निर्वर्तिता यदि भवेदयुगान्तरेक्षा
मिथ्या तदस्तु दुरितं गुरुभक्तितो मे ॥१॥

इच्छामि भंते ! आलोचेउं इरियावहियस्स पुव्वुत्तरदक्खिणपच्छिमचउदिसविदिसासु विरहमाणेण जुगंतरदिट्ठिणा भव्वेण दट्ठव्वा। पमाददोसेण डवडवचरियाए पाणभूदजीवसत्ताणं उवघादो कदो वा कारिदो वा कीरंतो वा समणुमणिदो तस्स मिच्छा मे दुक्कडं ।

अनन्तर उठकर गुरुको अथवा देवको पंचांग नमस्कार करें पुनः गुरु के समक्ष अथवा गुरु दूर हो तो देवके समक्ष बैठकर देववंदना करे ।

—

६१ देववंदना

नमोऽस्तु भगवन् ! देववन्दनां करिष्यामि ।

अनन्तर पर्यंकासन से बैठ कर नीचे लिखा मुख्य मंगल पढ़ें ।

सिद्धं सम्पूर्णभव्यार्थसिद्धेः कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञानचारित्रप्रतिपादनम् ॥ १ ॥
सुरेन्द्रमुकुटाश्लिष्टपादपद्मांशुकेशरम् ।
प्रणमामि महावीरं लोकत्रितयमंगलम् ॥२॥

अनन्तर बैठे बैठे ही नीचे लिखा पाठ पढ़ कर सामायिक स्वीकार करें।

खम्मामि सव्वजीवाणं सव्वे जीवा खमंतु मे ।
मित्ती मे सव्वभूदेसु वेरं मज्झं ण केण वि ॥१॥
रायबंधं पदोसं च हरिसं दीणभावयं ।
उस्सुगत्तं भयं सोगं रदिमरदिं च वोस्सरे ॥२॥
हा दुट्ठकयं हा दुट्ठचिंतियं भासियं च हा दुट्ठं ।
अंतोअंतो डज्झमि पच्छुत्तावेण वेयंतो ॥३॥
दव्वे खेत्ते काले भावे य कदावराहसोहणयं ।
णिंदणगरहणजुत्तो मणवचकाएण पडिकमणं ॥४॥
समता सर्वभूतेषु संयमः शुभभावना ।
आर्तरौद्रपरित्यागस्तद्धि सामायिकं मतं ॥ ५ ॥

भगवन्नमोऽस्तु प्रसीदंतु प्रभुपादा वंदिष्येऽहं, एषोऽहं सर्वसावद्ययोगाद्विरतोऽस्मि ।

अथ पौर्वाह्णिकं पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं चैत्यभक्तिकायोत्सर्गं करोमि ।

इस तरह कृत्यविज्ञापना कर खड़े हो कर भूमि-स्पर्शनात्मक पंचांग नमस्कार करें पश्चात् जिनप्रतिमा के सन्मुख चार अंगुल प्रमाण दोनों पैरों का अन्तर कर खड़े होवें। तीन आवर्त और एक शिरोनमन करें। पश्चात् मुक्ता-शुक्ति मुद्रा जोड़ कर नीचे लिखा सामायिक दण्डक पढ़ें। पहले उच्छ्वास में अर्हंत—सिद्ध मंत्र का, दूसरे में आचार्य-उपाध्याय मन्त्र का और तीसरे में सर्व-साधु मन्त्र का स्वश्रवणगोचर जिसे दूसरा न सुन सके इस तरहएक बार उच्चारण कर पश्चात् चत्तारि दण्डक स्तोत्र को समीपस्थ मनुष्य के कानों को मनोहर मालूम पड़े ऐसी सुरीली आवाज से पढ़ें। तद्यथा—

६२—सामायिक दंडक—

णमो अरहंताणं णमो सिद्धाणं (१) णमो आइरियाणं।
णमो उवज्झायाणं (२) णमो लोए सव्व साहूणं (३) ॥१॥

चत्तारि मंगलं-अरहंत मंगलं, सिद्ध मंगलं, साहू मंगलं, केवलिपण्णत्तो धम्मो मंगलं। चत्तारि लोगुत्तमा-अरहंत लोगुत्तमा, सिद्ध लोगुत्तमा, साहू लोगुत्तमा, केवलिपण्णत्तो धम्मो लोगुत्तमा। चत्तारि सरणं पव्वज्जामि-अरहंतसरणं पव्वज्जामि, सिद्धसरणं पव्वज्जामि, साहूसरणं पव्वज्जामि, केवलिपण्णत्तो धम्मो सरणं पव्वज्जामि।

अड्ढाइज्जदोवदोसमुद्देसु पण्णारसकम्मभूमिसु जाव अरहंताणं भयवंताणं आदियराणं तित्थयराणं जिणाणं जिणोत्तमाणंकेवलियाणं सिद्धाणं बुद्धाणं परिणिव्वुदाणं अन्तयडाणं पारयडाणं, धम्माइरियाणं, धम्मदेसियाणं, धम्मणायगाणं, धम्मवरचाउरंग-चक्कवट्टीणं देवाहिदेवाणं णाणाणं दंसणाणं चरित्ताणं सदा करेमि किरियम्मं।

करेमि भंते ! सामइयं (देववन्दनां) सव्वसावज्जजोगं पच्चक्खामि जावज्जीवं (आवन्नियमं) तिविहेण मणसा वचसा काएण ण करेमि ण कारेमि कीरंतं पि ण समणुमणामि । तस्स भंते ! अइचारं पच्चक्खामि, णिंदामि गरहामि अप्पाणं, जाव अरहंताणं भयवंताणं पज्जुवासं करेमि ताव काल पावकम्मं दुच्चरियं वोस्सरामि ।

इस प्रकार उक्त सामायिक दण्डक पढ़कर पुनः तीन आवर्त और एक शिरोनति करें। पश्चात् जिनमुद्रा जोड़कर कायोत्सर्ग करें जिसमें "णमो अरहंताणं" इत्यादि मन्त्र का सत्ताईस उच्छवासों में नौ बार पूर्वोक्त विधि के अनुसार जाप देवें या चिंतवन करें।

अनन्तर भूमिस्पर्शनात्मक पंचांग नमस्कार करें पश्चात् पूर्वोक्त विधि से खड़े होकर तीन आवर्त और एक शिरोनति कर नीचे लिखा "चतुर्विंशतिस्तव" पढ़ें । तद्यथा;—

६३ चतुर्विंशतिस्तव

थोस्सामि हं जिणवरे तित्थयरे केवली अणंतजिणे ।
णरपवरलोयमहिए विहुयरयमले महप्पण्णे ॥ १ ॥
लोयस्सुज्जोययरे धम्मंतित्थंकरे जिणे वंदे ।
अरहंते कित्तिस्से चउवीसं चेव केवलिणो ॥२॥
उसहमजियं च वंदे संभवमभिणंदणं च सुमइं च ।
पउमप्पहं सुपासं जिणं च चंदप्पहं वन्दे ॥ ३ ॥
सुविहिं च पुप्फयंतं सीयल सेयं च वासुपुज्जं च ।
विमलमणंतं भयवं धम्मं संतिं च वंदामि ॥ ४ ॥

कुन्थुं च जिणवरिंदं अरं च मल्लिं च सुव्वयं च णमिं
वंदामि रिट्ठणेमिं तह पासं वड्ढमाणं च ॥ ५ ॥
एवं मए अभिथुआ विहुयरयमला पहीणजरमरणा ।
चउवीसं पि जिणवरा तित्थयरा मे पसीयंतु ॥ ६ ॥
कित्तिय वंदिय महिया एदे लोगोत्तमा जिणा सिद्धा ।
आरोग्गणाणलाहं दिंतु समाहिं च बोहिं ॥ ७ ॥
चंदेहिं णिम्मलयरा आइच्चेहिं अहियपयासंता ।
सायरमिव गंभीरा सिद्धा सिद्धिं मम दिसंतु ॥ ८ ॥

अनन्तर तीन आवर्त और एक शिरोनति करें। इस तरह एक कायोत्सर्ग में दो प्रणाम, बारह आवर्त और चार शिरोनमन हुए। सामायिक दण्डक के आदि में तीन आवर्त और एक शिरोनमन, अन्त में तीन आवर्त और एक शिरोनमन, तथा चतुर्विंशतिस्तव के आदि में तीन आवर्त और एक शिरोनमन और अन्त में तीन आवर्त और एक शिरोनमन एवं बारह आवर्त और चार शिरोनमन तथा सामायिक दण्डक के आदि में तीन आवर्त और एक शिरोनमन के पहले अथ पौर्वाह्निक इत्यादि क्रिया विज्ञापन कर खड़े होने के पीछे एक पंचांग भूमिस्पर्शनात्मक नमस्कार तथा चतुर्विंशतिस्तव दण्डकके आदि में तीन आवर्त और एक शिरोनमन के पहले तथा कायोत्सग के अनन्तर एक पंचांग नमस्कार एवं दो प्रणाम एक कायोत्सर्ग में हुए।

अनन्तर तीन प्रदक्षिणा देते हुए और प्रति दिशा में तीन तीन आवर्त और एक एक शिरोनमन करते हुए निम्नलिखित सत्य विज्ञापन करके चैत्यभक्ति पढ़े।

अथ पौर्वाह्णिकदेववंदनायां चैत्यभक्तिकायोत्सर्गं करोम्यहम्

चैत्यभक्ति अञ्जलिका सहित पढ़ कर निम्नलिखित कृत्य विज्ञापन करके पंचमहागुरु भक्ति अञ्चलिका सहित पढ़े।

अथ पौर्वाह्णिकं पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं पंचमहागुरुभक्तिकायोत्सर्गं करोमि।

(अञ्चलिका सहित पंच महा गुरुभक्ति पढ़ कर निम्नांकित कृत्य विज्ञापन करके लघु समाधिभक्ति (प्रिय भक्ति) अंचलिका सहित पढ़ कर वन्दना समाप्ति का कायोत्सर्ग करे।

अथ पौर्वाह्णिकदेव वन्दनायां पूर्वाचार्यानुक्रमेण सकल कर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं श्रीचैत्यपंचगुरुभक्ती विधाय तद्धीनाधिकत्वादिदोषविशुद्ध्यर्थं आत्मपवित्रीकरणार्थं समाधिभक्तिकायोत्सर्गं करोमि।

६४—सर्वदोषप्रायश्चित्तविधिर्लिख्यते ।

ॐ ह्रीं अर्हं अ सि आ उ सा त्रयस्त्रिंशदत्यासादनात्यागानुष्ठितप्रोषधोद्योतनाय नमः ॥ १ ॥ ॐ ह्रीं अर्हं अहिंसामहाव्रतस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ २ ॥ ॐ ह्रीं अर्हं सत्यमहाव्रतस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ ३ ॥ ॐ ह्रीं अर्हं अचौर्यमहाव्रतस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ ४ ॥ ॐ ह्रीं अर्हं ब्रह्मचर्यमहाव्रतस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ ५ ॥ ॐ ह्रीं अर्हं अपरिग्रहमहाव्रतस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ ६ ॥ ॐ ह्रीं अर्हं ईर्यासमितेरत्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ ७ ॥ ॐ ह्रीं अर्हं भाषासमितेरत्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ ८ ॥ ॐ ह्रीं अर्हं एषणासमितेरत्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ।९।

ॐ ह्रीं अर्हं आदाननिक्षेपणसमितेरत्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ १० ॥ ॐ ह्रीं अर्हं उत्सर्गसमितेरत्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥११॥ ॐ ह्रीं अर्हं मनोगुप्तेरत्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥१२॥ ॐ ह्रीं अर्हं वचोगुप्तेरत्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥१३॥ ॐ ह्रीं अर्हं कायगुप्तेरत्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ १४ ॥ ॐ ह्रीं अर्हं जीवास्तिकायिकस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ १५ ॥ ॐ ह्रींअर्हंपुद्गलास्तिकायिकस्यात्सात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनायनमः ॥१६॥ ॐ ह्रीं अर्हं धर्मास्तिकायिकस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥१७॥ ॐ ह्रीं अर्हं अधर्मास्तिकायिकस्यात्यसादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ।१८ ॐ ह्रीं अर्हं आकाशास्तिकायिकस्यात्यासादनात्यागायानुष्ठितप्रोषद्योतनाय नमः ॥ १९ ॥ ॐ ह्रीं अर्हं पृथ्वीकायिकस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥२० ॥ ॐ ह्रीं अर्हं अप्कायिकस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः२१ ॐ ह्रीं अर्हं तेजः कायिकस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ २२ ॥ ॐ ह्रीं अर्हं वायुकायिकस्यात्यासादनात्यागानुष्ठितप्रोषधोद्योतनाय नमः ॥ २३ ॥ ॐ ह्रीं अर्हं वनस्पतिकायिकस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः।२४ ॐ ह्रीं अर्हं त्रसकायिकस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ २५ ॥ ॐ ह्रीं अर्हं जीवपदार्थस्यात्यासादनात्या-

गायानुष्ठितप्रोषधोद्योतनाय नमः ॥ २६ ॥ ॐ ह्रीं अर्हं अजीव-पदार्थस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः २७ ॥ ॐ ह्रीं अर्हं आस्रवपदार्थस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ २८ ॥ ॐ ह्रीं अर्हं बंधपदार्थस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ २९ ॥ ॐ ह्रीं अर्हं संवर-पदार्थस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥३०॥ ॐ ह्रीं अर्हं निर्जरापदार्थस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ ३१ ॥ ॐ ह्रीं अर्हं मोक्षपदार्थस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ ३२ ॥ ॐ ह्रीं अर्हं पुण्य-पदार्थस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥ ३३॥ ॐ ह्रीं अर्हं पापपदार्थस्यात्यासादनात्यागायानुष्ठितप्रोषधोद्योतनाय नमः ॥३४॥ ॐ ह्रीं अर्हं सम्यग्दर्शनाय नमः ॥ ३५ ॥ ॐ ह्रीं अर्हं सम्यग्ज्ञानाय नमः ॥ ३६ ॥ ॐ ह्रीं अर्हं सम्यक् चारित्राय नमः ॥ ३७ ॥

इति सर्वदोषप्रायश्चित्तविधिः ।

---

६९ अथ चतुर्दिशि वंदना ।

प्राग्दिग्विदिगन्तरि केवलिजिनसिद्ध साधुगणदेवाः । ये सर्वर्द्धिसमृद्धा योगिगणांस्तानऽहं वन्दे ॥१॥ दक्षिणदिग्विदिगन्तरि केवलिजिनसिद्धसाधुगणदेवाः ये सर्वर्द्धिमृद्धा ॥ २ ॥ पश्चिमदिग्विदिगन्तरि केवलिजिनसिद्धसाधुगणदेवाः । ये सर्व-

र्द्धिसमृद्धा० ॥ ३ ॥ उत्तरदिग्विदिगन्तरि केवलिजिनसिद्धसाधु-गणदेवाः । ये सर्वर्द्धिसमृद्धा० ॥ ४ ॥

इति चतुर्दिशि वन्दना ॥

६६ भूतकालतीर्थङ्कराः ।

१ श्रीनिर्वाण २ सागर ३ महासाधु ४ विमलप्रभ ५ श्रीधर ६ सुदत्त ७ अमलप्रभ ८ उद्धर ९ अङ्गिर १० सन्मति ११ सिंधु १२ कुसुमांजलि १३ शिवगण १४ उत्साह १५ ज्ञानेश्वर १६ परमेश्वर १७ विमलेश्वर १८ यशोधर १९ कृष्णमति २० ज्ञानमति २१ शुद्धमति २२ श्रीभद्र २३ अतिक्रांत २४ शांताश्चेति भूतकालसंबन्धिचतुर्विंशतितीर्थङ्करेभ्यो नमो नमः ॥

६७ वर्तमानकालतीर्थङ्कराः ।

१ ऋषभ २ अजित ३ शंभव ४ अभिनन्दन ५ सुमति ६ पद्मप्रभ ७ सुपार्श्व ८ चंद्रप्रभ ९ पुष्पदंत १० शीतल ११ श्रेयान् १२ वासुपूज्य १३ विमल १४ अनंत १५ धर्म १६ शांति १७ कुन्थु १८ अर १९ मल्लि २० मुनिसुव्रत २१ नमि २२ नेमि २३ पार्श्व २४ वर्द्धमानाश्चेति वर्तमान-कालसंबन्धि चतुर्विंशतितीर्थङ्करेभ्यो नमो नमः ॥

६८ भविष्यत्कालतीर्थङ्कराः ।

१ श्रीमहापद्म २ सुरदेव ३ सुपार्श्व ४ स्वयंप्रभ ५ सर्वा-

त्मभूत ६ देवपुत्र ७ कुलपुत्र ८ उदंक ९ प्रौष्ठिल १० जयकीर्ति ११ मुनिसुव्रत १२ अर (अप्तम) १३ निष्पाप १४ निष्कषाय १५ विमल १६ निर्मल १७ चित्रगुप्त १८ समाधिगुप्त १९ स्वयंभू २० अनिवृत्तिक २१ जय २२ विमल २३ देवपाल २४ अनन्तवीर्याश्चेति भविष्यत्काल संबन्धिचतुर्विंशतितीर्थङ्करेभ्यो नमो नमः

६९ विदेहक्षेत्रस्थविंशतितीर्थङ्कराः ।

१ सीमंधर २ युगमंधर ३ बाहु ४ सुबाहु ५ सुजात ६ स्वयंप्रभु ७ वृषभानन ८ अनंतवीर्य ९ सुरप्रभ १० विशालकीर्ति ११ वज्रधर १२ चंद्रानन १३ भद्रबाहु १४ भुजंगम १५ ईश्वर १६ नेमप्रभ (नमि) १७ वीरसेन १८ महाभद्र १९ देवयश २० अजितवीर्याश्चेतिविदेहक्षेत्रस्थविंशतितीर्थङ्करेभ्यो नमो नमः ॥

---

७० अथ नमस्कारमन्त्राः

णमो अरिहंताणं । णमो सिद्धाणं । णमो आइरियाणं । णमो उवज्झायाणं । णमो लोए सव्वसाहूणं ॥१॥ मन्त्रं संसारसारं त्रिजगदनुपमं सर्वपापारिमन्त्रं । संसारोच्छेदमन्त्रं विषमविषहरं कर्मनिर्मूलमन्त्रम् । मन्त्रं सिद्धिप्रदानं शिवसुखजननं केवलज्ञानमन्त्रं । मन्त्रं श्रीजैनमन्त्रं जप जप जपितं जन्मनिर्वाणमन्त्रम् ॥ २ ॥ आकृष्टिं सुरसंपदां विदधते मुक्तिश्रियो वश्यताम् उच्चाटं विपदां चतुर्गतिभुवां विद्वेषमात्मैनसाम् ॥ स्तम्भं दुर्गमनं

प्रति प्रयततो मोहस्य सम्मोहनं। पायात्पंचनमस्क्रियाक्षरमयी साराधना देवता ॥३॥ अनन्तानन्तसंसारसन्ततिच्छेदकारणम्। जिनराजपदाम्भोजस्मरणं शरणं मम ॥ ४ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम। तस्मात्कारुण्यभावेन रक्ष रक्ष जिनेश्वर ॥ ५ ॥ न हि त्राता न हि त्राता न हि त्राता जगत्त्रये। वीतरागात्परो देवो न भूतो न भविष्यति ॥ ६ ॥ जिने भक्तिर्जिने भक्तिर्जिने भक्तिर्दिने दिने। सदा मेऽस्तु सदा मेऽस्तु सदा मेऽस्तु भवे भवे ॥ ७ ॥

—:०:—

७१ महावीराष्टकस्तोत्रम्

[शिखरिणी]

यदीये चैतन्ये मुकुर इव भावाश्चिदचितः। समं भांति ध्रौव्यव्ययजनिलसंतोऽन्तरहिताः ॥ जगत्साक्षी मार्गप्रकटनपरो भानुरिव यो। महावीरस्वामी नयनपथगामी भवतु मे (नः) ॥१॥ अताम्रं यच्चक्षुः कमलयुगलं स्पंदरहितं। जनान्कोपापायं प्रकटयति वाभ्यंतरमपि ॥ स्फुटं मूर्तिर्यस्य प्रशमितमयी वातिविमला। महावीर० ॥२॥ नमन्नाकेंद्रालीमुकुटमणिभाजालजटिलं। लसत्पादांभोजद्वयमिह यदीयं तनुभृतां ॥ भवज्वालाशांत्यै प्रभवति जलं वा स्मृतमपि। महावीर० ॥३॥ यदर्चाभावेन प्रमुदितमना दर्दुर इह। क्षणादासीत्स्वर्गी गुणगणसमृद्धः सुखनिधिः ॥ लभंते सद्भक्ताः शिवसुखसमाजं किमु तदा। महावीर० ॥४॥ कनत्स्व-

ग्रामाग्रोऽप्यपगततनुर्ज्ञाननिवहो। विचित्रात्माप्येको नृपतिवर-सिद्धार्थतनयः॥ अजन्मापि श्रीमान् विगतभवरागोद्भुतगतिः। महावीर० ॥५॥ यदीया वाग्गङ्गा विविधनयकल्लोलविमला। बृहज्ज्ञानांभोभिर्जगति जनतां या स्नपयति॥ इदानीमप्येषा बुध-जनमरालैः परिचिता। महावीर० ॥६॥ अनिर्वारोद्रेकस्त्रिभुवन-जयी कामसुभटः। कुमारावस्थायामपि निजबलाद्येन विजितः॥ स्फुरन्नित्यानंदप्रशमपदराज्याय स जिनः। महावीर० ॥ ७ ॥ महामोहातङ्कप्रशमनपराकस्मिकभिषग्। निरापेक्षो बंधुर्विदित-महिमा मङ्गलकरः॥ शरण्यः साधूनां भवभयभृतामुत्तमगुणो। महावीर० ॥८॥ महावीराष्टकं स्तोत्रं भक्त्या भागेन्दुना कृतं। यः पठेच्छृणुयाच्चापि स याति परमां गतिम् ॥९॥

७२ चतुर्दशीक्रिया

अथ चतुर्दशीक्रियायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं श्रीचैत्यभक्तिकायोत्सर्गं करोमि--

इत्युच्चार्य सामायिकदंडकं पठित्वा कायोत्सर्गं कृत्वा तदनु चतुर्विंशतिस्तवं भणित्वा 'जयति भगवान्' इत्यादिकां चैत्यभक्तिं सांचलिकां पठेत्। एवं सर्वभक्तिकायोत्सर्गं पठितव्यम् भक्तिना पठेत्।

कायोत्सर्ग पुनः पंचांग प्रणाम, और चतुर्विंशतिजिनस्तुति इसके आदि और अंत में तीन तीन आवर्त और एक एक शिरोनति करके प्रत्येक भक्ति पढ़ना चाहिए। जिन जिन क्रियाओं में जितनी भक्तियों के पढ़ने का विधान हो उन सब को उक्त रीति से पढ़ कर अन्त में समाधिभक्ति पढ़ना चाहिए। और मुद्रा आदि का प्रयोग भी प्रथमाध्याय में बताई गई विधि के अनुसार करना चाहिए।

अथ चतुर्दशीक्रियायां ... ... श्रीश्रुतभक्तिकायोत्सर्गं करोमि—

अथ चतुर्दशीक्रियायां ... ... श्रीपंचमहागुरुभक्ति-कायोत्सर्गं करोमि—

अथ चतुर्दशीक्रियायां ... ... चैत्यभक्ति-श्रुतभक्ति-पंचगुरुभक्तीर्विधाय तद्धीनाधिकत्वादिदोषविशुद्ध्यर्थं समाधिभक्तिकायोत्सर्गं करोमि—

संस्कृतक्रियाकाण्डानुसारेण चतुर्दशीक्रिया यथा—

अथ चतुर्दशीक्रियायां ... ... सिद्धभक्तिकायोत्सर्गं करोमि—

अथ ... ... चैत्यभक्तिकायोत्सर्गं करोमि—

अथ ... ... श्रुतभक्तिकायोत्सर्गं करोमि—

अथ ... ... पंचगुरुभक्तिकायोत्सर्गं करोमि—

अथ ... ... शान्तिभक्तिकायोत्सर्गं करोमि—

अथ ... ... सिद्ध-चैत्य-श्रुत-पंचगुरु-शान्तिभक्तीः कृत्वा तद्धीनाधिकत्वादिदोषविशुद्ध्यर्थं समाधिभक्तिकायोत्सर्गं करोमि।

—✥—

१—चतुर्दशीक्रिया में सिद्धभक्ति, चैत्यभक्ति, श्रुतभक्ति, पंचगुरु-भक्ति और शान्तिभक्ति करना चाहिए।

विशेष—प्राकृतक्रियाकांड का और संस्कृतक्रियाकांड का उपदेश भिन्न भिन्न है। दोनों ही उपदेश ऊपर दिखाये गये हैं। उनमें से किसी एक के अनुसार चतुर्दशीक्रिया की जा सकती है।

७३-पाक्षिकीक्रिया

[1]चतुर्दशीदिने धर्मव्यासंगादिना क्रिया कर्तुं न लभ्येत चेत् पाक्षिकेऽष्टमीक्रिया कर्तव्या ।

अथ पाक्षिकीक्रियायां ·· सिद्धभक्तिकायोत्सर्गं करोमि–

अथ ·· ··· सालोचनाचारित्रभक्तिकायोत्सर्गं करोमि–

(भक्त्यंते 'इच्छामि भंते ! चरित्तायारोतेरसविहो' इत्यालोचना कार्या)

अथ ··· ··· ··· शान्तिभक्तिकायोत्सर्गं करोमि –

(शान्तिभक्तिं पठित्वा समाधिभक्तिं पठेत्)

संस्कृतक्रियाकाण्डानुसारेण यथा –

अथ पाक्षिकक्रियायां सिद्धभक्तिकायोत्सर्गं करोमि––

" " सालोचनं चारित्रभक्तिकायोत्सर्गं करोमि–

" " चैत्यभक्तिकायोत्सर्गं करोमि–

" " पंचगुरुभक्तिकायोत्सर्गं करोमि–

" " शान्तिभक्तिकायोत्सर्गं करोमि–

१—चतुर्दशी के दिन धर्मव्यासंग आदि के कारण क्रिया न कर पाये तो पूर्णिमा और अमावस के रोज अष्टमीक्रिया करना चाहिए।

२—यदी धर्मव्यासंग से चतुर्दशी के रोज चतुर्दशीक्रिया न की जा सके तो पूर्णिमा और अमावस के रोज पाक्षिकीक्रिया करना चाहिए।

३- पाक्षिकीक्रिया में सिद्धभक्ति, सालोचना चारित्रभक्ति, और शान्तिभक्ति करना चाहिए।

७४–अष्टमीक्रिया

अथ अष्टमीक्रियायां सिद्धभक्तिकायोत्सर्गं करोमि–
" " श्रुतभक्तिकायोत्सर्गं करोमि–
" " सालोचनं चारित्रभक्तिकायोत्सर्गं करोमि–
" " चैत्यभक्तिकायोत्सर्गं करोमि–
" " पंचगुरुभक्तिकायोत्सर्गं करोमि –
" " शान्तिभक्तिकायोत्सर्गं करोमि–

(इत्येवं प्रतिज्ञाप्य तत्तद्भक्तयो विधेयाः अन्तेप्रियभक्ति)

७५ सिद्धप्रतिमाक्रिया

अथ सिद्धप्रतिमाक्रियायां सिद्धभक्तिकायोत्सर्गं करोमि।
(इत्येवं प्रतिज्ञाप्य सिद्धभक्तिमञ्चलिकां पठेत्)

७६–तीर्थकृज्जन्मक्रिया

"अथ पाक्षिकीक्रियायां" इत्यस्यस्थाने "अथ तीर्थकृज्जन्म-क्रियायां" इत्युच्चार्य पाक्षिकीक्रिया कर्तव्या।

७७–पूर्वजिनचैत्यक्रिया

"अथ पूर्वजिनचैत्यक्रियायां" इत्युच्चार्य पाक्षिकीक्रिया कर्तव्या।

७८–अपूर्वचैत्यवंदनाक्रिया

"अथ अपूर्वचैत्यवंदनक्रियायां" इत्युच्चार्य पाक्षिकीक्रिया कर्तव्या।

७९–अनेकापूर्वचैत्यदर्शनक्रिया

"अथ अनेकापूर्व चैत्यदर्शनक्रियायां" इत्युच्चार्य पाक्षिको क्रिया कार्या।

८०–पाक्षिकादिप्रतिक्रमणक्रिया

(एषविधिः ३७३ पृष्ठंयावदुक्तो ज्ञेयः, श्रावकप्रतिक्रमणे तु "देवसिय" इत्यस्य स्थाने "पक्खिय" "चउम्मासिय" इत्यादि योज्यम्)।

८१–श्रुतपंचमी क्रिया

अथ श्रुतस्कंधप्रतिष्ठापनक्रियायां ... सिद्धभक्तिकायोत्सर्गं करोमि–

अथश्रुतस्कन्धप्रतिष्ठापनक्रियायां ... श्रुतभक्तिकायोत्सर्गं करोमि–
(एवं विज्ञाप्य तत्तद्भक्तये विधाय श्रुतावतारोपदेशः कार्यः) तदनु–

अथ स्वाध्यायप्रतिष्ठापनक्रियायां ... श्रुतभक्तिकायोत्सर्गं करोमि–

अथ स्वाध्यायप्रतिष्ठापनक्रियायां ... आचार्य भक्तिकायोत्सर्गं करोमि–

(एवं विज्ञाप्य भक्तिद्वयं विधाय स्वाध्यायं कुर्यात्) तदनु
अथ स्वाध्यायनिष्ठापनक्रियायां ... श्रुतभक्तिकायोत्सर्गं करोमि–
अथ श्रुतपंचमीक्रियायां ... शान्तिभक्तिकायोत्सर्गं करोमि–
(एवं विज्ञाप्य भक्तिद्वयमेतद्विधेयम्)

८२–सिद्धान्ताचारवाचनक्रिया

"अथ श्रुतस्कंध" श्रुतपंचमी "इत्यस्य च स्थाने "अथ सिद्धान्तवाचन" "आचारवाचन" इति वोच्चार्य श्रुतपंचमीक्रिया कार्या।

८३–सन्न्यासक्रिया

अथ सन्न्यासप्रतिष्ठापनक्रियायां ··· सिद्धभक्तिकायोत्सर्गं करोमि।

अथ सन्न्यासप्रतिष्ठापनक्रियायां ··· श्रुतभक्तिकायोत्सर्गं करोमि–

(सन्न्यासप्रतिष्ठापनम्)

अथ स्वाध्यायप्रतिष्ठापनक्रियायां श्रुतभक्तिकायोत्सर्गं०

अथ स्वाध्यायप्रतिष्ठापनक्रियायां ··· आचार्यभक्तिकायोत्सर्गं करोमि।

(अनन्तरं स्वाध्यायः कार्यः)

अथ स्वाध्यायनिष्ठापनक्रियायां श्रुतभक्तिकायोत्सर्गं करोमि।

अथ सन्न्यासनिष्ठापनक्रियायां ··· सिद्धभक्तिकायोत्सर्गं करोमि।

अथ सन्न्यासनिष्ठापनक्रियायां ··· श्रुतभक्तिकायोत्सर्गंकरोमि।

अथ सन्न्यासनिष्ठापनक्रियायां ··· शान्तिभक्तिकायोत्सर्गं करोमि।

(एवं विज्ञाप्य तत्तद्भक्तयो विधेयाः)

८४–अष्टाह्निकक्रिया

अथ अष्टाह्निकक्रियायां ··· सिद्धभक्तिकायोत्सर्गं करोमि।

अथ अष्टाह्निकक्रियायां ··· नन्दीश्वरचैत्यभक्तिकायोत्सर्गं करोमि।

अथ अष्टाह्निकक्रियायां ··· पंचगुरुभक्तिकायोत्सर्गं करोमि।

अथ अष्टाह्निकक्रियायां " शान्तिभक्तिकायोत्सर्गं करोमि। (एवं विज्ञाप्य तत्तद्भक्तयो विधेयाः)

८५-अभिषेकवन्दनाक्रिया

अथ अभिषेकवन्दनाक्रियायां ... सिद्धभक्तिकायोत्सर्गं करोमि।

अथ अभिषेकवन्दनाक्रियायां ... चैत्यभक्तिकायोत्सर्गं करोमि।

अथ अभिषेकवन्दनाक्रियायां ... पंचगुरुभक्तिकायोत्सर्गं०

अथ अभिषेकवन्दनाक्रियायां ... शान्तिभक्तिकायोत्सर्गं करोमि।

(एवं विज्ञाप्य तत्तद्भक्तयो विधेयाः)

८६-मंगलगोचरमध्याह्नवन्दनाक्रिया

अथ मंगलगोचरमध्याह्नवन्दनाक्रियायां इत्येवमुच्चार्य क्रमेण सिद्धभक्ति—चैत्यभक्ति -पंचगुरुभक्ति— शान्तिभक्तयो विधेयाः।

८७- मंगलगोचरबृहत्प्रत्याख्यानक्रिया

अथ मंगलगोचरभक्तप्रत्याख्यानक्रियायां......सिद्धभक्ति कायोत्सर्गं करोमि--('सिद्धानुद्धूत' इत्यादि)

१ - मङ्गलगोचर में बड़ी सिद्धभक्ति और बड़ी योगिभक्ति द्वारा भक्तप्रत्याख्यान ग्रहण करके बड़ी आचार्यभक्ति और शान्तिभक्ति को आचार्यादिक सब मिलकर पढ़ें।

अथ मंगलगोचरभक्तप्रत्याख्यानक्रियायां ......योगिभक्ति-कायोत्सर्गं करोमि--('जातिजरोरुरोग' इत्यादि)

(इत्येवं भक्तिद्वयेन प्रत्याख्यानं गृहीत्वा इदं भक्तिद्वयं प्रयुञ्जताम्)

अथ मंगलगोचरभक्तप्रत्याख्यानक्रियायां ...... आचार्य-भक्तिकायोत्सर्गं करोमि--('सिद्धगुरुस्तुति' इत्यादि)

अथ मंगलगोचरभक्तप्रत्याख्यानक्रियायां ...... शान्ति-भक्तिकायोत्सर्गं करोमि--(न स्नेहाच्छरणं इत्यादि)

८८—वर्षायोगग्रहणक्रिया

[१]ततश्चतुर्दशीपूर्वरात्रे सिद्धमुनिस्तुती।
चतुर्दिक्षु परीत्याल्पाश्चैत्यभक्तीगुरुस्तुतिम् ॥
शान्तिभक्तिं च कुर्वाणैर्वर्षायोगस्तु गृह्यताम्।

अथ वर्षायोगप्रतिष्ठापनाक्रियायां ...सिद्धभक्तिकायोत्सर्गं करोमि--(सिद्धिभक्ति-पठनं)

अथ वर्षायोगप्रतिष्ठापनाक्रियायां ......योगिभक्तिकायोत्सर्गं करोमि--(योगिभक्तिपठनं)

१—प्रत्याख्यानप्रयोगविधि के अनन्तर आषाढ़ शुक्ला चतुर्दशी की रात्रि के प्रथम पहर में सिद्धभक्ति और योगिभक्ति करके, चारों दिशाओं में प्रदक्षिणापूर्वक एक एक दिशा में लघुचैत्यभक्ति पढ़ते हुए, पंचगुरुभक्ति और शान्तिभक्ति पढ़ते हुए वर्षा योग ग्रहण करें। भावार्थ—पूर्व दिशा की ओर मुख करके पहले सिद्धभक्ति और योगि-भक्ति पढ़ें। चैत्यभक्ति को ऊपर बताये हुए विधान के अनुसार पूर्वादि दिशाओंकी ओर मुख करके चार बार पढ़ें। अथवा भावसे ही प्रदक्षिणा करना चाहिये। इसलिये एकही पूर्व या उत्तर दिशा में मुख करके उक्त रीति से चार बार चैत्यभक्ति पढ़ें। इस तरह वर्षायोग ग्रहण करें।

पूर्वस्याम् दिशि—

यावन्ति जिनचैत्यानि विद्यन्ते भुवनत्रये ।
तावन्ति सततं भक्त्या त्रिःपरीत्य नमाम्यहम् ॥

इमं श्लोकं पठित्वा वृषभाजितस्वयंभूस्तवद्वयमुच्चार्य 'अथ वर्षायोगप्रतिष्ठापनाक्रियायां चैत्यभक्तिकायोत्सर्गं करोमि' इत्येवं प्रतिज्ञाप्य, दंडादिकं भणित्वा 'वर्षेषु वर्षान्तर' इत्यादिका लघुचैत्यभक्ति सांचलिकां पठेत् । इति पूर्वदिक्चैत्यवन्दना

दक्षिणस्यां दिशि--

उक्तं श्लोकं पठित्वा, संभवाभिनन्दनस्वयंभूस्तवद्वयमुच्चार्य, क्रियां विज्ञाप्य, दंडादिकं विधाय तामेव भक्तिं सांचलिकां पठेत् । इत्येवं दक्षिणदिक्चैत्यवन्दना ।

पश्चिमायां दिशि—

उक्तं श्लोकं पठित्वा सुमतिपद्मप्रभस्वयंभूस्तवद्वयमुच्चार्य कृत्यविज्ञापनां कृत्वा दंडादिकं विधाय तामेव भक्तिं सांचलिकां पठेत् । इति पश्चिमदिक्चैत्यवंदना ।

उत्तरस्यां दिशि--

उक्तं श्लोकं पठित्वा सुपार्श्वचन्द्रप्रभस्वयंभूस्तवद्वयं भणित्वा कृत्यविज्ञापनां कृत्वा दंडादिकं विधाय तामेव लघुचैत्यभक्ति सांचलिकां पठेत् । इत्युत्तरदिक्चैत्यवन्दना ।

अथ वर्षायोगप्रतिष्ठापनक्रियायां ...... पंचगुरुभक्तिकायोत्सर्गं करोमि—(पंचगुरुभक्तिः)

अथ वर्षायोगप्रतिष्ठापनक्रियायां .... शान्तिभक्तिकायोत्सर्गं करोमि-- (शान्तिभक्तिः)

८९-वर्षायोगनिष्ठापनक्रिया

१ ऊर्जकृष्णचतुर्दश्यां पश्चाद्रात्रौ च मुच्यताम् ।

वर्षायोगप्रतिष्ठापने यो विधिरुक्तः स एव तन्निष्ठापने कार्यः। केवलं 'वर्षायोगप्रतिष्ठापनक्रियायां' इत्यस्य स्थाने 'वर्षायोगनिष्ठापनक्रियायां' इति योज्यम् ।

शेषविधिः-

मासं वासोऽन्यदेकत्र योगक्षेत्रं शुचौ व्रजेत् ।
मार्गेऽतीते त्यजेच्चार्थवशादपि न लंघयेत् ॥
नभश्चतुर्थी तद्याने कृष्णां शुक्लोर्जपंचमीं ।
यावन्न गच्छेत्तच्छेदे कथंचिच्छेदमाचरेत् ॥

९०-वीरनिर्वाणक्रिया

अथ वीरनिर्वाणक्रियायां ... ... सिद्धभक्तिकायोत्सर्गं करोमि--

अथ वीर निर्वाणक्रियायां . निर्वाणभक्तिकायोत्सर्गंकरोमि।
(निर्वाणभक्ति पठन् प्रदक्षिणां कुर्यात्)

अथ वीरनिर्वाणक्रियायां ... पंचगुरुभक्तिकायोत्सर्गंकरोमि।

अथ वीर निर्वाणक्रियायां ... शान्तिभक्तिकायोत्सर्गं करोमि

९१ कल्याणपंचकक्रिया

१-'अथ जिनेन्द्रगर्भकल्याणकक्रियाए।' इत्येवमुच्चार्य सिद्धचारित्रशान्तिभक्तयो विधेयाः।

१—कार्तिक कृष्णा चतुर्दशी के दिन रात्रि के चौथे प्रहर में वर्षायोग का निष्ठापन करें।

२–'अथ जिनेन्द्रजन्मकल्याणकक्रियायां' इत्येवमुच्चार्य सिद्धचारित्र शान्तिभक्तयो विधेयाः ।

३–'अथ जिनेन्द्रनिष्क्रमणक्रियायां' इत्येवमुच्चार्य सिद्धचारित्रयोगिशान्तिभक्तयो विधेयाः । योगिभक्तौच प्रदक्षिणीकरणम्।

४–'अथ जिनेन्द्रज्ञानकल्याणकक्रियायां' इत्येवमुच्चार्य सिद्धश्रुतचारित्रयोगिशान्तिभक्तयो विधेयाः । योगिभक्तौ च प्रदक्षिणीकरणम् ।

५–'अथ जिनेन्द्रनिर्वाणकल्याणकक्रियायां' 'निर्वाणक्षेत्र क्रियायां वा' इत्येवमुच्चार्य सिद्धश्रुतचारित्रयोगिनिर्वाणभक्तयोः विधेयाः । निर्वाणभक्तौ प्रदक्षिणीकरणम् ।

६२–पंचत्वप्राप्तर्ष्यादीनां काये निषेधिकायां च क्रिया

काये निषेधिकायां च मुनेः सिद्धविंशान्तिभिः ।
उत्तरव्रतिनः सिद्धवृत्तर्षिशान्तिभिः क्रिया ॥
सैद्धान्तस्य मुनेः सिद्धश्रुतर्षिशान्तिभक्तिभिः ।
उत्तरव्रतिनः सिद्धश्रुतवृत्तर्षिशान्तिभिः ॥
सूरेर्निषेधिकाकाये सिद्धर्षिसूरिशान्तिभिः ।
शरीरक्लेशिनः सिद्धवृत्तर्षिगणिशान्तिभिः ॥

(१) सामान्यमुनिके शरीर और निषद्याभूमि में सिद्धभक्ति, चारित्रभक्ति योगिभक्ति और शान्तिभक्ति पढ़कर, (२) सिद्धान्तवेत्ता मृत सामान्य मुनिके शरीर और निषद्याभूमि में सिद्धभक्ति, श्रुतभक्ति,योगिभक्ति और शान्तिभक्ति पढ़कर, (३) उत्तरव्रती और सिद्धान्तवेत्ता मृत सामान्य मुनि के शरीर और निषद्याभूमि में सिद्धभक्ति, श्रुतभक्ति, चारित्रभक्ति,

सैद्धान्तगणिनः सिद्धश्रुतर्षिसूरिशान्तयः ।
अस्य (क्लेशिनः) योगे सिद्धश्रुतवृत्तर्षिगणिशान्तयः ॥

(एषामुच्चारद्धा यथायोग्यमुन्नेयाः)

६३-चलाचलबिम्बप्रतिष्ठायाः क्रिया ।

चलाचलप्रतिष्ठायां सिद्धशान्तिस्तुतिर्भवेत् ।
वन्दना चाभिषेकस्य तुर्यस्नाने मता पुनः ॥
सिद्धवृत्तानुतिं कुर्याद् बृहदालोचनां तथा ।
शान्तिभक्ति जिनेन्द्रस्य प्रतिष्ठायां स्थिरस्य तु ॥

चलजिनबिम्बप्रतिष्ठाक्रियायां, अचलजिनबिम्बप्रतिष्ठाक्रियायां, चल-

---

योगिभक्ति और शान्तिभक्ति पढ़कर, (४) मृत आचार्य के शरीर और निषद्याभूमि में सिद्धभक्ति, योगिभक्ति, आचार्यभक्ति और शान्तिभक्ति पढ़कर, (५) कायक्लेशी मृत आचार्य के शरीर और निषद्याभूमि में सिद्धभक्ति,चारित्रभक्ति, योगिभक्ति,आचार्यभक्ति और शान्तिभक्ति पढ़कर, (६) सिद्धान्त के ज्ञाता मृत आचार्य के शरीर और निषद्याभूमि में सिद्धभक्ति, श्रुतभक्ति,योगिभक्ति,आचायभक्ति और शांतिभक्ति पढ़कर, (७) शरीर क्लेशी और सिद्धान्तवेत्ता मृत आचार्य के शरीर और निषद्याभूमि में सिद्धभक्ति,श्रुतभक्ति, चारित्रभक्ति, योगिभक्ति, आचार्यभक्ति और शान्तिभक्ति पढ़कर वन्दना क्रिया करें ।

१—चलजिनबिम्ब की प्रतिष्ठा और अचलजिनबिम्ब की प्रतिष्ठा में सिद्धभक्ति और शान्तिभक्ति होतीहै । चलजिनबिम्बकी प्रतिष्ठाके चतुर्थ दिनके अवभृथ स्नानमें अभिषेकवन्दना अर्थात् सिद्धभक्ति, चैत्यभक्ति, पंचगुरुभक्ति और शान्तिभक्ति मानी गई है । अचलजिनबिम्ब की प्रतिष्ठा के चतुर्थ दिन के अवभृथ स्नान में सिद्धभक्ति, चारित्रभक्ति, बड़ी चारित्रालोचना और शान्तिभक्ति करना चाहिए ।

जिनबिम्बचतुर्थदिनस्नपनक्रियायां, अचलजिनबिम्बचतुर्थदिनस्नपनक्रिया-यां इत्येवं विज्ञाप्य तास्ताः भक्तयः प्रणेयाः।

६४–आचार्यपदप्रतिष्ठापनक्रिया–

अथ आचार्यपदप्रतिष्ठापनक्रियायां ·· ··· आचार्यभक्ति-कायोत्सर्गं करोमि–

अथ आचार्यपदप्रतिष्ठापनाक्रियायां ······ आचार्यभक्ति कायोत्सर्गं करोमि —

एवं भक्तिद्वयं पठित्वा 'अद्यप्रभृति भवता रहस्यशास्त्राध्ययन-दीक्षादानादिकमाचार्यकार्यमाचर्यमिति गणसमक्षं भासमाणेन गुरुणा समर्प्यमाणपिच्छग्रहणलक्षणमाचार्यपदं गृह्णीयात्। अनन्तरं—

अथ आचार्यपदनिष्ठापनक्रियायां ··· शान्तिभक्तिकायो-त्सर्गं करोमि (शान्तिभक्तिः)

६५–प्रतिमायोगिमुनिक्रिया

अथ प्रतिमायोगिमुनिक्रियायां ······ सिद्धभक्तिकायोत्सर्गं करोमि––

अथ प्रतिमायोगिमुनिक्रियायां ··· योगिभक्तिकायोत्सर्गं करोमि।

अथ प्रतिमायोगिमुनिक्रियायां······शान्तिभक्तिकायोत्सर्गं करोमि––

(एवं विज्ञाप्य तत्तद् भक्तयो विधेयाः)

६६–दीक्षाग्रहणक्रिया

सिद्धयोगिबृहद्भक्तिपूर्वकं लिङ्गमर्प्यताम्।
लुञ्चाख्यानाग्न्यपिच्छात्म क्षम्यतां सिद्धभक्तितः ॥

अथ दीक्षाग्रहणक्रियायां ·· ···सिद्धभक्तिकायोत्सर्गं करोमि--

('सिद्धानुद्धूत' इत्यादि)

अथ दीक्षाग्रहणक्रियायां ·· ·· योगिभक्तिकायोत्सर्गं करोमि--

('थोस्सामि गुणधराणं' इत्यादि 'जातिजरोरुरोग' इत्यादि वा)

अनन्तरं लोचकरणं, नामकरणं नाग्न्यप्रदानं, पिच्छप्रदानं च।

अथ दीक्षानिष्ठापनक्रियायां······सिद्धभक्तिकायोत्सर्गं करोमि

दीक्षादानोत्तरकर्त्तव्यम्—

[१]व्रतसमितीन्द्रियरोधाः पंच पृथक् क्षितिशयो रदाघर्षः।
स्थितिसकृदशने लुञ्चावश्यकषट्के विचेलताऽस्नानम् ॥
इत्यष्टाविंशति मूलगुणान् निक्षिप्य दीक्षिते।
संक्षेपेण सशीलादीन् गणी कुर्यात्प्रतिक्रमम् ॥

१—उस दीक्षित में पांच व्रत, पांच समिति, पांच इन्द्रियनिरोध, क्षितिशयन, अदन्तधावन, स्थितिभोजन, सकृद्भुक्ति, लोच, छह आवश्यक, अचेलता और अस्नान इन अट्ठाईस मूल गुणों को संक्षेप से चौरासी लाख गुणों तथा अठारह हजार शीलों के साथ साथ स्थापित कर दीक्षादाता आचार्य उसी दिन व्रतारोपण प्रतिक्रमण करे। यदि लग्न ठीक न हो तो कुछ दिन ठहर कर भी प्रतिक्रमण कर सकता है।

६७-अन्यदातनलोचक्रिया

[२]लोचो द्वित्रिचतुर्मासैर्वरो मध्योऽधमः क्रमात्।
लघुप्राग्भक्तिभिः कार्यः सोपवासप्रतिक्रमः॥

अथ लोचप्रतिष्ठापनक्रियायां ...... सिद्धभक्तिकायोत्सर्गं करोमि—

('तवसिद्धे' इत्यादि)

अथ लोचप्रतिष्ठापनक्रियायां......... योगिभक्तिकायोत्सर्गं करोमि—

अनन्तरं स्वहस्तेन परहस्तेनापि वा लोचः कार्यः

अथ लोचनिष्ठापनक्रियायां .... सिद्धभक्तिकायोत्सर्गं करोमि—

('तवसिद्धे' इत्यादि) अनन्तरं प्रतिक्रमणं कर्तव्यम्।

६८-बृहद्दीक्षाविधिः

पूर्वदिने भोजनसमये भाजनतिरस्कारविधिं विधाय आहारं गृहीत्वा चैत्यालये आगच्छेत् ततो बृहत्प्रत्याख्यानप्रतिष्ठापने सिद्धयोग-भक्ती पठित्वा गुरुपार्श्वे प्रत्याख्यानं सोपवासं गृहीत्वा आचार्यशान्ति-समाधिभक्तीः पठित्वा गुरोः प्रणामं कुर्यात्।

अथ दीक्षादाने दीक्षादातृजनः शान्तिक-गणधरवलयपूजादिकं यथा-शक्ति कारयेत्। अथ दाता तं स्नानादिकं कारयित्वा यथायोग्यालङ्कार-

---

२—दूसरे, तीसरे या चौथे महीने में लोच करना चाहिए। दो महीने से लोच करना उत्कृष्ट, तीन महीने से मध्यम और चार महीने से जघन्य माना गया है। इस लोच को उपवासपूर्वक और प्रतिक्रमण सहित लघुसिद्धभक्ति और लघुयोगिभक्ति पढ़कर प्रतिष्ठापन और लघु सिद्धभक्ति पढ़कर निष्ठापन करना चाहिए।

युक्तां महामहोत्सवेन चैत्यालये समागत्य । स देवशास्त्रगुरुपूजां विधाय वैराग्यभावनापरः सर्वैः सह क्षमां कृत्वा गुरोरग्रे तिष्ठेत् । ततो गुरोरग्रे संघस्याग्रे च दीक्षार्थं याचां कृत्वा तदाज्ञया सौभाग्यवतीस्त्रीविहितस्वस्तिकोपरि श्वेतवस्त्रं प्रच्छाद्य तत्र पूर्वदिशाभिमुखः पर्यंकासनं कृत्वा आसते, गुरुश्चोत्तराभिमुखो भूत्वा, [१]संघाष्टकं संघं च परिपृच्छय लोचं कुर्यात् ।

अथ तद्विधिः—

बृहद्दीक्षायां लोचस्वीकारक्रियायां पूर्वाचार्येत्यादिकमुच्चार्य सिद्ध-योगिभक्ती कृत्वा—

ॐ नमोऽर्हते भगवते प्रक्षीणाशेषकल्मषाय दिव्यतेजोमूर्तये श्रीशान्तिनाथाय शान्तिकराय सर्वविघ्नप्रणाशनाय सर्वरोगाप-मृत्युविनाशनाय सर्वपरकृतक्षुद्रोपद्रवविनाशनाय सर्वक्षामडामर-विनाशाय ॐ ह्रां ह्रीं ह्रू ह्रौं ह्रः अ सि आ उ सा अमुकस्य सर्वशान्तिं कुरु २ स्वाहा ॥

इत्यनेन मंत्रेण गन्धोदकादिकं त्रिवारं मंत्रयित्वा शिरसि निक्षिपेत् । शान्तिमंत्रेण गन्धोदकं त्रिःपरिषिच्य मस्तकं वामहस्तेन स्पृशेत् । ततो दध्यक्षतगोमयदूर्वांकुरान् मस्तके वर्धमानमंत्रेण निक्षिपेत्—

ॐ नमो भयवदो वड्ढमाणस्स रिसहस्स चक्कं जलंतं गच्छइ आयासं पायालं लोयाणं भूयाणं जये वा विवादे वा थंभणे वा रणंगणे वा रायंगणे वा मोहणे वा सव्वजीवसत्ताणं अपराजिदो भवदु रक्ख रक्ख स्वाहा—वर्धमान मंत्रः ।

ततः पवित्रभस्मपात्रं गृहीत्वा "ॐ णमो अरहंताणं रत्नत्रय-

१—इति पदं पुस्तकान्तरे नास्ति ।

पवित्रीकृतोत्तमांगाय ज्योतिर्मयाय मतिश्रुतावधिमनः पर्ययकेवलज्ञानाय अ सि आ उ सा स्वाहा" इदं मंत्रं पठित्वा शिरसि कर्पूरमिश्रितं भस्म परिक्षिप्य "ॐ ह्रीं श्रीं क्लीं ऐं अर्हं अ सि आ उ सा स्वाहा" अनेन प्रथमं केशोत्पाटनं कृत्वा पश्चात् "ॐ ह्रां अर्हद्भ्यो नमः, ॐ ह्रीं सिद्धेभ्यो नमः, ॐ ह्रूं सूरिभ्यो नमः ॐ ह्रौं पाठकेभ्यो नमः, ॐ ह्रः सर्वसाधुभ्यो नमः" इत्युच्चरन् गुरुः स्वहस्तेन पंचवारान् केशान् उत्पाटयेत्। पश्चादन्यः कोऽपि लोचावसाने बृहद्दीक्षायां लोचनिष्ठापनक्रियायां पूर्वाचार्येत्यादिकं पठित्वा सिद्धभक्तिः (किं) कर्तव्या (कुर्यात्) ततः शीर्षं प्रक्षाल्य गुरुभक्तिं दत्वा वस्त्राभरणयज्ञोपवीतादिकं परित्यज्य तत्रैवावस्थाय दीक्षां याचयेत्। ततो गुरुः शिरसि श्रीकारं लिखित्वा "ॐ ह्रीं अर्हं अ सि आ उ सा ह्रीं स्वाहा" अनेन मंत्रेण जाप्यं १०८ दद्यात्। ततो गुरुस्तस्यांजलौ केशरकर्पूरश्रीखंडेन श्रीकारं कुर्यात्। श्रीकारस्य चतुर्दिक्षु—

रयणत्तयं च वंदे चउवीसजिणं तहा वंदे।
पंचगुरूणं वंदे चारणजुगलं तहा वंदे॥

इति पठन् अंकान् [1]लिखेत्। पूर्वे ३ दक्षिणे २४ पश्चिमे ५ उत्तरे २ इति लिखित्वा "सम्यग्दर्शनाय नमः, सम्यग्ज्ञानाय नमः, सम्यक्चारित्राय नमः" इति पठन् तन्दुलैरञ्जलिं पूरयेत्तदुपरि नालिकेरं पूगीफलं च धृत्वा सिद्धचारित्रयोगिभक्तिं पठित्वा व्रतादिकं दद्यात्। तथा हि—

वदसमिदिंदियरोधो लोचो आवासयमचेलमण्हाणं।
खिदिसयणमदंतवणं ठिदिभोयणमेयभत्तं च॥१॥

१—लिख्यते पुस्तकान्तरे।

इति पठित्वा तदूव्याख्याविधेया कालानुसारेणेति निरूप्य पँचमहाव्रतपँचसमितीत्यादि पठित्वा सम्यक्त्वपूर्वकं दृढव्रतं सुव्रतं समारूढं ते भवतु इति त्रीन् वारान् उच्चार्य व्रतानि दत्त्वा ततः शान्तिभक्तिं पठेन्। ततः आशीः श्लोकं पठित्वा अंजलिस्थं तन्दुलादिकं दात्रे दापयित्वा, अथ षोडशसंस्कारारोपणं —

अयं सम्यग्दर्शनसंस्कार इह मुनौ स्फुरतु १
अयं सम्यग्ज्ञानसंस्कार इह मुनौ स्फुरतु २
अयं सम्यक्चारित्रसंस्कार इह मुनौ स्फुरतु ३
अयं बाह्याभ्यन्तरतपः संस्कार इह मुनौ स्फुरतु ४
अयं चतुरङ्गवीर्यसंस्कार इह मुनौ स्फुरतु ५
अयं अष्टमातृमंडलसंस्कार इह मुनौ स्फुरतु ६
अयं शुद्धयष्टकावष्टंभसंस्कार इह मुनौ स्फुरतु ७
अयं अशेषपरीषहजयसंस्कार इह मुनौ स्फुरतु ८
अयं त्रियोगासङ्गमनिवृत्तिशीलतासंस्कार इह मुनौ स्फुरतु ९
अयं त्रिकरणासंयमनिवृत्तिशीलतासंस्कार इह मुनौ स्फुरतु १०
अयं दशासंयमनिवृत्तिशीलतासंस्कार इह मुनौ स्फुरतु ११
अयं चतुः संज्ञानिग्रहशीलतासंस्कार इह मुनौ स्फुरतु १२
अयं पंचेन्द्रियजयशीलतासंस्कार इह मुनौ स्फुरतु १३
अयं दशधर्मधारणशीलतासंस्कार इह मुनौ स्फुरतु १४
अयमष्टादशसहस्रशीलतासंस्कार इह मुनौ स्फुरतु १५
अयं चतुरशीतिलक्षगुणसंस्कार इह मुनौ स्फुरतु १६

इति प्रत्येकमुच्चार्य शिरसि लवंगपुष्पाणि क्षिपेत्।

'णमो अरहंताणं इत्यादि 'ॐ परमहंसाय परमेष्ठिने हं स हं स हं हां हुं ह्रौं ह्रीं हें हः जिनाय नमः जिनं स्थापयामि संवौषट्, ऋषिमस्तके न्यसेत्। अथ गुर्वावली पठित्वा अमुकस्य अमुकनामा त्वं शिष्य इति कथयित्वा संयमाद्युपकरणानि दद्यात्।

णमो अरहंताणं भो अन्तेवासिन् ! षड्जीवनिकायरक्षणाय मार्दवादिगुणोपेतमिदं पिच्छिकोपकरणं गृहाण गृहाणेति ।

ॐ णमो अरहंताणं मतिश्रुतावधिमनः पर्ययकेवलज्ञानाय द्वादशांगश्रुताय नमः भो अन्तेवासिन् ! इदं ज्ञानोपकरणं गृहाण गृहाणेति ।

कमंडलुं वामहस्तेन उद्धृत्य ॐ णमो अरहंताणं रत्नत्रयपवित्रीकरणांगाय बाह्याभ्यन्तरमलशुद्धाय नमः भो अन्तेवासिन् ! इदं शौचोपकरणं गृहाण गृहाणेति ।

ततश्च समाधि-भक्तिं पठेत् । ततो नवदीक्षितो मुनिर्गुरुभक्त्या गुरुं प्रणम्य अन्यान् मुनीन् प्रणम्योपविशति यावद्व्रतारोपणं न भवति तावदन्ये मुनयः प्रतिवन्दनां न ददति, ततो दातृप्रमुखा जना उत्तमफलानि अग्रे निधाय तस्मै नमोऽस्त्विति प्रणामं कुर्वन्ति ।

ततस्तत्पक्षेद्वितीयपक्षे वा सुमुहूर्ते व्रतारोपणं कुर्यात् । तदा रत्नत्रयपूजां विधाय पाक्षिकप्रतिक्रमणपाठः पठनीयः । तत्र पाक्षिकनियमग्रहणसमयात् पूर्वं यदा वदसमदीत्यादि पठ्यते तदा पूर्ववद्व्रतादि दद्यात् । नियमग्रहणसमये यथायोग्यं एकं तपो दद्यात् (पल्यविधानादिकं)। दातृप्रभृतिश्रावकेभ्योऽपि एकं एकं तपो दद्यात्। ततोऽन्ये मुनयः प्रतिवन्दनां ददति।

अथ मुखशुद्धिमुक्तकरणे विधिः—

त्रयोदशसु पंचसु त्रिषु वा कच्चोलिकासु लवंग-एला-पूगीफलादिकं निक्षिप्य ताः कच्चोलिकाः गुरोरग्रे स्थापयेत् । 'मुखशुद्धिमुक्तकरण पाठक्रियायामित्याद्युच्चार्य सिद्ध-योगि-आचार्य-शान्ति-समाधिभक्तीर्विधाय ततः पश्चान्मुखशुद्धिं गृह्णीयात् ।

इति महाव्रतदीक्षाविधिः ।

६६-क्षुल्लकदीक्षाविधिः ।

अथ लघुदीक्षायां सिद्ध-योगि-शान्ति-समाधिभक्तीः पठेत् ।"ॐ ह्रीं श्रीं क्लीं ऐं अर्हं नमः" अनेन मंत्रेण जाप्यं वार २१ अथवा १०८ दीयते ।

अन्यच्च विस्तारेण लघुदीक्षाविधि—

अथ लघुदीक्षानेतृजनः पुरुषः स्त्री वा दाता संस्थापयति । यथा-योग्यमलंकृतं कृत्वा चैत्यालये 'समानयेत्, देवं वंदित्वा सर्वैः सह क्षमां कृत्वा गुरोरग्रे च दीक्षां याचयित्वा तदाज्ञया सौभाग्यवती स्त्री विहितस्वस्तिकोपरि श्वेतवस्त्रं प्रच्छाद्य तत्र पूर्वाभिमुखः पर्यंकासनो गुरुश्चोत्तराभिमुखःसंघाष्टकं संघं च परिपृच्छ्य लोचं ··· ·· "ॐ नमोऽर्हते भगवते प्रक्षीणाशेषकल्मषाय दिव्यतेजोमूर्तये शान्तिनाथाय शान्तिकाराय सर्वविघ्नप्रणाशकाय सर्वरोगापमृत्युविनाशनाय सर्व-परकृतक्षुद्रोपद्रवविनाशनाय सर्वक्षामडामरविनाशनाय ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः अ सि आ उ सा अमुकस्य सर्वशान्तिं कुरु कुरु स्वाहा" अनेन मंत्रेण गन्धोदकादिकं त्रिवारं शिरसि निक्षिपेत् । शान्तिमंत्रेण गन्धोदकं त्रिः परिषिच्य वामहस्तेन स्पृशेत् । ततो दध्यक्षतगोमयतद्भस्म दूर्वांकुरान् मस्तके वर्धापनमंत्रेण निक्षिपेत् "ॐणमो भयवदो वड्ढमाणस्से त्यादि वर्धापनमन्त्रः पूर्वं कथितः । लोचादिविधिं महाव्रतवद्विधाय सिद्ध-भक्ति-योगिभक्ती पठित्वा व्रतं दद्यात् । दंसणवयेत्यादि वारत्रयं पठित्वा व्याख्यां विधाय च गुर्वावलीं पठेत्। ततःसंयमाद्युपकरणं दद्यात्।

ॐ णमो अरहंताणं भोः क्षुल्लक ! (आर्य-ऐलक !) क्षुल्लके वा षट्जीवनिकायरक्षणाय मार्दवादिगुणोपेतमिदं पिच्छोपकरणं गृहाण गृहाण, इत्यादि पूर्ववत्कमण्डलुं ज्ञानोपकरणादिक च मंत्र पठित्वा दद्यात् ।

इति लघुदीक्षाविधानं समाप्तम् ।

— — —

१००-अथोपाध्यायपददानविधिः ।

सुमुहूर्ते दाता गणधरवलयार्चनं द्वादशाङ्गश्रुतार्चनं च कारयेत् । ततः श्रीखण्डादिनाछटान् दत्वा तन्दुलैः स्वस्तिकं कृत्वा तदुपरि पट्टकं संस्थाप्य तत्र पूर्वाभिमुखं तमुपाध्यायपदयोग्यं मुनिमासयेत् । अथोपाध्यायपदस्थापनक्रियायां पूर्वाचार्येत्याद्युच्चार्य सिद्धश्रुतभक्ती पठेत् । तत आवाहनादिमंत्रानुच्चार्य शिरसि लवंगपुष्पाक्षतं क्षिपेत् । तद्यथा-ॐ ह्रौं णमो उवज्झायाणं उपाध्यायपरमेष्ठिन् ! अत्र एहि एहि संवौषट्, आह्वाननं स्थापनं सन्निधीकरणं । ततश्च "ॐ ह्रौं णमो उवज्झायाणं उपाध्यायपरमेष्ठिने नमः" इमं मंत्रं सद्देन्दुना चन्दनेन शिरसि न्यसेत् । ततश्च शान्तिसमाधिभक्ती पठेत् । ततः स उपाध्यायो गुरुभक्तिं दत्वा प्रणम्य दात्रे आशिषं दद्यादिति ।

इत्युपाध्यायपदस्थानविधिः ।

१०१-अथाचार्यपदस्थापनविधिः

सुमुहूर्ते दाता शान्तिकं गणधरवलयार्चनं च यथाशक्ति कारयेत् । ततः श्रीखंडादिना छटादिकं कृत्वा आचार्यपदयोग्यं मुनिमासयेत् । आचार्यपदप्रतिष्ठापनक्रियायां इत्याद्युच्चार्य सिद्धाचार्यभक्ती पठेत् । "ॐ ह्रूं परमसुरभिद्रव्यसन्दर्भपरिमलगर्भतीर्थाम्बुसम्पूर्णसुवर्णकलशपंचकतोयेन परिषेचयामीति स्वाहा" इति पठित्वा कलशपंचकतोयेन पादोपरि सेचयेत् । ततः पण्डिताचार्यो "निर्वेद सौष्ठ" इत्यादि महर्षिस्तवनं पठन् पादौ समंतात्परामृश्य गुणारोपणं कुर्यात् । ततः ॐ ह्रूं णमो आइरियाणं आचार्यपरमेष्ठिन् ! अत्र एहि एहि संवौषट् आह्वानं स्थापनं सन्निधीकरणं । ततश्च "ॐ ह्रूं णमो आइरियाणं धर्माचार्याधिपतये नमः" अनेन मंत्रेण सद्देन्दुना चन्दनेन पादयोर्द्वयोस्तिलकं दद्यात् । ततः शान्तिसमाधिभक्ती कृत्वा गुरुभक्त्या गुरुं प्रणम्योपविशति । तत उपासकास्तस्य पादयोरष्टतयीमिष्टिं कुर्वन्ति । यतयश्च

गुरुभक्तिं दत्वा प्रणमन्ति। स उपासकेभ्य आशीर्वादं दद्यात्।

इत्याचार्यपददानविधिः।

ॐ ह्रां ह्रीं श्रीं अर्हं हंसः आचार्याय नमः—आचार्यवाचना मंत्रः।

अन्यच्च—

ॐ ह्रीं श्रीं अर्हं हं सः आचार्याय नमः—आचार्य मंत्रः।

१०२-दीक्षा-नक्षत्राणि

प्रणम्य शिरसा वीरं जिनेन्द्रममलव्रतम्।
दीक्षा ऋक्षाणि वक्ष्यन्ते सतां शुभफलाप्तये ॥१॥
भरण्युत्तरफाल्गुन्यौ मघा-चित्रा-विशाखिकाः।
पूर्वाभाद्रपदा भानि रेवती मुनिदीक्षणे[1] ॥२॥
रोहिणी चोत्तराषाढा उत्तराभाद्रपत्तथा।
स्वातिः कृत्तिकया सार्धं वर्ज्यते मुनिदीक्षणे ॥३॥
अश्विनी-पूर्वाफाल्गुन्यौ हस्तस्वात्यनुराधिकाः।
मूलं तथोत्तराषाढा श्रवणः शतभिषत्तथा ।४।
उत्तराभाद्रपच्चापि दशेति विशदाशयाः।
आर्यिकाणां[2] व्रते योग्यान्युशन्ति शुभहेतवः ।५।
भरण्या कृत्तिकायां च पुष्ये श्लेषार्द्रयोस्तथा।
पुनर्वसौ च नो दद्युरार्यिकाव्रतमुत्तमाः ।६।
पूर्वभाद्रपदा मूलं धनिष्ठा च विशाखिका।
श्रवणश्चैषु दीक्ष्यन्ते क्षुल्लकाः शल्यवर्जिताः ।७।

इति दीक्षानक्षत्रपटलम्।

१ - प्रशस्तानीत्यर्थः। २ - क्षुल्लिकानामपि।

१०३-आचार्यवन्दना

पूर्वाचार्यानुक्रमेण सकल आचार्यभक्तिकायोत्सर्गं करोमि-

(आचार्यभक्तिर्विधेया)

१०४ प्रत्याख्यानप्रतिष्ठापनविधिः

प्रत्याख्यानप्रतिष्ठापनक्रियायां सिद्धभक्तिकायो० ।

(जाप्यं, तवसिद्धे इत्यादिः, अञ्चलिका, जाप्यम्)

१०५ प्रत्याख्याननिष्ठापनविधिः

प्रत्याख्याननिष्ठापनक्रियायां सिद्धभक्तिकायो० ।

(जाप्यं, तवसिद्धे इत्यादि, अञ्चलिका, जाप्यम्)

१०६ उपवासग्रहणविधिः

उपवास प्रतिष्ठापनक्रियायां सिद्धभक्तिकायोत्सर्गं करोमि

(जाप्यं, तवसिद्धे इत्यादि, अञ्चलिका, जाप्यम्)

१०७ उपवासत्यागविधिः

उपवासनिष्ठापनक्रियायां सिद्धभक्तिकायोत्सर्गं करोमि-

(जाप्यं, तवसिद्धे इत्यादि भक्तिः, अञ्चलिका, जाप्यम्)

१०८ आचार्यसमीपे प्रत्याख्यानप्रतिष्ठापनविधिः

प्रत्याख्यानप्रतिष्ठापनक्रियायां… सिद्धभक्तिकायोत्सर्गंकरोमि-

प्रत्याख्यानप्रतिष्ठापनक्रियायां… योगिभक्तिकायोत्सर्गं करोमि-

(तवसिद्धे) 'प्रावृट्काले' इत्यादि ।

१०९ आचार्य समीपे उपवास प्रतिष्ठापनविधिः

उपवासप्रतिष्ठापनक्रियायां सिद्धभक्तिकायोत्सर्गं करोमि-

उपवासप्रतिष्ठापनक्रियायां… योगिभक्तिकायोत्सर्गं करोमि-

('तत्रसिद्धे' 'प्रावृट्काले' इत्यादि भक्ती विधेये)।

११० पौर्वाह्णिकस्वाध्यायक्रिया

अथ पौर्वाह्णिक स्वाध्यायप्रतिष्ठापनक्रियायां श्रुतभक्तिका०
अथ पौर्वाह्णिकस्वाध्यायप्रतिष्ठापनक्रियायां ... आचार्यभक्तिका०
('अर्हद्वक्त्रप्रसूतं' प्राज्ञः प्राप्त' इत्यादि भक्तिद्वयम्)

१११ अपरान्हिक स्वाध्यायक्रिया

(पौर्वाह्णिकइत्यस्यस्थाने 'अपराह्णिक' इत्युच्चार्योक्तभक्ती कार्ये)

११२ प्रादोषिकस्वाध्यायक्रिया

(पौर्वाह्णिक इत्यस्यस्थाने प्रादोषिक" इत्युच्चार्योक्तभक्तीकार्ये)

११३ वैरात्रिकस्वाध्यायक्रिया

('वैरात्रिक' इत्युच्चार्योक्तभक्तीकर्तव्ये)

११४ स्वाध्यायनिष्ठापनक्रिया

(पौर्वाह्णिकस्वाध्यायनिष्ठापनक्रियायां श्रुतभक्तिकायोत्सर्ग' इत्यादि तन्नमोच्चार्यालघुश्रुतभक्तिः कार्या)।

११५ मध्याह्नदेववंदना

(मध्याह्नदेववंदनायां इति संयोज्य देववंदना कर्तव्या)

११६ सायंतनदेववन्दना

(अपराह्णिकदेववंदनायां इति संयोज्य देववन्दना कर्तव्या)

११७ योगग्रहणक्रिया

अथ रात्रियोगग्रहणक्रियायां ... श्रीयोगिभक्तिकायोत्सर्गं करोमि
(णमोअरहंताणं इत्यादि, थोस्सामि इत्यादि, जातिजरो इत्यादि)

११८ योगमोचनक्रिया

(योगिनिष्ठापनक्रियायां इत्युच्चार्य पूर्ववद्भक्तिः कार्या)

११९ दैवसिक प्रतिक्रमणविधि

(पृष्टादारभ्य ... पृष्ठपर्यन्तम्)

१२० रात्रिप्रतिक्रमणम्

(देवसिय इत्यस्य स्थाने 'राइय' इत्युच्चार्य दैवसिक-प्रतिक्रमणवत्कार्यम्)

१२१ आचार्यवंदना वृहद्विधिः

नमोऽस्तु श्री आचार्यवंदनायां श्री सिद्धभक्तिकायोत्सर्गं करोम्यहम् ('जाप्यं सम्मत्तणाणदंसण' तवसिद्धे इत्यादि)

नमोऽस्तु श्री आचार्यवंदनायां श्री श्रुतज्ञानभक्तिकायोत्सर्गं करोम्यहम् ('जाप्यम्, कोटीशतं' अरहंतभासित्थं इत्यादि।

नमोऽस्तु श्री आचार्यवन्दनायां आचार्यभक्तिकायोत्सर्गं करोम्यहम् ('सुप्यं, श्रुतजलधिपारगेभ्य इत्यादि)

१२२–मङ्गलाष्टकम्

श्रीमन्नम्रसुरासुरेन्द्रमुकुटप्रद्योतरत्नप्रभा। भास्वत्पादनखेन्दवः प्रवचनांभोधींदवःस्थायिनः।।ये सर्वे जिनसिद्धसूर्यनुगतास्ते पाठकाः साधवः। स्तुत्या योगिजनैश्च पञ्चगुरवः कुर्वं तु ते मंगलम्।।१।। सम्यग्दर्शनबोधवृत्तममलं रत्नत्रयं पावनं। मुक्ति श्रीनगराधिनाथजिनपत्युक्तोऽपवर्गप्रदः।। धर्मःसूक्तिसुधा च चैत्यमखिलं चैत्यालयं श्र्यालयं। प्रोक्तं च त्रिविधं चतुर्विधममी कुर्वन्तु ते मंगलम् ।२। नाभेयादिजिनाधिपास्त्रिभुवनख्यातश्चतुर्विंशतिः। श्रीमन्तो

भरतेश्वरप्रमुखयो ये चक्रिणो द्वादश ।। ये विष्णुप्रतिविष्णुलांगलधराः सप्तोत्तरा विंशति । त्रैकाल्ये प्रथितास्त्रिषष्टिपुरुषाः कुर्वन्तु ते मंगलम् ।।३।। देव्योऽष्टौ च जयादिका द्विगुणिता विद्यादिका देवताः । श्रीतीर्थंकरमातृकाश्च जनका यक्षाश्च यक्ष्यस्तथा ।। द्वात्रिंशत्त्रिदशाधिपास्तिथिसुरा दिक्कन्यकाश्चाष्टधाः । दिक्पाला दशेत्यमी सुरगणाः कुर्वंतु ते मंगलम् ।।४।। ये सर्वौषधऋद्धयः सुतपसो वृद्धिं गताः पञ्च ये । ये चाष्टांगमहानिमित्तकुशला येऽष्टा विधाश्चारणाः।।पंचज्ञानधरास्त्रयोऽपि बलिनो ये बुद्धिऋद्धीश्वराः। सप्तैते सकलार्चिता गणभृतः कुर्वंतु ते मंगलम् ।। ५ ।। कैलाशे वृषभस्य निर्वृतिमही वीरस्य पावापुरे । चम्पायां वसुपूज्यसज्जिनपतेः सम्मेदशैलेऽर्हताम्।। शेषाणामपि चोर्जयन्तशिखरे नेमीश्वरस्यार्हतो । निर्वाणावनयः प्रसिद्धविभवाः कुर्वंतु ते मंगलम्।।६।। ज्योतिर्व्यन्तरभावनामरगृहे मेरौ कुलाद्रौ तथा । जंबूशाल्मलिचैत्याशखिषु तथा वक्षारूप्याद्रिषु । इष्वाकारगिरौ च कुंडलनगे द्वीपे च नन्दीश्वरे शैले ये मनुजोत्तरे जिनगृहाः कुर्वन्तु ते मंगलम् ।।७।। यो गर्भावतरोत्सवो भगवतां जन्माभिषेकोत्सवो यो जातः परिनिष्क्रमेण विभवो यः केवलज्ञानभाक् । यः कैवल्यपुरप्रवेशमहिमा संभाविनः स्वर्गिभिः कल्याणानि च तानि पंच सततं कुर्वन्तु ते मंगलम् ।८। इत्थं श्रीजिनमंगलाष्टकमिदं सौभाग्यसम्पत्प्रदं कल्याणेषु महोत्सवेषु सुधियस्तीर्थङ्कराणामुषः । ये शृण्वन्ति पठंति तैश्च सुजनैर्धर्मार्थकामान्विता लक्ष्मीराश्रयते व्यापायरहिता निर्वाणलक्ष्मीरपि ।।९।। इति मंगलाष्टकम्

।। समाप्तम् ।।